शाब्दिकोषः

(शोधनिबन्धसंग्रहः)

डा० बिन्दाप्रसादमिश्रः

शाब्दिकविमर्शः

(शोधनिबन्धसंग्रहः)

लेखक :
डा०बिन्दाप्रसादमिश्रः
(पीएच.डी.)
अध्यक्षः
प्राच्यसंस्कृतविभागस्य
लखनऊविश्वविद्यालये

15 अगस्त 1998

प्रकाशक मुद्रक— के0के0वी0 प्रिन्टर्स
511/18, पुराना बादशाह नगर,
लखनऊ
दूरभाष—379108

प्रथम संस्करण 1998
500 प्रतियां

मूल्य :— 200/—

समर्पणम्



परम्बास्वरूपाया अम्बायाः श्रीमात्याःकेसरदेव्याः
करकञ्जयोरस्य शाब्दिकविमर्शस्य ग्रन्थस्य
क्रियते विनतशिरसा तत्सूनुना
बिन्दाप्रसादमिश्रेण।

भूमिका

अक्षरं परमं वन्दे शब्दशक्तिसमन्वितम् ।
विवृतमर्थभावेन यतो विश्वं चराचरम् ।।

निश्चितं विश्वमिदं नामरूपात्मकम् अक्षरतत्त्वमेवेति मन्ये। तदेव अनादिनिधनं ब्रह्मतत्त्वमित्यप्यवगम्यते। तथा हि भर्तृहरिणोक्तम् –

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।

इति वाक्यपदीये ब्रह्मकाण्डे–1

जगतः सर्वस्वं वेदवाङ्मयमक्षरतत्त्वमेव।षडङ्गो वेदः। शिक्षाकल्पनिरुक्तव्याकरणच्छन्दोज्योतिषाणि षडङ्गानीति आपस्तम्बधर्मसूत्रे (2 ।8 ।11) षडङ्गत्वं विहितम्। तेषु षडङ्गेषु व्याकरणं प्रधानमङ्गमिति भाष्यकारेणोद्घोषितम्–'प्रधानं' च षट्स्वङ्गेषु व्याकरणम्। प्रधाने कृतो यत्नः फलवान् भवति' इति महाभाष्यम्। वेदस्य मुखं व्याकरणामिति कथितं तदैव तस्य वेदाङ्गेषु मुख्यता भवति तथा हि–

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्येव ब्रह्मलोके महीयते।।

इति पाणिनीयशिक्षायाम्–(41,42)

यतो हि वेदस्य रक्षा व्याकरणेन भवति, अतोऽध्येयं व्याकरणमिति। तथाहि भगवता पतञ्जलिनोक्तम्–'रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यतीति महाभाष्यम्।

यतो हि व्याकरणं वैदिकानां लौकिकानां च साधुशब्दानां स्वरूपं स्पष्टं करोति, अतो वैदिकलौकिकशब्दानां स्वरूपावबोधनाय सर्वथा व्याकरणे मतिं कुर्यात्। वेदस्तु निश्चितमेव वैयाकरणेनैवावगम्यः, लौकिकशास्त्राण्यपि बिना व्याकरणं नैवावगम्यन्ते पुनरप्यद्य विना व्याकरणं जनैः प्रायः शास्त्राण्यालोच्यन्ते, इति तु महदाश्चर्यकारि कार्यमिति। किं वक्तव्यमत्र? पुनरपि चात्रेदमेव वक्तव्यम्– व्याकरणं पौनःपुन्येन पठनीयमिति। बिना व्याकरणं शास्त्रेषु कुत्रापि गतिर्नास्ति। साधूक्तमेव–

यो वेद वेदवदनं सदनं हि सम्यग्,
ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथममेतदधीत्यविद्वान्,
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी।।

अस्माभिरसाधुशब्दानां प्रयोगो न कार्य इति कृत्वापि व्याकरणस्याध्ययनं कर्तव्यमिति। भाष्यकारेण दुष्टशब्दस्य प्रयोगो न विधेय इत्युदाहरणमुखेन निर्दिश्यते।

दुष्टः शब्दः स्वरतो वर्णतो वा,
मिथ्या प्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति,
यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

'दुष्टाञ्छब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्' इति भाष्यम्। कः शब्दः कस्मिन्नर्थे कुत्र प्रयोक्तव्य इति निर्दुष्टज्ञानार्थमपि व्याकरणमध्येयम्। तथा हि लोकव्यवहारे विश्रुतमेव–

यद्यपि बहु नाधीषे तथापि पठ पुत्र! व्याकरणम्।
स्वजनः श्वजनो माभूत् सकलः शकलः सकृच्छकृत्।।

इत्थं शब्दस्य साधुत्वज्ञानाय व्याकरणस्य महती आवश्यकता अनुभूयते। तस्मान्नूनमेव व्याकरणं शब्दसाधुत्वव्यस्थापकमिति मन्तव्यम्।

अनेकव्याकरणोल्लेखः प्राप्यते। वोपदेवेन कविकल्पद्रुमे अष्टौ वैयाकरणा उल्लिखिताः। तथा हि—

इन्द्रश्चन्द्रः काशकृत्स्नाऽऽपिशली शाकटायनः।
पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः।।

स्वयं महार्षिपाणिनिना 'अष्टाध्यायी' इत्यत्र दशवैयाकरणनामुल्लेखो विहितः। तथा हि—शाकल्यः (1 । 1 । 16), काश्यपः (1 । 2 । 25), शाकटायनः (3 । 4 । 111), सेनकः (4 । 5 । 112), आपिशलिः, (6 । 1 । 92), स्फोटायनः (6 । 1 । 123), चाक्रवर्मणः (6 । 1 । 130), गालवः (7 । 1 74), भारद्वाजः (7 । 2 । 93), गार्ग्यः (8 । 2 । 20) इति । व्याकरणस्यातिदीर्घा तथा च अति प्राचीना परम्परास्ति। किन्तु सम्प्रति केवलं पाणिनेः परम्परा वर्तते। पाणिनेः 'अष्टाध्यायी' अद्य सम्पूर्णं लौकिकवैदिकं शाब्दिकप्रसङ्गमात्मनि गृह्णाति। पाणिनेः शास्त्रस्य व्याख्यानं प्रमुखतया कात्यायनेन पतञ्जलिना च कृतम्। अतः सम्प्रति मुनित्रयव्याकरणं लोके समादृतम्। तद् व्याकरणं पाणिनीयमित्येव व्यवह्रियते।

अयं ग्रन्थः **'शाब्दिकविमर्शः'** पाणिनीयमनुसृत्य वर्तते। पाणिनीयशास्त्रं व्याकरणस्य प्रक्रियापक्षः दार्शनिक— पक्षश्चेत्युभयं स्वस्मिन् विधत्ते। ग्रन्थेऽस्मिन् तयोर्द्वयोः पक्षयोः केचित्प्रसङ्गाः दशसु शोधलेखेषु निबद्धाः सन्ति। ते दश लेखाः — शब्दब्रह्मविमर्शः, पाणिनीये नित्यपदविमर्शः, नञर्थसमीक्षा, पाणिनीये षत्वविमर्शः, व्यधिकरणबहुव्रीहिसमीक्षा, ङमोह्रस्वादचिङमुण् नित्यम्, इत्यस्य विमर्शः, पाणिनीये णत्वविमर्शः, 'छात्री' शब्दस्य पाणिनीयत्वाऽपाणिनीयत्वविमर्शः, अभिज्ञानशकुन्तलम् इति पदौचित्यविमर्शः, ज्यौतिषपदसमीक्षा चेति। ये शोधलेखा अत्र वर्तन्ते, ते शाब्दिकानां कृते उपयोगिनः सन्ति। अतः तेषां प्रकाशनमेकत्रैव पुस्तकाकारेण क्रियते। ते सर्वे शोधनिबन्धाः स्वकीयं वैशिष्ट्यं महत्त्वं

यतो हि व्याकरणं वैदिकानां लौकिकानां च साधुशब्दानां स्वरूपं स्पष्टं करोति, अतो वैदिकलौकिकशब्दानां स्वरूपावबोधनाय सर्वथा व्याकरणे मतिं कुर्यात्। वेदस्तु निश्चितमेव वैयाकरणेनैवावगम्यः, लौकिकशास्त्राण्यपि बिना व्याकरणं नैवावगम्यन्ते पुनरप्यद्य विना व्याकरणं जनैः प्रायः शास्त्राण्यालोच्यन्ते, इति तु महदाश्चर्यकारि कार्यमिति। किं वक्तव्यमत्र? पुनरपि चात्रेदमेव वक्तव्यम्– व्याकरणं पौनःपुन्येन पठनीयमिति। बिना व्याकरणं शास्त्रेषु कुत्रापि गतिर्नास्ति। साधूक्तमेव–

यो वेद वेदवदनं सदनं हि सम्यग्,
ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथममेतदधीत्यविद्वान्,
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी।।

अस्माभिरसाधुशब्दानां प्रयोगो न कार्य इति कृत्वापि व्याकरणस्याध्ययनं कर्तव्यमिति। भाष्यकारेण दुष्टशब्दस्य प्रयोगो न विधेय इत्युदाहरणमुखेन निर्दिश्यते।

दुष्टः शब्दः स्वरतो वर्णतो वा,
मिथ्या प्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति,
यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

'दुष्टाञ्छब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्' इति भाष्यम्। कः शब्दः कस्मिन्नर्थे कुत्र प्रयोक्तव्य इति निर्दुष्टज्ञानार्थमपि व्याकरणमध्येयम्। तथा हि लोकव्यवहारे विश्रुतमेव–

यद्यपि बहु नाधीषे तथापि पठ पुत्र! व्याकरणम्।
स्वजनः श्वजनो माभूत् सकलः शकलः सकृच्छकृत्।।

इत्थं शब्दस्य साधुत्वज्ञानाय व्याकरणस्य महती आवश्यकता अनुभूयते। तस्मान्नूनमेव व्याकरणं शब्दसाधुत्वव्यस्थापकमिति मन्तव्यम्।

अनेकव्याकरणोल्लेखः प्राप्यते । वोपदेवेन कविकल्पद्रुमे अष्टौ वैयाकरणा उल्लिखिताः । तथा हि—

इन्द्रश्चन्द्रः काशकृत्स्नाऽऽपिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः ।।

स्वयं महार्षिपाणिनिना 'अष्टाध्यायी' इत्यत्र दशवैयाकरणनामुल्लेखो विहितः । तथा हि —शाकल्यः (1 । 1 । 16), काश्यपः (1 । 2 । 25), शाकटायनः (3 । 4 । 111), सेनकः (4 । 5 । 112), आपिशलिः, (6 । 1 । 92), स्फोटायनः (6 । 1 । 123), चाक्रवर्मणः (6 । 1 । 130), गालवः (7 । 1 74), भारद्वाजः (7 । 2 । 93), गार्ग्यः (8 । 2 । 20) इति । व्याकरणस्यातिदीर्घा तथा च अति प्राचीना परम्परास्ति । किन्तु सम्प्रति केवलं पाणिनेः परम्परा वर्तते । पाणिनेः 'अष्टाध्यायी' अद्य सम्पूर्णं लौकिकवैदिकं शाब्दिकप्रसङ्गमात्मनि गृह्णाति । पाणिनेः शास्त्रस्य व्याख्यानं प्रमुखतया कात्यायनेन पतञ्जलिना च कृतम् । अतः सम्प्रति मुनित्रयव्याकरणं लोके समादृतम् । तद् व्याकरणं पाणिनीयमित्येव व्यवह्रियते ।

अयं ग्रन्थः **'शाब्दिकविमर्शः'** पाणिनीयमनुसृत्य वर्तते । पाणिनीयशास्त्रं व्याकरणस्य प्रक्रियापक्षः दार्शनिक— पक्षश्चेत्युभयं स्वस्मिन् विधत्ते । ग्रन्थेऽस्मिन् तयोर्द्वयोः पक्षयोः केचित्प्रसङ्गाः दशसु शोधलेखेषु निबद्धाः सन्ति । ते दश लेखाः — शब्दब्रह्मविमर्शः, पाणिनीये नित्यपदविमर्शः, नञर्थसमीक्षा, पाणिनीये षत्वविमर्शः, व्यधिकरणबहुव्रीहिसमीक्षा, ङमोह्रस्वादचिङमुण् नित्यम्, इत्यस्य विमर्शः, पाणिनीये णत्वविमर्शः, 'छात्री' शब्दस्य पाणिनीयत्वाऽपाणिनीयत्वविमर्शः, अभिज्ञानशकुन्तलम् इति पदौचित्यविमर्शः, ज्यौतिषपदसमीक्षा चेति । ये शोधलेखा अत्र वर्तन्ते, ते शाब्दिकानां कृते उपयोगिनः सन्ति । अतः तेषां प्रकाशनमेकत्रैव पुस्तकाकारेण क्रियते । ते सर्वे शोधनिबन्धाः स्वकीयं वैशिष्ट्यं महत्त्वं

च भजन्ते। तत्र तु विद्वांस एव प्रमाणमिति। पुनरपि मन्ये ग्रन्थोऽयं सज्जनानां दुर्जनानां च सर्वेषां कृते तोषकरो भविता-

तुष्यन्तु सुजना बुद्ध्वा विशेषान् मदुदीरितान्।
अबोधेन हसन्तो मां तोषमेष्यन्ति दुर्जनाः।।

गन्थे यदि काश्चित् त्रुटयो प्रमादतो विद्यन्ते, ता विद्वद्भिः कृपया परिमार्जनीयाः।

शोधनिबन्धानां लेखने येषां विदुषां परामर्शः प्राप्तः तान् प्रति कृतज्ञताज्ञापनं लेखकः करोति। किन्तु लेखकस्यानने तेषां विद्वन्महानुभावानां महनीयतानुरूपस्तादृशः शब्दराशिरल्पज्ञतावशान्न स्फुरति यादृशस्तान् प्रति समपेक्षते। पुनरपि 'भक्त्यैव तुष्यन्ति महानुभावाः' इति विचिन्त्य तेषु केवलं स्वकीयमनुरक्तं मनः लेखकः सादरं समर्पयति।

तेहि महानुभावाः– महावैयाकरणः आचार्यरामनारायणत्रिपाठी, आचार्यरामेश्वप्रसादशास्त्री,स्व0 डा0 ब्रजमोहनचतुर्वेदी,डा0कैलास–पतित्रिपाठी, डा0नवजीवनरस्तोगीमहोदयः, डा0अशोककालिया–महोदयः,डा0 वीरभद्र मिश्रः, डा0आजादमिश्रः,डा0शिवकुमारचर्तुवेदी, डा0अयोध्यादासश्रीवैष्णव – श्चेति व्याकरणादिविविध शास्त्रमर्मज्ञाः सर्वे प्रथितयशसो विद्वांसः सन्ति, यैर्बहुविधः शास्त्रीयपरामर्शः समये समये दत्तः, तान् प्रति श्रद्धया नतोऽयं जनः कृतज्ञतां विज्ञापयति। अस्य ग्रन्थस्यप्रकाशनावसरेपूज्यगुरुवर्येण आचार्यरामनारायण–त्रिपाठिना, सुहृदा डा0 आजादमिश्रेण, सहयोगिना डा0गिरिधर–त्रिपाठिना तथा च डा0 ओम्प्रकाशशास्त्रिणा यादृशं साहाय्यं कृतं तादृशमन्यत्र दुर्लभमेव। तस्मादेतेषां महानुभावानामाभारं कृतज्ञोऽयं लेखकः शिरसा विभर्ति। अस्यग्रन्थस्य मुद्रणप्रकाशनकाले श्री उत्तमकुमारगुप्तमहोदयेन यादृशः श्रमः कृतः, स सर्वदा स्मरणीयः। तं प्रति कृतज्ञतां संवहति।

–बिन्दाप्रसादमिश्रः

□

विषयसूची

[1]

शब्दब्रह्मविमर्शः

कः पुरुषो वस्तुतो जानाति, को वा याथातथ्यं वक्तुं समर्थो यदियं दृश्यमाना विविधा सृष्टिः कस्मादुपादानात् कस्मान्निमित्तकारणाच्चोद्भूता वर्तते । अर्थादिहलोके कोऽपि नास्ति यो याथातथ्यं सर्वसम्मतं निर्विवादं सृष्टेरुत्पत्तेःस्थायिविवरणं प्रदातुं शक्नोति । देवा अपि विविधसृष्ट्याः पश्चात्सृष्टाः सन्ति, तस्मात्तेऽपि न जानन्ति यद् विचित्रा विविधा च सृष्टिः कुतोऽजायतेति सन्दर्भो वेदे प्रतिपादितः । यथा हि–

को अद्धा वेद क इह प्रवोचत्कुत आजाता कुत इयं विसृष्टिः ।
अर्वाग्देवा अस्या विसर्जनेनाथा को वेद यत आबभूव ।।
ऋग्वेदः (10 ।129 । 6) इति ।

पुनरपि वेदः प्रतिपादयति यत् सृष्टेः प्राक् शक्तिमत् किञ्चिदेकमेवासीत् । तदेव तत्त्वं तदेव ब्रह्मेति वा । तस्य हृदये सृष्ट्यर्थं प्राक् सिसृक्षा समजायत । तदेव सृष्टेर्बीजमिति कवयः क्रान्तिदर्शिनो योगिन ऋषयो हृदये बहुविधं विचिन्त्यालभन्त । यथा हि–

न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः ।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ।।
कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा ।
ऋग्वेदः (10 । 129 । 2,4) इति ।

ऋग्वेदे सृष्ट्युत्पत्तिसूचकानि त्वेनकानि सूक्तानि सन्ति । यथा– पुरुषसूक्तम् (10 ।90), वाक्सूक्तम् (10 ।125), नासदीयसूक्तम् (10 ।129) चेति । तत्र सृष्टिः पृथक् पृथक् विचिन्तितास्ति । तस्मादेव कालान्तरे विविधमतानि सृष्टिविषयकाणि समुत्पन्नानि दृश्यन्ते । तानि मतानि

नानादर्शनरूपाणि प्रचलितानि लोके सन्ति । सर्वाणि च तानि आस्तिकनास्तिकदर्शनानि सृष्टिं विचारयन्ति, सृष्टिकर्तारं तत्स्वरूपं च विचारयन्ति, किन्तु तानि नैकमतानि सन्ति । तत्र सृष्टिकर्तृविषये भिन्नं मतं सृष्टिकर्तृस्वरूपविषये भिन्नं मतं सृष्टिविषये च भिन्नं मतं वर्तते । विचित्रसृष्टिसम्बन्धीनि विचित्राणि मतानि स्वाभाविकान्येव सन्ति । अद्यावधि भौतिकविज्ञानेनाधुनिकेनापि सर्वसम्मतो निर्दुष्टः सृष्ट्युत्पत्तिक्रमो न प्रतिष्ठापितः । पुनरपि किमिदं जगत्, किं जगतः स्वरूपम्, कस्तस्यकर्ता, किञ्च तस्य कर्तुः स्वरूपमिति बहुभिः सततं विचारितम् । किन्तु सर्वं तच्चिन्तनमनुमितिमूलकमेव वर्तते । यतो हि विविधलिङ्गवती सृष्टिः, अतस्तत्कर्तृस्वरूपनिर्धारणे विविधता संलक्ष्यते । व्याकरणं तु साक्षाद् वेद एव, वेदाङ्गत्वात् । तत्तु वेदपुरुषस्य मुखमिति पाणिनिना प्रतिपादितम् । यथा हि–

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।

इति पाणिनीयशिक्षा – 41,42 ।

अत्र विचार्यते यत्–तद् व्याकरणं यद् वेदस्य मुखमिति वर्तते तस्य ब्रह्मादिविषयकं निर्वचनं कथम्भूतं वर्तत इति । अर्थाद् वेदः स्वयं निजमुखाद् ब्रह्मादिकं किं निर्वचति तद् ध्यातव्यमिति । यतो हि व्याकरणं वेदस्य प्रधानमङ्गं वर्तते । यथा भगवता पतञ्जलिनोक्तम्–'प्रधानं च षट्स्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति' इति । अपिच व्याकरणं विना वेदस्य तात्त्विकाभिप्रायो नोपलभ्यते ।तथा व्याकरणं वेदस्य प्रधान–रक्षकोऽपि वर्तते ।अतस्तदेव वेदस्य तात्त्विकं विज्ञातृ लोकेऽस्तीति । तथैव सर्वं सुविचिन्त्यैव भगवता पतञ्जलिना स्पष्टमुद्घोषितम् – 'रक्षार्थं वेदानामध्येयं व्याकरणमिति' ।

व्याकरणस्य पक्षद्वयं वर्तते । प्रथमो भौतिकः पक्षः । अपरो दार्शनिकः पक्षः । भौतिकपक्षे नित्यशब्दस्य व्यवहारोपयोगिकार्यशब्दस्वरूपस्य चिन्तनं वर्तते । कार्यशब्दो वर्णात्मकः पदात्मको वाक्यात्मको वा भवति । सोऽनित्यः कल्पितो व्यवहारे । अनित्यस्याभिप्रायो व्याकरणनये शब्दस्य नाशो नास्ति, अपितु व्यवहारदशायां तस्योच्चारणानन्तरमदर्शनमिति बोध्यम् । 'अदर्शनं लोपः' (पा० 1 ।1 ।60) इति पाणिनीयं प्रमाणम् । अदर्शनत्वं तत्र केनचिद् बाधकभावेन श्रवणेन्द्रियस्याविषयत्वमिति ज्ञेयम् । यत्र तु तृतीयक्षणे वर्णनाशः कल्पितः तत्र व्याकरणातिरिक्तः कश्चिदन्यो नयः प्रमाणमिति मन्ये । व्याकरणनये कार्यशब्दो नित्यसदृशो नित्यभिन्नः स्वीकृतो भूत्वा व्यवहारे सोऽनित्यपदेन व्यपदिश्यते । व्यवहारे शब्दस्य नाशो नास्ति । प्रतिबन्धके सति तस्य तु लोपो भवति । आधुनिकभौतिकविज्ञानमपि व्यवहारे शब्दस्य नाशो न भवतीति व्याकरणसम्मतमेव पक्षं स्वीकरोति । तस्मादेव तेन चोच्चरितानां शब्दानां संग्रहं कृत्वा कालान्तरे तेषामेव पुनः प्रसारणं दूरदर्शनादिमाध्यमेन क्रियते । अपि चाधुनिकभौतिकवैज्ञानिकाः शब्दे नित्ये सत्येव अतिप्राचीनकाले समुच्चरितानां शब्दानामन्वेषणतत्पराः सन्ति । ते तेषां ग्रहणाय विविधभौतिकचेष्टायुताः संदृश्यन्ते । इत्थं व्याकरणप्रतिपादितं शब्दस्य सार्वकालिकनित्यत्वं सम्प्रति भौतिकविज्ञानेनाधुनिकेनापि सुदृढं साधितम् । यतो हि व्याकरणं विविधार्थानां स्वरूपमवबोधनाय कार्यभूतविविधशब्दानां साधुत्वकल्पनं धातुप्रत्ययमाध्यमेन करोति । तस्मादेव बालानां प्रबोधनाय व्यवहारे शब्दोऽनित्य इत्यपि कथयति । तत्त्वतः शब्दो नित्यः नित्योऽर्थः, नित्यश्च शब्दार्थयोः सम्बन्ध इति । तथैव 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकम् । अत्र सिद्धशब्दो नित्यशब्दस्यापरपर्याय इति ।

विश्वस्मिन् संसारे विविधा अर्था एव दरीदृश्यन्ते । अर्थात् संसारोऽयमर्थात्मक इति । अर्थानां वाच्यता शब्दैरेव सम्भाव्या । अर्थाभिधायिशब्दानामुच्चारणं स्पष्टतया मनुष्य एव कर्तुं शक्नोति । व्यवहारेऽर्थपूर्विका शब्दोत्पत्तिर्भवतीति पाणिनिना प्रोक्तम्—

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ।

इति पाणिनीयशिक्षा (6,7)

अत्र पाणिनिना लोके शब्दोत्पत्तिप्रक्रिया प्रदर्शिता । तत्र शब्दोत्पत्तिविषयको भौतिकपक्ष इति । अतः शब्दः कार्यो भवति, अर्थानुरूप–तदुत्पत्तेरिति । एवंभूता विविधाः शब्दा लोके विविधार्थवाचका भवन्ति। तेषां सम्यगवबोधनं व्याकरणाज्जायते। अत्र नास्ति संदेहावसरो यन्निखिलमपि लौकिकं वैदिकं चार्थात्मकं स्वरूपं कार्यभूतशब्देन व्यापृतम् । व्याकरणं तु सर्वथार्थानुरूपं शब्दस्य साधुत्वं प्रदर्श्य व्यवहारे जनानर्थेषु नियोजयति । यतो हि व्यवहारोऽर्थप्रधान एव संदृश्यते । अर्थस्तु शब्दावच्छिन्नो लोके प्रतीयते । इदं नामरूपात्मकं सर्वं चराचरं जगत् शब्दाभिधेयं भवति । तत्तु लौकिकवैदिकशब्दानुविद्धमेव ज्ञायते । यतो हि लौकिकवैदिकशब्दानां निर्वचने व्याकरणमेवैकमात्रं साधनम्, अतो व्याकरणमुखेन किमिदं जगत् किमस्य स्वरूपं किमस्य च कारणमिति ज्ञायते ।

व्याकरणं शब्दस्य केवलं भौतिकं स्वरूपमेव न चिन्तयति, अपितु शब्दस्य पारमार्थिकस्वरूपं किमस्तीति वेददिशा प्रतिपादयति । तदेव तस्य दार्शनिकं मानं पक्षो वा । व्याकरणस्य दार्शनिकपक्षे ब्रह्मविषये द्विविधं मतं प्राप्यते। एकस्मिन् मते परब्रह्म शब्दब्रह्मेति च द्वे ब्रह्मणीति। अपरस्मिंन् मते केवलं शब्दब्रह्मैव तदेव परब्रह्मपदवाच्यमिति । जगदुत्पत्तिविषये तदुभयोः पक्षयोरैकमत्यं 'शब्दब्रह्मणो जगदुत्पत्तिरिति वर्तते ।

अत्र प्रथमं तावद् द्वे ब्रह्मणीतिपक्षश्चिन्तनीयः । यथा हि मैत्र्युपनिषदि (6।22) – 'द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्' इति ।

'शब्दश्च तद् ब्रह्म चेति शब्दब्रह्म । कः शब्द इति । शास्त्रे व्याकरणादौ यो वाचकः शब्दः । 'शप' आक्रोशे, ततो दन्प्रत्ययः, 'शाशपिभ्यां ददनौ' (उ0 4।97) इति दन् । तस्मात् शप्यते आक्रुश्यते इति शब्दः ।

अथवा शब्दनं शब्द इति । 'शब्द' 'शब्दकरणे भाषणे वा' इति धातोर्घञ्, 'भावे' (3 । 3 । 18) इति सुधाव्याख्यायां श्रीभानुजीदीक्षितः । व्यवहारे शब्दस्यापरपर्याया अन्ये शब्दा अपि लभ्यन्ते । यथा हि–'शब्दोऽक्षरे यशोगीत्योर्वाक्ये खे श्रवणे ध्वनौ' इति हेमः।

'शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ।

स्वाननिर्घोषनिर्ह्लादनादनिस्वाननिस्वनाः ।।

आरवारावसंरावविरावाः' इत्यमरः

'शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः ।

सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ।। 'इति भाषापरिच्छेदः, इति कृत्वा भानुजीदीक्षितेन रामाश्रमीटीकायामुद्धृतम् ।

ततो ब्रह्मेति पदस्य कोऽभिप्रायः? बृहि 'वृद्धौ' इति धातोः 'बृंहेर्नोच्च' (उ04 । 146) इति मनिन् प्रत्ययः । बृंहति वर्धते वेति ब्रह्म । ब्रह्मपदं तत्त्वादीनां वाचकं भवति। यथा हि–

'ब्रह्म तत्त्वतपोवेदे न द्वयोः पुसि वेधसि ।

ऋत्विग्योगभिदोर्विप्रे चाध्यात्मज्ञानयोस्तथा।।'इति मेदिनी। अमरकोशे वेदोऽपि ब्रह्मशब्देन गृह्यते–'वेदस्तत्त्वं तपो ब्रह्म ' इत्येतेष्वर्थेषु ब्रह्मन्' इति नपुंसके, किन्तु प्रजापतौ विप्रे च 'ब्रह्मन्' इति पुंसि वर्तते। यथा– 'ब्रह्मा विप्रः प्रजापतिः इत्यमरः । इत्थं शब्दब्रह्मेत्यनेन वेदो ग्राह्यः तथा च वेदप्रतिपाद्यो निखिलोऽपि धर्मोऽर्थोऽथवा प्रपञ्चभूतसंसारोऽयं ग्राह्योभवति। अत्रवेदशब्देन वैदिको लौकिकश्चाक्षरसमाम्नायोऽङ्गी–करणीयः। यतो हि यो लौकिकाऽक्षरसमाम्नायो वर्तते,सतु वेदोपबृंहणमेव। अतो लौकिकोऽपि ज्ञानविज्ञानात्मकाक्षरसमाम्नायो वेद इति भवितुं शक्नोति । निखिलोऽपि संसारः शब्देन वाच्यो भवति, तस्मात् संसारोऽपि शब्दब्रह्मेति वांच्यम्। नास्ति संसारस्य किञ्चिद् वस्तु यत् शब्दानुविद्धं न भवेदिति। अयं संसारः शब्दब्रह्मात्मकः परब्रह्मण उत्पन्नः कार्यभूतो वेति । यथा हि सर्वप्रथमं वेदे (ऋग्वेदः, 10 । 129) नासदीयसूक्ते समुद्घोषितं यज्जगदिदं

परमैकतत्त्वतो जातम् । तत्परमेकतत्त्वं ब्रह्मेति सायणाचार्येणोद्घोषितम् । ततस्तद् ब्रह्मतत्त्वं चोपनिषत्सु बहुविधं प्रतिपादितं तथा तद्ब्रह्मणो जगदिदमुत्पन्नमस्ति। कथम्भूतं तद् ब्रह्मेति केनोपनिषदि (1 । 3–8) निरूप्यते–

'न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यादन्यदेव तद्विदितादथो अविदितादधि। इति शुश्रुम पूर्वेषां ये नस्तद् व्याचचक्षिरे ।।'

यद्वाचानभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।।
यन्मनसा न मनुते येनाहुर्मनोमतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।।
यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।।
यत् प्राणेन न प्राणिति येन प्राणः प्रणीयते
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।।

अत्र गुरुणा मनोबुद्ध्यादिभ्यः परं ब्रह्मेति प्रतिपादितम् । तत्तु सर्वज्ञातृ–सर्वशक्तिप्रदातृ–सर्वस्वामि–सर्वप्रेरकसर्वशक्तिमदित्युक्तम् । तत एवेदं जगदुत्पन्नमिति ।

तथैव च– 'ॐ आत्मा वा इदमेक एवाग्र आसीत् । नान्यत्किञ्चन मिषत् । स ईक्षत लोकान्नु सृजा इति।। स इमाँल्लोकानसृजत। अम्भो मरीचीर्मरमापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः पृथिवी मरो वा अधस्तात्ता आपः।। स ईक्षतेमे नु 'लोका लोकपालान्नु सृजा इति सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत्' ।।

इति (ऐतरेयोपनिषद् (1 ।1–3) ।

अपिच श्वेताश्वतरोपनिषदि चाप्युक्तम्–

य एको जालवानीशत ईशनीभिः

सर्वाँल्लोकानीशत ईशनीभिः ।
य एवैक उद्भवे सम्भवे च
य एतद्विदुरमृतास्ते भवन्ति ।। इति (श्वेत0 3 ।1)

इदं निखिलमपि जगत् तेन सर्वतो व्याप्तम् । तस्य सत्ता सर्वत्रैव वर्तते । तथा च जगतः परमपि यत् किञ्चिद् भवितुं शक्नोति तदपि तेन व्याप्तम् । अर्थाद् ब्रह्मपरं किमपि नास्तीति । यथा हि –

ततः परं ब्रह्मपरं बृहन्तं यथानिकायं सर्वभूतेषु गूढम् ।
विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वामृता भवन्ति ।।
इति श्वेत0 (3 । 7)

य एकोऽवर्णो बहुधा शक्तियोगाद्
वर्णाननेकान् निहितार्थो दधाति ।
विचैति चान्ते विश्वमादौ स देवः
स नो बुद्ध्या शुभया संयुनक्तु ।। इति श्वेत0 (4 ।1)

सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये
विश्वस्यस्रष्टारमनेकरूपम् ।
विश्वस्यैकं परिवेष्टितारं
ज्ञात्वा तत्त्वं शान्तिमनन्तमेति । । इति श्वेत0 (5 ।13)

इत्थंभूताद् ब्रह्मणः शब्दब्रह्म 'ओम्' इति प्रथममजायतेति । वेदस्य तदेव सूक्ष्मकारणं वर्तते । तत एव वेदोऽजायत । यतो हि वेदस्तत्पदं पौनःपुनिकेनामनन्ति । यथा हि कठोपनिषदि (1 । 2 । 15) यमवचनम्–

सर्वे वेदा यत् पदमामनन्ति
तपांसि सर्वाणि च यद् वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ।। इति ।

महाभारतेऽपि प्रतिपादितं यत् तेजोमयब्रह्मण इदं स्थावरजङ्गमं जगदुत्पन्नमिति । ब्रह्मातिरिक्तं यत् शब्दात्मकं वेदस्वरूपं प्रत्यक्षं जगद्

वर्तते तत् शब्दब्रह्मैव भवति । यथाहि–

ब्रह्म तेजोमयं शुक्रं यस्य सर्वमिदं जगत् ।
एतस्य ब्रह्मभूतस्य द्वयं स्थावरजङ्गमम् ।।
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।।

इति शान्तिपर्व–232 । 1,30

श्रीमद्भागवतपुराणेऽपि ब्रह्मणः शब्दब्रह्मोत्पत्तिः प्रतिपादिता । यथाहि–

समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ।
हृद्याकाशादभून्नादो वृत्तिरोधाद् विभाव्यते ।।
स्वधाम्नो ब्रह्मणः साक्षाद् वाचकः परमात्मनः ।
स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम् ।।

इति द्वादशस्कन्धे–6 ।37,41 ।

अनेन ज्ञायते यत् 'परब्रह्मणः शब्दात्मकं चराचरं निखिलमपि जगज्जातमि'ति व्याकरणदर्शनस्य प्रथमो वेदविहितः पक्षः ।

सम्प्रति व्याकरणदर्शनस्यापरो वेदमूलकः पक्षो ब्रह्मादिविषयको विमृश्यते, यस्मिन् 'शब्दब्रह्म' 'अशब्दब्रह्म' चेति द्वयमपि शब्दब्रह्मैव । शब्दातिरिक्तमन्यत् किमपि संसारे नास्ति । सर्वशक्तिमान् शब्द एव । तस्मादेव विविधा सृष्टिर्जातेति । वाक्सूक्ते जगतः कारणं ब्रह्मस्वरूपा वागिति । सा वाक् स्वयं चात्मानं सर्वजगत्कर्त्रीति मन्यते । यथाहि –

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ।।
अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वये ।।
अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ।।
मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् ।

अमन्तवो मां त उपक्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि ।।
अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ।।
अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश ।।
अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे ।
ततो वि तिष्ठे भुवना नु विश्वोतामूं द्यां वर्ष्मणोपस्पृशामि ।।
अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव ।।

इति ऋग्वेदः (10 । 125 । 1–8)

अत्र यादृशं वाङ्निरूपणं दृश्यते तस्मात्तु सर्वत्र वागतिरिक्तं किमपि न विद्यते । अतो वागेव ब्रह्मेति कथनं समीचीनं भवति । अस्मात्तु चायमेवार्थो निर्गलितो भवति यद् वागेवात्मानं बहुधा विभज्य निखिलसृष्टिरूपा जायते ।

अयमेवाशयोऽन्यत्रापि दृश्यते –

वागेवार्थं पश्यति वाग् ब्रवीति
'वागेवार्थं निहितं सन्तनोति ।
वाच्येव विश्वं बहुरूपं निबद्धं
तदेतदेकं प्रविभज्योपभुङ्क्ते ।।' वाक्यपदीय (1 । 118) वृत्तावुद्धृतम् ।

अस्य मूलं कुत्र वर्तते , तत्तु न ज्ञायते, किन्तु तच्छ्रुतिवत् प्रतीयते ।

तथैव श्रुतिवदन्यद् वचनं वाक्यपदीयस्य वृत्तौ (1 । 120) प्राप्यते–

'वागेव विश्वा भुनानि जज्ञे वाच इत्सर्वममृतं यच्च मर्त्यम् ।
अथेद्वाग् बुभुजे वागुवाच पुरुत्रा वाचोन पदं यच्च नाह ।।' इत्थमेतद् वेदप्रतिपाद्यं वाक्तत्त्वमोमिति कृत्वोपनिषदि निरूपितम् । तदेव परब्रह्मस्वरूपं तदेव चाक्षरब्रह्मेति । तदक्षरब्रह्मैव जगदिदमिति । तथाहि–

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् ।
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ।।
इति कठोपनिषद् (1 । 2 । 16) ।

अन्यत्रापि चोपनिषदि 'ओम्' इति ब्रह्मस्वरूपमेव । तत एव समग्रं नामरूपात्मकं जगदुत्पद्यते । यथा हि–

'ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव । यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव ।
'सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पत्' इति माण्डूक्योपनिषद्–1, 2 ।'

श्रीभद्भगवद्गीतायामपि 'कि तद् ब्रह्म?', (8 ।1)इति पार्थस्य प्रश्नस्योत्तरं भगवता श्रीकृष्णेन स्वयमेव 'अक्षरं ब्रह्म परमम्' (8 ।2) इति कृत्वा दत्तम् । इत्थं ज्ञायते यद् वैदिकपरम्परायामेवेदमपि वर्तते यत् तत् परं ब्रह्म, 'अक्षरब्रह्मै'वेति ।अनेन प्रकारेण वेद एव निरूपयति यत् संसारोऽयं शब्दब्रह्मात्मकः परब्रह्मण उत्पन्नः । तत्परं ब्रह्म निरञ्जनमनिर्वचनीयं चेति । अपि च वेद एव निरूपयति यत् शब्दब्रह्मात्मकः संसारोऽयं परशब्दब्रह्मण एवोत्पन्नः । तत्तु ब्रह्म सूक्ष्मतत्त्वाक्षरमेवेति । अनयोर्द्वयोः पक्षयोर्वैदिकं व्याख्यानं भर्तृहरिणा स्वकीये वाक्यपदीयग्रन्थे शब्दब्रह्मनिरूपणे विस्तारितम् । तथाहि–

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।। वाक्यपदीयम् 1 । 1

अत्र भर्तृहरिणा पूर्वोक्तयोर्द्वयोः पक्षयोर्विन्यासः सुविहितः ।

प्रथमः पक्षो यथा–'ब्रह्म' अनादिनिधनमिति । यतो यदक्षरं शब्दतत्त्वमिति विवर्तते । ततः शब्दतत्त्वतोऽर्थभावेन जगतः प्रक्रिया विवर्तते भवतीत्यर्थः ।

तत्र द्वितीयः पक्षो यथा–यदक्षरं शब्दतत्त्वमिति तदेव अनादिनिधनं ब्रह्मेति । यतोऽर्थभावेन जगतः प्रक्रिया विवर्तते सम्भवतीत्यर्थः ।

इत्थं भर्तृहरिणा पूर्वस्थापितयोर्वैदिकमतयोर्द्वयोरपि पूर्वोक्त–कारिकायां शब्दब्रह्मविषयं निबन्धनं कृतम् । द्वयोर्मतयोर्माध्यमेन शब्दाद्वैतवा–दस्यैव विवेचनां भर्तृहरिः करोति । तत्र स कमप्यन्यपरं सिद्धान्तं न प्रतिपादयति । स तु पूर्वोक्तावेव सिद्धान्तौ स्वकौशल्येनोत्थाप्य सूचयति यदिदं जगत् परब्रह्मणः कार्यभूतं शब्दब्रह्मणो वा कार्यभूतमिति । इदं कार्यभूतं जगत् तद्वदेव नित्यं सत्यं चेति ज्ञेयम् । नित्यकारणादुत्पन्नं जगन्नित्यमेव भवितुं शक्नोति । भर्तृहरिणा सृष्टिविषये विवर्तशब्दः परिणामशब्दश्चेति शब्दद्वयं प्रयुक्तम् । व्याकरणस्य दृष्टौ विवर्तपरिणामयोरर्थैकता दृश्यते । विपूर्वक 'वृतु' वर्तने धातोर्घञप्रत्ययेन विवर्तपदं निष्पद्यते । तथा च 'परि' पूर्वक 'णम' प्रह्वत्वे धातोर्घञप्रत्ययेन परिणामशब्दो निर्मीयते । अनेन तु द्वयोरर्थः कामपि परिवर्तितां स्थितिमेवावबोधयति । परिवर्तिता स्थितिः कश्चिद् विकार एव भवति । अमरकोशे परिणामशब्दो विद्यते किन्तु विवर्तशब्दो न तत्र विद्यते । विवर्तशब्दः कालान्तरे 'मिथ्या' इत्यर्थे चारूढः प्रतीयते । भर्तृहरिणा विवर्तपरिणामशब्दौ केवलं परिणामार्थे प्रयुज्येते । यथा हि एकस्मिन्नेव स्थाने तेन तौ द्वौ शब्दौ प्रयुक्तौ–

शब्दस्य परिणमोऽयमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममेतद्विश्वं व्यवतर्त ।।

(वाक्यपदीयम्–1 । 20)

अत्र परिणामविवर्तशब्दाभ्यां सृष्टिरुत्पत्तिर्वेति ग्राह्यम् । तथैव च 'अनादिनिधनमित्यत्रापि' 'विवर्तते' इत्यनेन 'उत्पद्यते' इत्येव ग्राह्यं भवति। किन्तु कैश्चिट्टीकाकारैर्वेदान्तदिशा तत्र विवर्तपरिणामशब्दयोर्व्याख्यानं कृतम् । तत्तु नोचितं प्रतीयते। व्याकरणं तु शब्दस्य नित्यतां व्यवहारे व्यवहारेतरेऽपि स्वीकरोत्येव। यथाहि वार्तिककारः–'सिद्धे शब्दार्थसम्बन्धे' इति । लोकतः शब्दस्य नित्यता सिद्धा भवति । अतो व्याकरणे वेदान्तसिद्धान्तानां व्याख्यानं कदापि न सार्थकमिति मन्ये। 'विवर्तते' इत्यस्यार्थः प्रकाशते * इति

*द्रष्टव्यम्– अय्यरमहोदयकृतः 'भर्तृहरिः' इति।

ये वदन्ति तेऽपि व्याकरणविरोधिमतमुपस्थापयन्ति। यतो हि व्याकरणनये शब्दोऽर्थस्य प्रकाशको न वर्तते, अपितु शब्दो व्यवहारे साक्षाद् वाचक एवार्थस्य भवति। वाच्यवाचकसम्बन्ध एव नित्यः, शब्दार्थयोरन्यः कोऽपि लक्ष्यलक्षकादिसम्बन्धस्त्वनित्य एव। कुत्रचित् तादृशः सम्बन्धो भवति कुत्रचिद् न भवति। स तु गौण एव। अतो व्याकरणे मुख्यतया वाच्यवाचक सम्बन्ध एव स्वीक्रियते। अन्ये सम्बन्धाः केवलं वाच्यवाचकसम्बन्धे एव निमग्ना दृश्यन्ते। अतः शब्दोऽर्थस्य प्रकाशक इति तु व्याकरणविरुद्धं मतमवधेयम्। व्याकरणनये शब्दार्थयोरभेदो वर्तते। तथा सति कथं शब्दोऽर्थस्य प्रकाशक इति भवितुं शक्नोति। संसारदशायां तु शब्द एवार्थे विपरिणमते। प्रलयदशायां त्वर्थः शब्दे विपरिणमते इत्येव सृष्ट्युत्पत्तिविनाशक्रमो व्याकरणनये प्रसिद्धः। यथा हि–

ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।

विवृत्तं शब्दमात्राभ्यस्तास्वेव प्रविलीयते।। इति वाक्यपदीयस्य (1।1) वृत्तौ समुद्धृतम्। अस्याभिप्रायः– निखिलमपि चराचरं जगत् शब्दनिर्माणमिति। तत्तु ब्रह्मैव भवति। सर्वे रूपादयो विकाराः शब्दरूपतया निर्मीयन्ते। अनेन तु शब्दतत्त्वस्य ब्रह्मणः प्रकृतिरूपेणार्थेष्वनुगमो दृश्यते। शब्दो दिक्कालादिस्वशक्त्या अर्थस्य स्थितिप्रवृत्तिनिवृत्तिविभागान् करोति। अर्थस्य शब्दे एव स्थितिः, शब्दादेव तस्य प्रवृत्तिः, शब्दे एव तस्य निवृत्तिर्लय इति बोध्यम्। अतो जगत्शब्दब्रह्मयोरभेदो विभाति। व्यवहारे शब्दो यदि वाचकार्थे प्रकाशक इति गृह्यते तदा कापि हानिर्न दृश्यते। यदि वाचकाद् भिन्नः प्राकाशकस्यार्थो गृह्यते तदा तु शब्दाद्वैतवाद एव स्थिरो न भविष्यति। व्यवहारे तु प्रकाशकप्रकाश्ययोर्मध्ये भेदः स्फुट एव। यथा दीपेन दीपातिरिक्तवस्तु प्रकाश्यते। व्यवहारे दीपः तत्प्रकाश्यवस्तु च पृथक् पृथक् वर्तते। किन्तु शब्दार्थयोस्तादृशी स्थितिर्नास्ति। व्यवहारे परमार्थे च सर्वत्रैव शब्दोऽर्थ एव अर्थश्च शब्द एवेति व्याकरणनये शब्दशक्तिनिबन्धनेन सिद्धं भवति। शब्दार्थसम्बन्धानां नित्यत्वप्रतिपादने तु भर्तृहरिकृतेऽपि परं बन्धनं विद्यते। तेनापि

निगदितम्–

नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः ।
सूत्राणां सानुतन्त्राणां भाष्याणां प्रणेतृभिः ।।

इति वाक्यपदीयम् (1।23).

भर्तृहरिणा यदुक्तम्–न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।इति वाक्यपदीयम् (1। 123)। अत्र भासते 'इत्यनेन प्रतिपद्यते भाषते उत्पद्यते, बुध्यते इति ज्ञेयम। वेदान्तदिशा तस्य ग्रहणं नोचितमिति ।व्याकरणस्य दार्शनिकावबोधो व्याकरणमाध्यमेनैव कर्तव्यः ।तस्यावबोधोऽन्यैदार्शिनिकसिद्धान्तैर्न कर्तव्य इति। अन्यथा तद्विसङ्गतिस्तु दुर्वारैव भविष्यति ।भर्तृहरेः समयं यावत् व्याकरणदर्शनस्यानेकमतानि प्रचलितानि आसन्। तेषां विवरणं भर्तृहरिणा वाक्यपदीये स्थले स्थले सङ्केतिम्, इति तु वाक्यपदीयस्य सूक्ष्मावलोकनेन ज्ञायते ।तस्मात्तु पाठकस्य समक्षं भ्रमो जायते यत् किं भर्तृहरेरभिप्रेतं किञ्चानभिप्रेतमिति । तथैव किं च तत्र प्राचीनानां सम्मतं किं चार्वाचीनानामभिमतमिति कठिनतया निश्चितं भवति । पुनरपि व्याकरणदर्शनस्य शब्दब्रह्मविषयकं तथ्यं सारेण प्रस्तूयते तथा च तस्य वैज्ञानिकतापि आधुनिकविज्ञानसन्दर्भे विचार्यते।

भर्तृहरिणा ब्रह्मजगद्विषयकाः प्रमुखसिद्धान्ता वाक्यपदीयस्य ब्रह्मकाण्डस्य चतसृषु प्रारम्भिककारिकासु प्रतिपादिताः ।त एव व्याकरण–दर्शनस्य वेदसम्मता भर्तृहरिसम्मताश्च प्राचीनाः सिद्धान्ता वर्तन्ते ।तेषामेव विवरणं भर्तृहरिणा शेषे ब्रह्मकाण्डे मतान्तरोपन्यासपूर्वकं विहितम् । वाक्यपदीयस्य प्रारम्भे वर्णिता ब्रह्मजगद्विषयका सिद्धान्ता अधोलिखिताः सन्ति ।

1–(क) परमतत्त्वं ब्रह्म अनादिनिधनं वर्तते । यतः शब्दतत्त्वमक्षरतत्त्वमोङ्कारतत्त्वं यद् वेदस्य सूक्ष्मतत्त्वमिति निगद्यते,

तस्योत्पत्तिर्भवति । ततस्तु निखिलमपि चराचरजगदुत्पद्यते ।

अथवा

(ख) अनादिनिधनं परमतत्त्वं यद् ब्रह्म, तच्छब्दतत्त्वमेव तदेव चाक्षरतत्त्वमिति । तत एव सम्पूर्ण वाच्यवाचकभावापन्नं शब्दात्मकं जगदुत्पद्यते । तथाहि–'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।1।।

2–तत् परं तत्त्वमेकमेव किन्तु तदेवात्मानं कालादिविविधशक्ति–संश्रयेणानेकरूपेषु सृजति । तत्तु शक्त्यभिन्नमेव पुनरपि व्यवहारे पृथक्त्वेन वर्तते । तथा हि–'एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात् । अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते ' ।।2।।

3–तत् परं तत्त्वं कालशक्तेराश्रयादेव जन्मादिविकारवत् प्रतीयते। तथाहि–'अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः' ।
जन्मादयो विकाराः षड् भावभेदस्य योनयः' ।। 3।।

4–परं तत्त्वमेकमेव तिष्ठति । किन्तु तत् तु सर्वबीजं वर्तते । तदेवात्मानं भोक्तारं भोग्यं भोगरूपं चेति करोति । तथाहि –

'एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः' ।।4।।

भर्तृहरिरुद्घोषपूर्वकं कथयति यत् संसारोऽयं शब्दब्रह्मणः कार्यमिति मया यदुक्तम् , तत् कपोलकल्पनामात्रं नास्ति, अपितु वेदविदुषां वचनमिति । तथाहि –

'शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममेतद्विश्वं विवर्तते ।।' वाक्यपदीयम्–1।120

ततः तत् परं तत्त्वं ब्रह्मेति, शब्दात्मकमितिचात्र किं मानमिति विचार्यते । यतोहि परब्रह्मणो जातं विश्वमिदं शब्दात्मकं वर्तते । अतः कारणस्वरूपं परं ब्रह्मापि शब्दात्मकं भवितुं योग्यमिति वाच्यम् ।

भवतु नाम तत् परं ब्रह्मतत्त्वं शब्दात्मकमशब्दात्मकमिति । तत्र तु

कापि हानिर्नास्ति । शब्दादेवायं संसारो जात इत्यस्माकं वेदप्रतिपाद्यं प्राचीनं वैज्ञानिकं तथ्यं सुतरामाधुनिकभौतिकविज्ञानानुमतं विद्यते ।

आधुनिकभौतिकविज्ञानस्यापि जगदुत्पत्तिविषयक एकः पक्षोऽस्ति । यथाहि–परमशक्तिमत् किमपि परं तत्त्वमासीत् । तस्मिन् महास्फोटो जातः । तस्मान्महास्फोटादयं संसार उत्पन्न इति । तत् परं तत्त्वमनेककृत्वो विभक्तम् । तद्विभजनमेवेदं विश्वं दृश्यते । अयं चाधुनिकभौतिकविज्ञानस्य सिद्धान्तो विश्वोत्पत्तेर्महानादसिद्धान्तरूपेण (बिगबैंग थ्योरीतिरूपेण) वैज्ञानिकेषु प्रतिष्ठितो वर्तते। आधुनिकवैज्ञानिकानां यो 'महानादो' विश्वोत्पत्तेः कारणं वर्तते, स त्वस्माकमोङ्कारतत्त्वमेव यद्वेदप्रतिपाद्यं विद्यते । परं शब्दतत्त्वं स्फोटत्वेनापि व्याकरणनये हृदिस्थं स्वीकृतमेवास्ति । अतः शब्दादिदं विश्वं शब्दात्मकमेव प्रपञ्चितमिति व्याकरणस्य वेदविहितसिद्धान्तो विज्ञानसम्मत एव प्रतीयते । आधुनिकविज्ञानं तु केवलं जगदुत्पत्तिपक्षे जगतः कारणभूतं महानादं चिन्तयति, किन्तु अस्माकं वेदमूलकं व्याकरणदर्शनं महानादात्मकं जगत् सम्यग्विचिन्त्य महानाद–भूतपरब्रह्मणि लीनाय चान्ततो लोकमुपदिशति । इदं वेदात्मकं विश्वं शब्दात्मकं विद्यते । शब्दस्य साधुत्वविवेको व्याकरणेन सम्भाव्योऽस्ति । अतो वेदभूतशब्दात्मकजगतः साधुत्वासाधुत्वं विविच्य तत्सर्वं सम्यग् ज्ञात्वा च शब्दचिन्तनेन विगलितसुखदुःखमोहचेताः शान्तमनाः सर्वत्र शब्दब्रह्मानुभवन् ब्रह्मलोकेऽस्मिन् संसारे महीयते । तथा च स परं ब्रह्म यच्छब्दात्मकमस्ति तदवाप्नोति । यथा श्रुतिः –

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।। इति मैत्र्युपनिषत् (6/22) ।

व्याकरणमपि शब्दब्रह्मेत्युच्यते । तथाहि –

यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते ।
तद् व्याकरणमागम्य परं ब्रह्माधिगम्यते ।। इति वाक्यपदीयम् (1/22) ।

अर्थाद् यत् शब्दब्रह्म एकमेव प्रक्रियाभेदैबर्हुधा विभज्यते । तत्परं

शब्दब्रह्म व्याकरणं ज्ञात्वैव प्राप्यते । विना व्याकरणं शब्दब्रह्मणः प्राप्तिरेव नास्ति । अतो विद्वद्भिः तद्ब्रह्मसायुज्यप्राप्त्यर्थं व्याकरणमध्येयं पौनःपुन्येनेति भर्तृहरिणोपदिष्टम् ।

इत्थम् एकस्मिन् शाब्दिकपक्षे यत् स्वतन्त्रं किञ्चिद् ब्रह्मतत्त्वमस्ति, यतो नामरूपात्मकं निखिलं शब्दात्मकं जगत् विवर्तते, तदेव चापरस्मिन् शाब्दिकपक्षे शब्दब्रह्मत्वेनाङ्गी कृतम् । तच्च व्यवहारे द्विधा– 'परम्' 'अपरम्' चेति विभाव्यते । यतस्तद् 'ब्रह्मेति' शब्दवाच्यमेव भवति, अतस्तदपि शब्द ब्रह्मेति मतं वरमेव । पराद् यदपरं विवर्तते, तन्नित्यमेव । नियतेन भवम्, इति नित्यम् । 'त्यब्नेर्ध्रुव इति वक्तव्यम्' इति त्यप् । 'अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिभावेषु वर्तते । आभीक्ष्ण्येऽपि वर्तते' इति महाभाष्यकारः, 'सिद्धे शब्दार्थसम्बन्धे' इत्यत्र । आभीक्ष्ण्यं पौनःपुन्यम्, 'नित्यवीप्सयोः' (8 ।1 ।4) इत्यत्र 'उद्योते' नागेशः ।

[2]

पाणिनीये 'नित्य'पदविमर्शः

पाणिनिना प्रोक्तं पाणिनीयमिति। 'तेनप्रोक्तम्' (4 । 3 । 101) इति प्रोक्तार्थे तृतीयान्ताच्छप्रत्ययः 'वृद्धाच्छः' (4 । 2 । 114) इति। 'प्रकर्षेणोक्तं 'प्रोक्तमि'ति बालमनोरमा। ''प्रथमं प्रकाशितमिति प्रोक्तम्। न तु कृतम्। 'कृते ग्रन्थे' इत्यनेन गतार्थत्वात्। स्वयमन्येन वा कृतं व्याकरणम–ध्यापनेनार्थव्याख्यानेन वा प्रकाशितमित्यर्थः। प्रेति किम्, देवदत्तेनाध्यापितं प्रख्यातस्यैव ग्रन्थस्याध्यापनमिति नेहानेन प्रत्ययः।'' इति तत्त्वबोधिनी। तस्मात्तु पाणिनीयमित्यनेन पणिनिना प्रोक्तं व्याकरणशास्त्रमत्र गृह्यते। तच्छास्त्रम् 'अष्टाध्यायी' ग्रन्थरूपम्। तत्तु सूत्रात्मकमेव। शास्त्रशब्देन शास्त्रार्थो विधिनिषेधसमूह उच्यते। 'निदेशग्रन्थयोः शास्त्रम्' इत्यमरः। निदेश आज्ञा। शासनम्। निदिश्यते अनेन, इति वा । 'सर्वधातुभ्यःष्ट्रन्' (उ0 4 । 159) इति रामाश्रमी। इत्थममरोक्तवचनेन ग्रन्थशास्त्रयोरभेदः। पाणिनीये अष्टाध्यायी' शास्त्रे सूत्रेषु नित्यपदप्रयोगो बहु दृश्यते। तत्र विधिनिषेधप्रसङ्गेषु विविधसूत्रप्रयुक्तं नित्यपदं किञ्चित् स्वकीयं वैशिष्ट्यं लभते।

प्रथमं तावत् 'नित्यम्' इत्यस्य कोऽभिप्राय इति प्रस्तूयते। ''सततानारताश्रान्तसंततविरतानिशम्। नित्यानवरताजस्रमपि इत्यमरः। 'सततेत्यादि।। सन्तंन्यते स्म। तनु विस्तारे (त0उ0से0) क्तः (3 । 4 । 72) 'अनुदात्तोपदेश'..... (6 । 4 । 37) इति न लोपः। 'समो वाहिततयोः' (वा06 ।1 । 144) इति वा समो मलोपः। ।। (1)।। पक्षेसंततम् ।।4।। आङ्पूर्वो रमिविरामे। अविद्यमानमारतं यस्मिन् ।।2।। 'श्रमु तपसि खेदेच' (दि0प0से0) भावे क्तः (3 ।3 । 144) 'अनुनासिकस्य....' (6 ।4 । 15) इति दीर्घः। अविद्यमानं श्रान्तमत्र ।।3।। नास्ति विरतमस्या।(5)

निशाव्यापारराहित्यमुपचारात्। नास्ति निशास्मिन् ।।6।। नियमेन भवम्। 'त्यब् नेर्ध्रुवे' (वा04 ।2 ।104) ('नित्यं स्यात्संततेऽपि च ।शाश्वते त्रिषु') इति मेदिमी ।।7।। नास्त्यवरतं यत्र ।।8।। न जस्यति। 'जसु मोक्षणे' (दि0प0से0) 'नमिकम्पि.......' (3 ।2। 157) इतिरः। सततम्, अजस्रम, शब्दावव्ययावपि नित्यपर्यायौ स्तः। 'शश्वदभीक्ष्णं नित्यं सदा सततमजस्रमितिसातत्ये' इत्यव्ययप्रकरणे आपिशलिः ।।9।। नव निरन्तरस्य।'' इति रामाश्रमी। 'शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः' इत्यपि चामरः। शेति।। शश्वद्भवः। 'तत्रभवः' (4 ।3।53) इत्यण्। अनित्योऽव्ययानां टिलोपः, वहिषष्टिलोपवचनात् (वा0 4 ।1 ।85)इति ज्ञापकात्। 'अध्यात्मादित्वात् (ठञपि 'शाश्वतिकः' (2 ।4 ।9) इति निर्देशात् ।।1।। ध्रुवति। 'ध्रुवस्थैर्ये' (तु0प0से0)। 'इगुपध' (3 ।1।135) इति कः। 'ध्रुवो वटे। वसुयोगभिदोः शम्भौ शङ्कावुत्तान पादजे। स्थिरे (नित्ये) निश्चिते च ध्रुवं खेऽजस्रतर्कयोः।' इति हैमः ।।2।। नित्येति ।।....।।3।। सदाभवः। 'सनातनोऽच्युते। पितॄणामतिथौ रुद्रवेधसोः शाश्वते स्थिरे' इति हेमचन्द्रः ।।5।। पञ्चनित्यस्य। इति रामाश्रमी। इत्थमरकोषे निरन्तरस्य नव नित्यस्य च पञ्च पर्यायाः सन्ति। यतो हि निरन्तरशब्दोऽपि नित्यपर्यायो वर्तते। अतो द्वयोरभेदान्नित्यस्य चतुर्दशपर्याया अमरकोशे तूक्तदिशा निर्दिष्टाः सन्ति।

'सततं सन्ततमनिशं नित्यमजस्रं च शश्वदश्रान्तम्।
अविरतमनवरतं स्यादेकार्थमनारतमसक्तम् ।।'

इति हलायुधकोशे एकादश नित्यस्य पर्याया उल्लिखिताः। वाचस्पत्ये 'नित्यं सदा' इत्यपि चोक्तम्।

भानुजीदीक्षितमहोदयेन अमरकोशस्य रामाश्रमीटीकायां नियमेन भवं नित्यमिति स्वीकृतम्। 'नियतं भवं नित्यम्' इति महाभाष्यम्। निस् इत्यव्ययात् त्यप्। निस् त्य इति स्थिते, 'अव्ययानां भमात्रे टिलोपः' (वा0 4187), तेनेह सकारलोपाद् नित्यमिति। 'अव्ययात्त्यप्' (4 ।2 ।104)इत्यत्र

'त्यब्नेर्ध्रुव इति वक्तव्यम्' (वा02780) इति त्यप् । नित्यशब्दो विशेषणमव्ययं चेति मन्यते । प्रायो नित्यशब्दोऽयं । प्राधान्येन स्थिरेषु पदार्थेषु वर्तते । किन्तु लोके गौणत्वेन पौनःपुन्येऽपि वर्तते । तथा हि – 'अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते । किं तर्हि ? आभीक्ष्ण्येऽपि वर्तते । तद्यथा–नित्यप्रहसितो नित्यप्रजल्पित इति महाभाष्यकारः पस्पशाह्निके । अयमेवाभिप्रायो भाष्यकरेण भगवता पतञ्जलिना 'नित्यवीप्सयोः (8 ।1 ।4 ।) इत्यत्रापिप्रकटितम्–'अयमेष नित्यशब्दोऽस्त्येव कूटस्थेषु अविचालिषु भावेषु वर्त्तते । तद्यथा–नित्या द्यौः, नित्या पृथिवी, नित्यमाकाशमिति । अस्त्याभीक्ष्ण्ये वर्त्तते । तद्यथा । नित्यप्रहसितो नित्यप्रजल्पित इति । 'अभीक्ष्ण्यं तु क्रियापदप्रयोगसमधिगम्यं गौणोऽर्थः' इति प्रदीपेकैयटः । 'आभीक्ष्ण्यं पौनः पुन्यम्' इति तूद्योते नागेशः पौनःपुन्यशब्दो भृशार्थवाचकः प्रायोऽर्थवाचको वेति भवितुं शक्नोति ।

पाणिनिना सूत्रेषु कस्मिन्नर्थे नित्यशब्दः प्रयुक्त इति । तत्तत्सूत्रव्या. ख्यानपूर्वकं विचार्यते । यथा हि–

1. <u>तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् । (1 ।2 ।63)</u>तिष्यपुनर्वस्वोर्नक्षात्रविषये बहुवचन प्रसङ्गेद्वन्द्वसमासे द्विवचनमेव नित्यं स्यात् । उदितौ तिष्यपुनर्वसू दृश्येते । अत्र तिष्य एकः–पुनर्वसू च द्वौ नक्षत्रौ तेषां द्वन्द्वो बह्वर्थकः । अत्र बहुवचनं प्राप्तमस्ति किन्तु सूत्राद् द्विवचनमेव प्राप्तं भवति । तत्तु नित्यपदेन विधीयते । अत्र नित्यग्रहणेन पूर्वप्राप्तविकल्पनिवृन्तिरिति ।तस्मान्नित्यपदमत्र निश्चितार्थवाचकमिति । अत्र द्विवचनविधिर्निश्चीयते । एक वचनस्य माभूत्–तिष्यपुनर्वसु इदमिति । 'सर्वोद्वन्द्वो विभाषा एकवद्भवति' इत्यस्यैतदेव ज्ञापकम् । नित्यग्रहणं विकल्प निवृत्यर्थमिति काशिका ।

2. <u>त्यदादीनिसर्वैर्नित्यम् । (1 ।2 ।72)</u> त्यदादीनि सर्वैः सहवचने (सहोक्तौ)नित्यं शिष्यन्ते । अत्र सर्वग्रहणं साकल्यार्थमिति । स च देवदत्तश्चेति तौ । यश्च देवदत्तश्चेति यौ । 'त्यद् तद् यद् एतद् इदम् अदस्

एक द्वि युष्मद् अस्मद् भवत् किम्– इति त्यदादयः। अत्र च नित्यग्रहणं पूर्वप्राप्तविकल्पनिवृत्त्यर्थमिति। तस्मान्नित्यपदमत्र निश्चितार्थवाचकमिति। त्यदादीनामेकशेषो सदा भवतीति विधिर्निश्चीयते

3. <u>**नित्यं हस्ते पाणावुपयमने। (1।4।77)**</u> हस्ते पाणौ चेत्येतौ शब्दौ कृति परे गातिसंज्ञकौ नित्यं स्यातामुपयमने। उपयमनं दारकर्म विवाहो वेति। हस्ते कृत्य पाणौ कृत्येति। परिणीयेत्यर्थः। अत्र विभाषानिवृत्त्यर्थं नित्यग्रहणं भवति। तस्मान्निश्चितमित्यर्थेनित्यपदवाच्यो भवति। अत्र गतिसंज्ञकविधिः निश्चीयते। अत्र भाष्याभावः।

4. <u>**नित्यं क्रीडाजीविकयोः(2।2।17)**</u> क्रीडायां जीविकायां च नित्यं षष्ठी समस्यते स समासः तत्पुरूषो भवति। यथा–उद्दालकपुष्पभञ्जिका। क्रीडाविशेषस्य संज्ञा। 'संज्ञायाम्' (3।3।108) अत्र भावे धातोर्ण्वुल् उद्दालकः श्लेष्मातकः, तस्य पुष्पाणि, तेषां भञ्जनमित्यस्वपदविग्रहो भवति अर्थाद् उद्दालकपुष्पाणि भज्यन्ते यस्यां क्रीडायामिति। जीविकायामिति। दन्तलेखकः,दन्तानां लेखनेन जीवतीत्यस्वपदविग्रह–समासः। लिखेः कर्तरिण्वुल। अत्र नित्यपद– ग्रहणेन निषेधनिवृत्तिः, तस्माच्च निश्चितसमासविधिर्ज्ञायते। अर्थान्नित्यपदं निश्चितार्थवाचकमिति। किमिह नित्यग्रहणेनाभिसंबध्यते। विधिः, आहोस्वित् प्रतिषेधः? विधरित्याह। कुत एतत्? विधिर्हि विभाषा, नित्यः प्रतिषेधः, इति महाभाष्यम्।

5. <u>**नित्यं कौटिल्ये गतौ। (3।1।23)**</u> गत्यर्थकधातोः कौटिल्ये गम्ये यङ्प्रत्ययो नित्यं भवति कुटिलं क्रामति–चङ्क्रम्यते। दन्द्रम्यते। योऽल्पीयस्यध्वनि गतागतानि करोति स कुटिलां गतिं सम्पादयंश्चङ्क्रम्यते दन्द्रम्यते, इति चोच्यते। क्रियासमभिहारे तु भृशं क्रामतीत्येव। अत्र नित्यग्रहणं विषयनियमार्थमिति काशिका। अनेनात्रनित्यपदं निश्चितार्थवाचकमिति ज्ञेयम्। अत्रभाष्याभावः।

6. <u>**नित्यं पणः परिमाणे। (3।3।66)**</u> परिमाणविशेषे गम्ये, 'पणव्यवहारे स्तुतौ' इति धातोर्नित्यमप्प्रत्ययो भवति। मूलकपणः शाकपणः।

व्यवहाराय विक्रयाय वा मूलकादीनां यः परिमितो मुष्टिर्बध्यते तस्येदं नामेति। मूलकानां पणः, शाकानां पणः, इति विग्रहः। नित्यग्रहणं वानिवृत्यर्थमिति। तस्माान्नित्यपदं निश्चितार्थम्। अत्रभाष्याभावः।

7. **नित्यं ङितः। (3।4।99)** ङितो लकारस्य य उत्तमः तस्य सकारस्य नित्यंलोपो भवेत्। अपचाव, अपचाम, इति। नित्यग्रहणं विकल्पनि–वृत्यर्थमिति काशिका। अतोऽत्रापि नित्यपदं निश्चितार्थाभिधायि वर्तते। अर्थाल्लोपविधिः निश्चितं स्यादित्यर्थः। अत्र भाष्याभावः।

8. **नित्यं संज्ञा छन्दसोः। (4।1।29)** संज्ञायां छन्दसि च विषये अन्नन्ताद् बहुव्रीहेरुपधालोपिनो ङीप्प्रत्ययो नित्यं भवेत्। संज्ञायां यथा सुराज्ञी, अतिराज्ञीति नाम कश्चन ग्रामः।छन्दसि यथा गौः, पञ्चदाम्नीति। विकल्पनिवृत्तिर्नित्यपदात् तस्मान्नित्यपदान्निश्चितविधिः प्रतिपाद्यते। अर्थान्निश्चितं ङीब् भवतीत्यर्थः। भाष्याभावोऽत्र।

9. **नित्यं सपन्त्यादिषु। (4।1।35)** सपत्न्यादिषु तु पत्युर्नकारादेशो नित्यं स्यात्। तथा ङीप् चापि भवति। समानः पतिरस्याः सपत्नी। अत्र समानशब्द एकपर्यायः। पतिशब्दस्तु विवाहसम्बन्धेन भर्तृशब्दपर्यायः। तथैव एकपत्नी, वीरपत्नीति। विकल्पनिवृत्त्यर्थं नित्यवचनम्। तस्मान्नित्यपदं निश्चितार्थबोधनाय प्रयुक्तम्। ङीबिति निश्चितं भवेदित्यर्थः। भाष्याभावोऽत्र।

10. **नित्यं छन्दसि। (4।1।46)** बह्वादिभ्यश्छन्दसि विषये स्त्रियां ङीप्रत्ययो नित्यं भवेत्। नित्यशब्दो निश्चितार्थः।यथा–बह्वी, विभ्वी, प्रभ्वी चेति। अत्र भाष्याभावः।

11. **नित्यं वृद्धशरादिभ्यः।(4।3।144)** वृद्धेभ्यः प्रातिपदिकेभ्यः शरादिभ्यश्चाभक्ष्याच्छादनयोर्विकारावयवयोर्भाषायां विषये मयट्प्रत्ययो नित्यं स्यात् वृद्धेभ्यो यथा– आम्रमयम्। शरादिभ्यो यथा–शरमयम् 'शरदर्भमृत्कुटीतृणविल्वज' इति शरादिः। अत्र नित्यपदस्यार्थः निश्चितमिति। अर्थात् बृद्धशरादिभ्यां निश्चितं मयट् भवेत्।

भाष्याभावोऽत्रेति।

12. **त्रेर्मम्नित्यम्। (4।4।20)** 'ड्वितः क्त्रिः' (3।3।88) इत्ययं त्रिशब्दो गृह्यते त्रिशब्दात् संख्याशब्दोऽनभिधानात् तु न ग्राह्यः। सर्वत्र विवक्षितार्थस्यैव प्रतीतिर्भवति। अतः तृतीयान्तात् त्रिप्रत्ययान्तात् तु निर्वृत्तेऽर्थे नित्यमेव मप्प्रत्ययो भवति। यथा– डुकृञ्करणे कृत्रिमम्। डुपचष् पाकेपक्त्रिमम्। डुवप्बीजसंताने उप्त्रिमम्। नित्यग्रहणं स्वातन्त्र्य–निवृत्त्यर्थम्, तेन त्र्यन्तं 'नित्यं मप्प्रत्ययान्तमेव भवति, विषयान्तरे न प्रयोक्तव्यमितिकाशिकाऽभिप्रायो महाभाष्यसम्मत एव वर्तते नित्यग्रहणात् क्त्रिमर्मब्विषयः इति भट्टोजिदीक्षितः। भाष्यकारेणात्रातिसरलतया नित्यशब्दस्य प्रयोगेऽभिप्रायः प्रकटितः। यथाहि–नित्यं त्र्यन्तं मब्विषयमेव यथा स्यात्, केवलस्य प्रयोगो माभूत्, इति महाभाष्यम्। 'त्रेर्मब्नित्यवचनं विषयार्थम्' इत्यत्र वार्तिककारः। अत्र निश्चितार्थे नित्यमिति वेदितब्यम्।

13. **छेदादिभ्यो नित्यम्। (5।1।164)** छेदादिभ्यो द्वितीयान्तादेव नित्यमर्हतीत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवेत्। छेदं नित्यमर्हति छैदिको वेतसः। छेद भेद द्रोह वर्त कर्ष संप्रयोग विप्रयोग प्रेषण संप्रश्न विप्रकर्षविराग विरङ्ग चेति छेदादिः। अत्र भट्टोजिदीक्षितेन प्रसङ्गानुसारेण नित्यमाभीक्ष्ण्यमिति सिद्धान्तकौमुद्यां स्वीकृतम्। भट्टोजिदीक्षितस्योपरि पूर्वाचार्याणां प्रभावोऽत्र दृश्यते। सर्वप्रथमं काशिकाकारेण 'नित्यग्रहणं प्रत्ययार्थविशेषणम्' इत्युक्त्वा नित्यमाभीक्ष्ण्यमिति सङ्केतितम्। ततो नित्यग्रहणमहन्यहन्यर्हत्वात् 'तदर्हति' (5।1।62) इत्यस्यार्थस्य विशेषणं विज्ञायते, इतिन्यासकारः। अपर आह–आभीक्ष्ण्यो नित्यशब्दः, इति पदमञ्जरीकारः। भाष्यकारेण 'नित्यग्रहणमनर्थकम्' इति स्वीकृतम्। किन्तु काशिकादिषु तन्न मतमिति। अत्र नित्यपदं पौनःपुन्ये नवीनैः स्वीकृतम्।

14. **पन्थो ण नित्यम्। (5।1।75)** गच्छतीत्यस्मिन् विषयेऽर्थे वा द्वितीयान्तपथिन्शब्दान्नित्यं णः प्रत्ययो भवेत्। पथः पन्थ इत्ययमादेशो भवति। पन्थानं नित्यं गच्छति, इति पान्थो भिक्षां याचते। अत्रापि भाष्यकारेण

'नित्यग्रहणमनर्थकम्'इति स्वीकृतम्। किन्तु नित्यग्रहणमभीक्ष्ण्ये, इति भट्टोजिदीक्षितादीनां मतं ज्ञेयम्। नित्यग्रहणं प्रत्ययार्थविशेषणम्, इत्यत्रापि पूर्ववत् काशिकाकारेण स्वीकृतमेव। अतो नित्यमित्यत्राभीक्ष्ण्य एव।

15. <u>चित्तवति नित्यम् (5 । 1 । 89)</u> चित्तवति (चेतने) प्रत्ययार्थेऽभि-धेये वर्षशब्दान्ताद् द्विगोः प्रत्ययस्य नित्यं लुग् भवेत्, खस्य ठञश्चेत्यर्थः। द्विवर्षोदारकः, बालक इति। अत्र भाष्याभवः। 'पूर्वेण विकल्पे प्राप्ते वचनमिति काशिका। यदि चित्तवति प्रत्ययार्थे नित्यं लुग्भवति, 'वर्षस्याभविष्यति' (7 । 3 । 16) इत्यत्र यद् वक्ष्यति द्वेवर्षेअधीष्टो भृतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः, तद्विरुध्यते, नहि नित्ये लुक्यधीष्टभृतयोरुत्पन्नस्य प्रत्ययस्य चित्तवत्यभिधेये एवं रूपमुपपद्यते? नैष दोषः भूते एवोत्पन्नस्य प्रत्ययस्य चित्तवति नित्यं लुगिष्यते, न सर्वत्र, इति न्यासः। तत्र नित्यग्रहणं विशिष्टेऽर्थे नित्यं लुग् यथा स्यात्। स पुनर्विशिष्टोऽर्थो भूत एव, व्याख्यानात्, इति पदमञ्जरी। इत्थं नित्यमित्यत्र आभीक्ष्ण्यमिति ज्ञेयम्। तत्तु क्वाचित्कमिति । अत्र भाष्याभावः।

16. <u>उभादुदात्तो नित्यम् । (5 । 2 । 44)</u> उभयशब्दात् परस्य तयपोऽयजादेशो नित्यं भवेत्। स उदात्तोऽपि स्यादिति। उभयो मणिः। उभये देवमनुष्या इति। उभशब्दो यदि लौकिकी संख्या, ततः 'द्वित्रिभ्यां तयस्यायज्वा'(5 ।2 ।43) इत्यनेनैव विहितस्य तयप आदेशविधानार्थंवचनम्। अथ न संख्या ततो योगविभागेन तयपं विधाय तस्य नित्यमयजादेशो विधीयते, इति काशिका । अत्र नित्यपदं निश्चितेऽर्थे विद्यते। अत्र भाष्यकारेण नित्यपदस्य व्याख्यानं न कृतम्।

17. <u>नित्यं शतादिमासार्धमाससंवत्सराच्च । (5 । 2 । 57)</u> शतादिभ्यो मासार्धमाससंवत्सरेभ्यश्च परस्य डटो नित्यं तमडागमो भवेदिति। यथा शततमः शतस्यपूरण इति। तथैव सहस्रतमः, लक्षतम इति । मासतमो दिवसः मासस्यपूरण इति । तथैव अर्धमासतमः, संवत्सरतमश्चेति ।अत्र मासादयः संख्यावाचका न सन्ति, अत्र ज्ञापकादेव तेभ्यो डट् प्रत्ययो भवति । अत्र

नित्यपदं निश्चितार्थेऽस्ति । तमडागमो निश्चितमिति । भाष्याभावोऽत्र।

18. **एकगोपूर्वाट् ठञ् नित्यम्। (5 । 2 । 118)** एकपूर्वाद् गोपूर्वाच्च प्रातिपदिकाट् ठञ् प्रत्ययो नित्यं भवेदिति। यथा– ऐकशतिकः, एकशतमस्यास्तीति। तथैव ऐकसहस्रिकः, गौशतिक इति । नित्यग्रहणं पूर्वप्राप्तमतुपो बाधनाय, इति काशिका । 'नित्य ग्रहणं किमर्थम्? विभाषामा– भूत् । नैतदस्ति प्रयोजनम् । पूर्वस्मिन्नेवयोगे विभाषाग्रहणं निवृत्तम् । एवं तर्हि सिद्धे सति यन्नित्यग्रहणं करोति तज्ज्ञापयत्याचार्यः–प्रागेतस्माद्योगात् 'विभाषा' इत्यनुवर्तते, इति महाभाष्यकारः ।अतोऽत्रनित्यग्रहणं प्रायिकमिति चावगन्तव्यम् । तथा हि 'ऐकशतिकः' इति समानाधिकरणतत्पुरुषे ठञ्। अन्यत्र षष्ठीतत्पुरुषे –'एकशतवान्' इति मतुबेवेतिन्यासः।

19. **नित्यमसिच प्रजामेधयोः । (5 । 4 । 122)** नञ्दुः सु इत्येतेभ्यः पराभ्यां प्रजामेधाशब्दाभ्यां समासान्तोऽसिच् प्रत्ययो नित्यं भवति बहुव्रीहौ। यथा अप्रजाः, दुःप्रजाः, सुप्रजाः, अमेधाः, दुर्मेधाः, सुमेधाः, इति । ' नित्यग्रहणं किम् ।यावता पूर्वसूत्रेऽन्यतरस्यांग्रहणं नैव स्वर्यते। एवं तर्हि नित्यग्रहणादन्यत्रापि भवतीति सूच्यते –

श्रोत्रियस्येव ते राजन्!मन्दकस्याल्प मेधसः ।
अनुवाकहताबुद्धिर्नैषा तत्त्वार्थदर्शिनी !! –'इतिकाशिका, अत्र

नित्य पदस्यार्थो निश्चितमित्येव गृह्यते । अत्र भाष्याभावः।

20. **नित्यं स्मयते : । (6 ।1 ।57)** 'स्मिङ् ईषद्धसने' इतिधातोर्हेतुभयेऽर्थे णौ परतो नित्यमात्वं स्यादिति। यथा मुण्डो विस्मापयते, जटिलो विस्मा– पयते। नित्यग्रहणाद् विभाषेति निवृत्तम्, इति काशिका।अत्र भाष्यमप्राप्तम्। किन्तु नित्यपदं सूत्रकारेण निश्चितार्थे प्रयुक्तमिति मन्ये। आत्वागमो निश्चितमित्यर्थः।

21. **प्लुतप्रगृह्या अचि नित्यम् ।(6 ।1 ।125)** प्लुताः प्रगृह्याश्च अचि परतो नित्यं प्रकृत्या भवेयुः। देवदत्ता 3 अत्र आगच्छ ।यज्ञदत्ता3 इदमानयेति 'नित्यग्रहणं किमर्थम् ? विभाषा मा भूदिति। नैतदस्ति प्रयोजनम्। पूर्वस्मिन्नेव

योगे विभाषाग्रहणं निवृत्तम्। इदं तर्हि प्रयोजम्—प्लुतप्रगृह्याणामचि प्रकृतिभाव एव यथा स्यात्।'इति महाभाष्यम्। अनेन नित्यपदं निश्चितार्थे प्रयुक्तम त्रेति वेदितव्यम्। प्लुतप्रगृह्याणां निश्चितमयमेव प्रकृतिभाव इति।

22. <u>ञ्नित्यादिर्नित्यम्। (6।1।197)</u> ञिति निति च नित्यमादिरुदात्तो भवेदिति। यथा गार्ग्यः, वात्स्यः,'गर्गादिभ्यो यञ्'इति। अत्र वेतिनिवृत्त्यर्थं नित्यग्रहणम्। नित्यस्यार्थो निश्चितमिति आद्युदात्तार्थो निश्चीयते। भाष्याभावोऽत्र।

23. <u>नित्यं मन्त्रे। (6।1।210)</u> जुष्ट, अर्पित इत्येते शब्दरूपे मन्त्रविषये नित्यमाद्युदात्ते भवतः। जुष्टं देवानाम्। अर्पितं पितृणाम्, इति काशिका। अत्र विकल्पनिवृत्तिर्नित्यपदग्रहर्णेन भवति। तस्मान्नित्यपदस्यार्थो निश्चितमित्येव। आद्युदात्तविधिर्निश्चीयते। भाष्याभावोऽत्र।

24. <u>क्ते नित्यार्थे । (6।2।61)</u> क्तान्त उत्तरे नित्यार्थे समासे पूर्वपदं वा प्रकतिस्वरं भवति। यथा—नित्यप्रहसितः, सततप्रहसितइति। 'कालाः' (इति 2। 9। 28) कालवाचिनो द्वितीयान्ताः क्तान्तेन वा समस्यन्ते। द्वितीयासमासः। अत्र नित्यपदं निश्चितार्थं विहाय आभीक्ष्ण्येऽस्तीति ज्ञेयम्। नित्यशब्द आभीक्ष्ण्ये न कूटस्थे' इति न्यासः। भाष्याभावः।

25. <u>शितेर्नित्या बह्वज्बहुव्रीहावभसत्। (6।2।138)</u> शितेः परतोऽभसद् यद् बह्वज् नित्यं, बहुव्रीहिसमासे तत्प्रकृतिस्वरं भवेदिति। शितिपादः, शित्यंस इति । पादशब्दोऽत्राद्युदात्तः, वृषादिगणमध्ये पाठात्। अंसशब्दः प्रत्ययस्य नित्यत्वादाद्युदात्त इति ज्ञेयम्। शितेरितिकिम् ? दर्शनीयपादः। नित्यग्रहणं किम् ? शितिककुत्। ककुदस्यावस्थायां लोपो विधीयते। तत्रावस्थाया अन्यत्र शितिककुद् इति बह्वजुत्तरदं भवतीति तेन न नित्याबह्वच्। अबह्बजिति किम्। शितिललाटः बहुव्रीहाविति किम् ? शितेः पादः, शितिपादः अभसदिति किम् ? शिति भसत्। इति काशिका । 'अम रोगे' इति धातोः 'अमः सन्' (उ0 5।21) इति सन् प्रत्ययान्तोंऽसशब्दो व्युत्पाद्यते। सन् प्रत्ययस्य नित्यत्वादाद्युदात्त इति। नित्यपदमत्र

निश्चितार्थवाचकम् । भाष्याभावोऽत्र ।

26. <u>**शप्श्यनोर्नित्यम् । (7 ।1 ।81)**</u> शप्श्यन् इत्येतयोर्द्वयोः शतुरवयवस्य शीनद्योः परतो नुम् नित्यं भवेदिति । यथा– पचन्ती इति औङः श्यां नुमि रूपम् । कर्तरि शपि नित्यं नुम् । दीव्यन्ती इति । दिवादिभ्यः श्यनि नित्यं नुमिति । नित्यग्रहणं वेत्यधिकारस्य निवृत्त्यर्थम् । अपि च नित्यार्थमेव । 'तत्र आरम्भसामर्थ्यान्नित्योविधिर्भविष्यति ।तदेतन्नित्यग्रहणं सांन्यासिकं तिष्ठतु तावत्' इति महाभाष्यम् । 'सांन्यासिकमिति । पूर्वसूत्रे वा ग्रहणानुवृत्तौ तात्पर्यग्रहणार्थं तदावश्यकमिति भावः । अन्यथासामर्थ्येनास्यैव वैकल्पिकत्वंस्यादिति बोध्यम्' इति उद्योते नागेशभट्टः । संन्यासः प्रयोजनमस्येति सांन्यासिकः ।

27. <u>**अचस्तावत् थल्यनिटो नित्यम् । (7 ।2 ।61)**</u> तासौ ये नित्यानिटो धातवोऽजन्ताः तासाविव तेभ्यः थलीडागमो न भवेत् । याता–ययाथ । चेता–चिचेथ । नेता –निनेथ । होता–जुहोथ । अत्र नित्यपदेन 'नित्य एव प्रतिषेधः' इत्यर्थावबोधनं जायते ।तस्मान्नित्यमिति निश्चितमित्यस्य वाचकं भवति । अत्र भाष्याभावः ।

28. <u>**नित्यं छन्दसि । (7 ।4 ।8)**</u> चङ्युपधाया ऋवर्णस्य ऋकारादेशश्छन्दसि णौ नित्यं भवेदिति । अवीवृधत् । अवीवृधताम् । अवी–वृधन् । अत्र नित्यमिति पूर्वसूत्रे वेत्येतदनुवृत्तेर्विज्ञापनार्थम्,तथा चेह निश्चितार्थे प्रयुक्तम् । छन्दसि ऋकारादेशो निश्चीयते । अत्र भाष्याभावः ।

29. <u>**नित्यवीप्सयोः । (8 ।1 ।4)**</u> नित्ये चार्थे वीप्सायां च यद् वर्तते तस्य पदस्य द्विर्वचनं भवति नित्यमिति, 'तद्य आभीक्ष्ण्ये वर्तते तस्येदं ग्रहणम्' इति महाभाष्यम् । 'आभीक्ष्ण्यमिह नित्यता । आभीक्ष्ण्यं च क्रियाधर्मः । यां क्रियां कर्ता प्राधान्येनानुपरमन् करोति तन्नित्यम् । पचति पचति । जल्पति जल्पति । –––– द्विर्वचनापेक्षायामेव पौनःपुन्यप्रकाशने शक्तिः । व्याप्तिविशेषविषया प्रयोक्तुरिच्छा वीप्सा । ग्रामो ग्रामो रमणीयः । पुरुषः पुरुषो निधनमुपैति' इति काशिका । अत्र नित्यपदं पौनःपुन्यार्थे प्रयुक्तः । पौनः

पुन्यंतु तु प्रायिकमेव ।

30. <u>**आतोऽटि नित्यम् (8 । 3 । 3)**</u> अटि परतो रोः पूर्वस्याकारस्य स्थानेऽनुनासिकादेशो नित्यं छन्दसि स्यादिति । 'अत्रानुनासिकः पूर्वस्यतु वा' (8 । 3 । 2) इत्यस्माद् अनुनासिकग्रहणम् । 'मतुवसो रुसंबुद्धौ छन्दसि' (8 । 3 । 1) इति छन्दसि अनुवर्तते । 'दीर्घादटि समानपाद इति रुत्वं वक्ष्यति' । ततः पूर्वस्यातोऽनुनासिक विकल्पे प्राप्ते नित्यार्थं वचनम् । महाँ असि । महाँ इन्द्रो य ओकसा देवाँ अच्छादीव्यत् । केचिदनुस्वारमधीयते । सच्छान्दसो व्यत्ययो द्रष्टव्यः ।' इति काशिका । 'महाँ इन्द्रः' । तैत्तरीयास्तु अनुस्वारमधीयते ।' इति सिद्धान्त कौमुदी । अत्र नित्यमाभीक्ष्ण्ये वर्तते ।

31. <u>**ङमो ह्रस्वादचि ङमुण् नित्यम् । (8 ।3 ।32)**</u> यो ङम् ह्रस्वात् परो वर्तते, तदन्तात् पदात् परस्याचो ङमुडागमो नित्यं भवेदिति । अत्र नित्यमिति आभीक्ष्ण्ये वर्तत इति मन्ये । आभीक्ष्ण्यमत्र प्रायिकमिति ज्ञेयम् । तथा हि– 'सनाद्यन्ता धातवः' (3 ।1 ।32), 'तिङ् ङतिङः' (8 ।1 ।28) इति । अत्र भाष्यकारेण भगवता पतञ्जलिना नित्यमधिकृत्य किमपि न लिखितम् । अस्मात् पूर्वं 'नित्यवीप्सयोः' (8 ।1 ।4) इत्यत्र तेन नित्यमिति 'स्थिरेषु आभीक्ष्ण्येऽपि इति कृत्वा विवेकः कृतएव । अतोऽन्यत्र कुत्रचिद् नित्यपदविवेके तस्य भगवतः रुचिर्नास्ति । प्रयोगानुसारं नित्यपदस्य सार्थकता पाणिनीयशास्त्रेऽवगन्तव्येति भाष्यकारस्याभिप्रायः । अत्र भाष्याभावः ।

32. <u>**नित्यं समासेऽनुत्तरपदस्थस्य । (8 ।3 ।45)**</u> इसुसोर्विसर्जनीयस्यानुत्तरपदस्थस्य षत्वं नित्यं भवेत् कुप्वोः परतः समासविषयप्राप्ते । यथा– सर्पिष्कुण्डिका, घनुष्कपालम् । अत्र नित्यपदं निश्चितार्थे विद्यते । समासेऽनुत्तरपदस्थस्य विसर्जनीयस्य निश्चितं षत्वमित्यर्थः ।.

33. <u>**वेः स्कभ्नातेर्नित्यम् । (8 ।3 ।77)**</u> वेः परस्य स्कभ्नातेः सकारस्य षकारादेशो नित्यं भवेत् । विष्कभ्नाति, विष्कम्भिता, विष्कम्भितुम्, विष्कम्भितव्यमिति । स्कभ्नोतेरित्यत्र केवलं धातुमात्रं विवक्षितम् ; न तु

श्नाविशिष्टं रूपमिति स्कभि प्रतिबन्ध इति वर्तमाने स्कभ्नाति इति ।'सौत्रोऽयं धातुरषोपदेशः । तत्सकारस्याप्राप्त एव मूर्धन्यो विधीयते वेरुत्तरस्य' इति न्यासः । अत्र तु विकल्पनिवृत्यर्थमेव नित्यग्रहणं कृतम् । तस्मान्नित्यमिति निश्चितार्थे प्रयुक्तम् । अत्र भाष्याभावः ।

इत्थं प्रमाणभूतेनाचार्यपाणिनिनास्वकीये शब्दशास्त्रे त्रयस्त्रिंशद् वारं नित्यशब्दः प्रयुक्तः । तत्र 'छेदादिभ्यो नित्यम्' (5 ।1 ।64), 'पन्थो ण नित्यम्'–(5 ।1 ।75), 'चित्तवति नित्यम्' (5 ।1 ।89), 'एकगोपूर्वाट्ठञ् नित्यम्' (5 ।2 ।118) , 'क्ते नित्यार्थे –(6 ।2 ।61), 'नित्यवीप्सयोः' (8 ।1 ।4) 'आतोऽटि नित्यम्' (8 ।3 ।3), 'ङमो ह्रस्वादचि ङमुण् नित्यम्' (8 ।3 ।32) इति सूत्रेषु नित्यशब्दः सर्वथा आभीक्ष्ण्ये अर्थात् पौनःपुन्ये क्वाचित्के वेत्यर्थे प्रयुक्तो वर्तते, शेषेषु सूत्रेषु नित्यशब्दो निश्चितार्थे (अविचालिभावे) प्रयुक्तो दृश्यते, इति तु प्रयोगसामर्थ्याद, अभिधानाद् वा विज्ञायते । वार्तिककारेण केवलं त्रिषुसूत्रेषु प्राप्तं नित्यपदं प्रति स्वकीयमभिमतं प्रकटितम् । तथा हि– 'त्रेर्मब्नित्यम्' (4 ।4 ।20) इत्यत्र 'त्रेर्मब्नित्यवचनं विषयार्थम्' इति वार्तिकम् अस्याभिप्रायस्तु मब्विषयमेव त्र्यन्तं नित्यं भवतीति । अत्र वार्तिककारस्य नित्यमिति निश्चितार्थे इति मतम् । 'छेदादिभ्यो नित्यम्' (5 ।1 ।64), 'पन्थो ण नित्यम्'(5 ।1 ।76) इत्यत्र 'छेदादिपथिभ्यो विग्रहदर्शनान्नित्य–ग्रहणानर्थक्यम्' इति वार्तिकमुक्त्वा नित्यग्रहणस्यनिरर्थकता स्वीकृता । तथैवात्र भाष्यकारेणापि छेदादिपथिम्यो नित्यग्रहणमनर्थकम्' इति प्रतिपादितम् । तिष्यपुनर्वसोरिति पूर्वोक्तेषु त्रयस्त्रिंशत्सूत्रेषु नित्यं हस्ते पाणावुपयमने (1 ।4 ।77) नित्यंकौटिल्येगतौ (3 ।1 ।23) नित्य पणः परिमाणे (3 ।3 ।66),नित्यं ङितः (3 ।4 ।99), नित्यं संज्ञाछन्दसोः(4 ।1 ।29), नित्यं सपत्न्यादिषु (4 ।1 ।35,) नित्यं छन्दसि (4 ।1 ।46), नित्यं वृद्धशरादिभ्यः(4 ।3 ।144), चित्तवति नित्यम् (5 ।1 ।89), नित्यं शतादिमा–सार्धमाससंवत्सराच्च (5 ।2 ।57), नित्यमसिच् प्रजामेधयोः (5 ।4 ।122), नित्यं स्मयतेः (6 ।1 ।57), प्लुतप्रगृह्या अचि नित्यम् (6 ।1 ।125) ञ्नित्यादिनित्यम्

(6 |1 |197), नित्यं मन्त्रे (6 | 1 |210), क्ते नित्यार्थे (6 |.2 | 61), शितेर्नित्या– बह्वज्बहुव्रीहावभसत् (6 |2 |138), अचस्तावत् थल्यनिटो नित्यम् (7 |2 |61) नित्यं छन्दसि (7 |4 |8), वेः स्कभ्नातेर्नित्यम् (8 |3 |77), इति सूत्राणां भाष्यमेव न प्राप्यते। तथा च तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वेबहुवचनस्य द्विवचनं नित्यम् (1 | 2 | 63), त्यदादीनि सर्वैर्नित्यम् (1 | 2 | 72), उभादुदात्तो नित्यम् (5 | 2 | 44), एकगोपूर्वाट्ठञ् नित्यम् (5 | 2 | 118), ङमो ह्रस्वादचि ङमुण् नित्यम् (8 | 3 | 32), नित्यं समासेऽनुत्तरपदस्थस्य (8 | 3 | 45), इति सूत्रेषु भाष्यं प्राप्यते, किन्तु भाष्यकारेण सूत्रगतं नित्यमिति न विवेचितम्। तथाचत्रेर्मम्नित्यम् (4 | 4 | 20), शप्श्यनोर्नित्यम् (7 | 1 | 81) इत्यत्र भाष्ये भाष्यकारेण नित्यमितिनिश्चितार्थेस्वीकृतम्। केवलं नित्यवीप्सयोः (8 | 1 | 4) इत्यत्र भाष्यकारेण नित्यमिति आभीक्ष्ण्ये, इति पठितम्। येषु नित्यशब्दयुतेषु सूत्रेषु भाष्यं न प्राप्यते अपि च यत्र वार्तिककारेण भाष्यकारेण च नित्यस्य निरर्थकता प्रतिपादिता तत्रापि काशिकादौ परवर्तिग्रन्थे सूत्रप्रसङ्गानुसारेण नित्यशब्दस्य ग्रहणे सार्थकता स्वीकृता । तत्र नित्यशब्दस्य प्रासङ्गिकता कुत्रचिन्निश्चितविधिनियमने कुत्रचित्तु क्वाचित्कविधिनियमने प्रस्तुता ।

इत्थं पाणिनीयशास्त्रानुशीलनेन ज्ञायते यत् प्रामाणिकेन पाणिनिमुनिना स्वशास्त्रे नित्यमित्यस्य प्रयोगः कुत्रचिन्निश्चितार्थे कुत्रचित् क्वाचित्कार्थे च नित्या पृथिवी,नित्यं खादतीति लोकव्यवहारदृशैव कृतः। सूत्रेषु सर्वत्र प्रयुक्तो नित्यमिति सर्वथा सार्थकमस्ति। कदाचिद् नित्यमिति निषेधं व्यावृत्य निश्चितविधिः, कदाचिद् विभाषां निवृत्य निश्चितविधिः, कदाचित् परसूत्रस्थविभाषामाकृष्य स्वस्मिन्निश्चितविधिः, कदाचित् पूर्वसूत्रस्थविभाषामाकृष्य क्वाचित्कविधिरिति संस्थाप्य निजस्य सार्थकतां सूत्रेषु व्यनक्ति।यद्यपि भगवता पतञ्जलिना कुत्रचित् सूत्रे नित्येत्यस्य व्याख्यानं न कृतम्, कुत्रचित् तस्य निरर्थकता च स्वीकृता। अस्माद् भाष्यकारेण सूत्रेषु प्रयुक्तं नित्यं प्रति प्रायोऽरुचिरेवोद्भाविता पुनरपि

महर्षिपाणिनिना सूत्रेषु यद् नित्येति सुनियोजितंतद् बहुप्रयोजनमूलकं प्रतिभाति । तथैव कैयटादिनाभाष्यकारप्रतिख्याने 'छेदादिभ्यः' इत्यत्र प्रदीपादौविमतिं
विधाय नित्येत्यस्य सार्थकता संसाधितेति ।

❑

[3]

नञर्थसमीक्षा

'नञ्' इत्यव्ययम् । तत्तु निषेधात्मकमिति मन्तव्यम् । अमरकोशे 'नञ्' इति न वर्तते । तथा हि – 'अभावे नह्य नो नापि' इत्यमरः । अर्थाद् 'नहि' 'अ' 'नो' 'न' इति चत्वारि पदानि अभावार्थे सन्ति । सम्भवतः 'अ' इति नञ् स्थानिकमिति । तथा हि 'नञोऽयमकारः' इति रामाश्रमीटीकायां भानुजिदीक्षितः । 'अ' इत्यस्य अभावव्यतिरिक्ता अन्येऽर्था अपि भवन्त्येव । तथा हि – 'अ स्वल्पार्थेऽप्यभावेऽपि' इति हैमः । अपि च –'अशब्दः स्यादभावेऽपि स्वल्पार्थप्रतिषेधयोः । अनुकम्पायां च तथा वासुदेवे त्वनव्ययः ।' इति मेदिनी । 'न लोपो नञः' (6 ।3 ।73) इत्यस्यबलेनैव योगविभाद् असमासेऽपि नञो नस्य लोपो भवति, किं 'नञो न लोपस्तिङ्क्षेपे' इतिवार्तिकेनेति । वस्तुतः 'नञ्' इति शब्दशास्त्रस्य पारिभाषिकः शब्दोऽस्ति । यस्य प्रयोगः प्रायः समासे एव भवति । 'नञ्' (2 ।2 ।6) नञ् सुपा सह समस्यते, इति । समासे क्वचिद् नञो नस्य लोपाद् नुडागमोऽपि भवति, 'तस्मान्नुडचि' (6 ।3 ।74) इति । अस्यार्थः – तस्माद् लुप्तनकाराद् नञः नुडागमो भवति अचिपरे । अर्थात् 'नञ्' यदा अजन्तोत्तरपदेन समस्यते तदा नञ्स्थाने 'अन्' इति प्राप्यते । न अश्वः, अनश्व इति । 'नञ्' इत्यत्र 'ञ्' इत्संज्ञकः, लोपश्च, 'हलन्त्यम्' (1 ।3 ।3) इति । ञकास्य सार्थकता 'न लोपोनञः' (6 ।3 ।73) इत्यत्र विशेषणार्थत्वेनाङ्गीक्रियते । तथा हि – 'नञ् । इह 'न लोपोनञः' इत्यत्र विशेषणार्थो ञकारःतत्फलं च नैकधेत्यत्रालोपः 'अव्यये नञ्कुनिपातानाम्' इत्यव्ययपूर्वपदप्रकृतिस्वरार्थं ञकारोच्चारणमित्यन्ये ।' इति तत्वबोधिनी । भगवता पतञ्जलिना 'न लोपोनञः' (6 ।3 ।73) इत्यत्र सानुबन्धकस्य नञो ग्रहणं विस्पष्टार्थं मन्यते । तथा हि – 'किमर्थं नञः सानुबन्धकस्य ग्रहणं क्रियते, न 'नस्य', इत्येवोच्येत? नस्य इतीयत्युच्यमाने

'कर्णपुत्रः – पर्णपुत्रः' इत्यत्रापि प्रसज्येत। नैष दोषः। 'अर्थवद्ग्रहणे नानर्थकस्य' इत्येवमत्र न भविष्यति। एवमपि 'प्रश्नपुत्रः – विश्नपुत्रः' इत्यत्रापि प्राप्नोति। नैष दोषः। अननुबन्धकग्रहणे न सानुबन्धकस्य इत्येवमस्य न भविष्यति। एवमपि 'वामनपुत्रः– पामानपुत्रः' इत्यत्रापि प्राप्नोति। तस्मात् सानुबन्धकग्रहणं कर्तव्यम्।' इति भाष्यम्। अतः सानुबन्धकस्य नञो ग्रहणं सार्थकमिति। अन्यथा 'नस्य' इति ग्रहणेन बह्वनर्थो भविष्यतीति। कुत्रचिद् नञो नकारः समासेऽपि न लुप्यते । यथा– न सत्या असत्या न असत्या 'नासत्याः' इति। एवं नमुचिः, नकुलम्, नखमित्यादयः ,'नभ्राण्नपान्न वेदानासत्यानमुचिनकुलनखनपुंसक नक्षत्रनक्रनाकेषु प्रकृत्या (6 |3 |75) इति।

मुख्यतोऽभावे 'नञ्' वर्तते, इति पूर्वमेव अमरकोशवचनमुद्धृतमेव। किन्तु यदा 'नञ्' सुपा सह समस्यते तदा त्वन्येषां शब्दानां संहितां प्राप्य तस्यनानार्थकत्वं संभवति। 'एकश्चशब्दो बह्वर्थः। तद्यथा – अक्षाः पादा माषाः, इति। भगवता पतञ्जलिना 'भूवादपो धातवः' (1 |3 |1) इत्यत्र प्रतिपादितमेव। यद्यपि व्याकरणं शब्दस्यार्थनिर्धारणं न करोति, अर्थस्य निर्धारणं तु शिष्टानां प्रयोगेषु भवति, पुनरपि व्याकरणं शिष्टप्रयुक्तार्थानुरूपं शब्दं व्युत्पाद्य तस्यार्थस्वरूपं निर्वाचयति।

भगवता पतञ्जलिना 'नञ्' (2 |2 |6) इत्यत्र नञ्समासव्याख्यान प्रसङ्गे नञ्विषयकविविधपक्षनिरूपणपूर्वकंनञर्थोविचरितः। तथा हि – 'किं प्रधानोऽयं समासः? उत्तरपदार्थप्रधानः। यदुत्तरपदार्थप्रधानः, अब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोति। अन्यपदार्थप्रधानस्तर्हि भविष्यति, यदि अन्यपदार्थप्रधानः 'अवर्षा हेमन्तः इति हेमन्तस्य यल्लिङ्गं वचनं च तत्समासस्यापि प्राप्नोति। पूर्वपदार्थप्रधानस्तर्हि भविष्यति। यदि पूर्वपदार्थप्रधानः अव्ययसंज्ञा प्राप्नोति। अव्ययं ह्यस्य पूर्वपदमिति। नैषदोषः पाठेनाव्यय संज्ञा क्रियते । न च नञ्समासस्तत्र पठ्यते । यद्यपि नञ्समासो न तत्र पठ्यते नञ् तु पठ्यते । पाठेनाव्ययसंज्ञायां

सत्यामभिधेयवल्लिङ्गवचनानि भवन्ति। यश्चेहार्थोभिधीयते न तस्य लिङ्गसंख्यायां योगोऽस्ति। नेदं वाचनिकमलिङ्गता असंख्यता वा। किं तर्हि? स्वाभाविकमेतत्। तद्यथा – समानमिह मानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते। अपरे न। न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुम्, कश्चिद्वानर्थक इति सर्वैरनर्थकैः। तत्र किमस्माभिः शक्यं कर्तुम् – यन्नञः प्राक् समासालिङ्गसंख्याभ्यां योगो नास्ति, समासे च भवति। स्वाभाविकमेतत्।

अथवा आश्रयतो लिङ्गवचनानि भविष्यन्ति। गुणवचनानां हि शब्दानामश्रयतो लिङ्गवचनानि भवन्ति। शुक्लं वस्त्रम्, शुक्ला शाटी, शुक्लः कम्बलः, शुक्लौ कम्बलौ, शुक्लाः कम्बला इति यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिङ्गं वचनं च तद्गुणस्यापि भवति। एवमिहापि यदसौ द्रव्यं श्रितो भवति समासस्तस्य यल्लिङ्गं वचनं च तत्समासस्यापि भविष्यति।

ननु चोक्तम् – अब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोति–इति।

नैषदोषः इदं तावदयं प्रष्टव्यः – अथेह राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं कस्मान्न भवति? अस्त्यत्र विशेषः – राजाविशेषकः प्रयुज्यते, तेन एवं विशिष्टस्यानयनं भवति। इहापि तर्हि नञ्विशेषकः प्रयुज्यते। तेन नञ्विशिष्टस्यानयनं भविष्यति।

कः पुनरसौ?

निवृत्तपदार्थकः?

यदापुनरस्यार्थो निवर्तते। किं स्वाभाविकनिवृत्तिः, आहोस्विद्वाचनिकी?

किं चातः?

यदि स्वाभाविकी, किं नञ् प्रयुज्यमानः करोति?

अथ वाचनिकी। तद्वक्तव्यम्—नञ् प्रयुज्यमानः पदार्थं निवर्तयति—इति।

एवं तर्हि – स्वाभाविकी निवृत्तिः।

ननु चोक्तं किं नञ् प्रयुज्यमानः करोतीति।

नञ् प्रयुज्यमानः पदार्थं निवर्तयति। कथम्? कीलप्रतिकीलवत्। तद्यथा कील आहन्यमानः प्रतिकीलं निर्हन्ति।

यद्येतन्नञो माहात्म्यम्, स्याद् – न जातुचिद्राजानो हस्त्यश्वं बिभृयुः, नेत्येव राजानो ब्रूयुः।

एवं तर्हि स्वाभाविकनिवृत्तिः।

ननु चोक्तम् – किं नञ् प्रयुज्यमानः करोतीति।

नञ् निमित्ता तूपलब्धिः। तद्यथा समन्धकारे द्रव्याणां समवस्थितानां प्रदीपनिमित्तं दर्शनम्।

नच तेषां प्रदीपो निवर्तको भवति।

यदि पुनरयं निवृत्तपदार्थकः, ब्राह्मणशब्दः किमर्थं प्रयुज्यते?

एवं तथा विज्ञायेत – अस्य पदार्थो निवर्तते इति।

नेत्युक्ते संदेहः स्यात् – कस्यपदार्थो निवर्तत इति।

तत्रासंदेहार्थो ब्राह्मणशब्दः प्रयुज्यते। एवं चैतत्। अथवा सर्व एते शब्दा गुणसमुदायेषु वर्तन्ते। ब्राह्मणः क्षत्रियो वैश्यः शूद्र इति।

तपः श्रुतं च योनिश्चेत्येतद् ब्राह्मणकारकम्।

तपः श्रुताभ्यां यो हीनो जाति ब्राह्मण एव सः।।

तथा गौरः शुच्याचारः पिंगलः कपिलकेश इत्येतानप्यभ्यन्तरान्

ब्राह्मण्ये गुणान् कुर्वन्ति। समुदायेषु च वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते। तद्यथा पूर्वे पञ्चालाः। तैलं भुक्तम्। घृतं भुक्तम्। शुक्लो नीलः कपिलः कृष्ण इति। एवमयं समुदाये ब्राह्मणशब्दः प्रवृत्तोऽवयवेष्वपि वर्ततेजातिहीने गुणहीने च। गुणहीने तावत् – 'अब्राह्मणोऽयं यस्तिष्ठन् मूत्रयति।' 'अब्राह्मणोऽयं यस्तिष्ठन् भक्षयति।

जातिहीने संदेहाद् दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते। संदेहात् तावद् गौरं शुच्याचारं पिंगलं कपिलकेशं दृष्ट्वाध्यवस्यति ब्राह्मणोऽयमिति। तत्र संदेहाद् ब्राह्मणशब्दो वर्तते। जातिकृता चार्थस्य निवृतिः। दुरुपदेशाच्च। दुरुपदिष्टमस्य भवति–अमुष्मिन्नवकाशे ब्राह्मणस्तमानयेति। स तत्रगत्वा यं पश्यति तमध्यवस्यति। ब्राह्मणोऽयमिति। ततश्च पश्चादुपलभते नायं ब्राह्मणः, अब्राह्मणोऽयमिति निर्ज्ञातं तस्य भवति। तत्र दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते। जातिकृता चार्थस्य निवृत्तिः। अतश्च संदेहाद् दुरुपदेशाद् वा। न ह्ययं कालं माषराशिवर्णमापणे आसीनं दृष्ट्वाध्यवस्यति ब्राह्मणोऽयमिति निर्ज्ञातं तस्य भवति।

इदं खल्वपि भूय उत्तरपदार्थप्राधान्ये सति संगृहीतं भवति। किम्? अनेकमिति। किमत्र संगृहीतम्? एकवचनम्।

कथं पुनरेकस्य प्रतिषेधे बहूनां सम्प्रत्ययः स्यात्?

प्रसज्यायं क्रियागुणौ ततः पश्चान्निवृत्तिं करोति। तद्यथा – आसय, शायय, भोजय अनेकमिति।

यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रक्रियागुणौ प्रसज्येते। यत्र तु खलु पुनर्न प्रसज्येते तत्र कथम् – अनेकं तिष्ठतीति?

भवति चैवं जातीयकानामप्येकस्य प्रतिषेधेन बहूनां संप्रत्ययः। तद्यथा – न न एकं प्रियम्, न न एकं सुखमिति।

इहाब्राह्मणत्वमब्राह्मणता परत्वात् त्वतलौ प्राप्नुतः। तत्रको दोषः? **स्वरे हि दोषः स्यात्। अब्राह्मणत्वमित्येवं स्वरः प्रसज्येत। अब्रह्मणत्वमिति**

चेष्यते।

नञ् समासे भाववचने उक्तम्। किमुक्तम्? 'त्वतल्भ्यां नञ्समासः पूर्वविप्रतिषिद्धं त्वतलोः स्वरसिद्ध्यर्थम्' इति महाभाष्यम्।

इत्थं पतञ्जलिना नञ्विषयकं सर्वं निजाभिमतं प्रतिपादितम्। तत्र भाषायाः सरलता, किन्तु भावस्य अभिप्रायस्य वेति गाम्भीर्यं वर्तते। सुकरतया तस्य प्रतीतिर्न भवति। अतो भाष्योक्तो नञोऽभिप्रायः संक्षेपेण प्रस्तूयते –

नञ् यदोत्तरपदेनसह अव्ययीभावार्थं समस्यते तदा पूर्वपदार्थप्रधानोऽव्ययीभावः समासः, 'अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्द प्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु (2।1।6) इति। यथा – अब्राह्मणम्। ब्राह्मणानाम् अभावः, इति। तत् समस्तमव्ययपदमिति। अत्राभावे नञिति यदि नञ् बहुव्रीह्यर्थं समस्यते तदा अविद्यमानं ब्राह्मण्यं यस्य सोऽब्राह्मणः, क्षत्रियादिः,इति 'नञ्' इत्यत्र कैयटः,। अत्र ब्राह्मणशब्दो जातौ वर्तते। अन्यपदार्थः क्षत्रियादिः,तस्य प्रधानतास्ति, अतोऽन्यपदार्थप्रधानो बहुब्रीहिः, 'शेषो बहुब्रीहिः' (2।2।23), 'अनेकमन्यपदार्थे' (2।2।24) इति। अत्राप्यभावे नञ्। यदि नञ् तत्पुरूषार्थं समस्यते तदा न ब्राह्मणः 'अब्राह्मणः' इति। अत्र ब्राह्मणोऽयमिति मिथ्याज्ञानं प्रथमं जायते ततो न ब्राह्मणोऽयमिति निश्चीयते। एतदर्थं तु 'अब्राह्मणः' इति चोत्तरपदप्रधानो नञ्तत्पुरुषसमासः। निवृत्तिपदार्थकोऽयं ब्राह्मणशब्दः, सा च निवृत्तिः स्वाभाविकीति। एवं च सत्यभाव एवास्यार्थ इति। यदा कश्चित् पदार्थ उपस्थितो भवति तदा स भावाभावस्वरूप एव। तस्य भावस्वरूपस्य ज्ञाने नञो व्यापाराभावः, तस्याभावस्वरूपस्यज्ञाने नञो व्यापारोपेक्षते। पदार्थभावनिवृत्तिरेव तस्याभावः, स नञा वाच्यो भवतीत्यर्थः। समासे नञ् वाचको भवति। वाक्ये द्वयोर्नञोः प्रकृतार्थवाचकता भवेत् – न न एकंप्रियम्, न न एकं सुखमिति। अत्रएकं प्रियम्, एकं सुखम्, इत्येव प्रकृतार्थो वाच्य इति। नञ्समासः सर्वथा प्रधानस्य सापेक्षत्वाद् भवतीति

भाष्यकारस्य व्याख्यानाभिप्रायः।

इत्थं भाष्यकारेण नञर्थस्य वाचकता स्वीकृता। नञर्थस्य वाचकता अभावेऽस्ति। अभावस्तु कस्यचित् पदार्थस्यैव भवति। अतः पदार्थनिवृत्तिरभाव इति वाच्यम्। तथैव भाष्यकारेण 'अब्राह्मणः' इत्यत्र।

नञ्विशिष्टो ब्राह्मण इत्यर्थः स्वीकृतः। नञ् प्रयुज्यमानः समासेपदार्थं निर्वर्तयति। यथा महताकीलेन प्रतिकीलो निर्वर्त्यते। अतो निवृत्तपदार्थको नञर्थ इति। तथा हि –

"अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात्।
विशेषणं विशेष्यो वा न्यायतस्त्ववधार्यताम्।।

भाष्यस्येति – तथा च नञ्सूत्रे महाभाष्यम् – 'निवृत्तपदार्थकः' इति, निवृत्तं पदार्थो यस्य 'नपुंसके भावे क्तः' (3।1।114) इति क्तः। अभावार्थक इत्यर्थः। इति वैयाकरणभूषणसारे नञर्थनिर्णये कौण्डभट्टेन भाष्यकारस्य नञर्थवाच्यतोक्ता। शक्यतावच्छेदके लाघवात् तथा लोकप्रसिद्धेश्च 'अभावः' एव नञ्वाच्यः,इत्यवगम्यते। वाच्यवाचकभावापन्नः सम्पूर्णोऽपि वेदः शब्दप्रधान इति। तस्मात्तन्मुखभूतं व्याकरणं कथं वाच्यवाचकातिरिक्तमन्यत् किञ्चित् स्वीकरिष्यति। वेदरक्षणाय शब्दानां वाच्यवचकतायामेव भगवतापतञ्जलेरभिप्रायः सन्निविष्टः, इति मन्ये।

किन्तु कालान्तरे विविधदर्शनानुयायिभिर्व्याकरणदर्शनमुत्सृज्य पृथग् रीत्या शब्दस्यानेकार्थबोधनाय शक्त्यतिरिक्ता वृत्तयः कल्पिताः। अतस्तैः कुत्रचित् शब्दस्य वाचकता, कुत्रचित् तस्य लाक्षणिकता, कुत्रचित् तस्य तात्पर्यता, कुत्रचित् तस्य व्यञ्जकता स्वीकृता। तस्माद् आरोपितत्वमेव नञर्थ इति, द्योतकत्वमेव नञर्थो वेति समासे तथा वाक्येतु निषेधकत्वमेव

नञर्थ इति मुख्यतया तैः स्वीकृतम्। तथा हि तेषां प्रकीर्णं वचनम् –

नञर्थौ द्विविधौ प्रोक्तौ पर्युदासप्रसज्यकौ।

पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत्।।

प्राधान्यं तु विधेर्यत्रप्रतिषेधेऽप्रधानता।।

पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।।2।।

अप्राधान्यं विधेर्यत्रप्रतिषेधे प्रधानता।

प्रसज्यस्तु स विज्ञेयः क्रियया सह यत्रनञ्।।3।।

तेषामेवात्र चायमर्थः – द्विप्रकारकौ नञर्थौ भवतः, क्वचित् पर्युदासः, क्वचित् प्रसज्यकश्चेति। परि+उद्+धञ्, इति पर्युदासः। प्र+सज्+यत्, इति प्रसज्यः। पर्युदासः सदृशार्थ इति। प्रसज्यो निषेधार्थ इति ।।1।। यत्रविधेर्भेदप्रतियोगिनः प्राधनत्वं विशेषत्वमिति, प्रतिषेधे नञर्थेऽप्रधानता, नञ्तत्पुरुषस्योत्तरपदार्थप्रधानत्वादिति, यथा – 'अघटः' इत्यस्मादारोपितो घट इत्येवं बोधादिति भावः, स तु 'पर्युदासः' विज्ञेयः। स च कुत्र भवतीत्यपेक्षायामाह – यत्रोत्तरपदेन युतो नञ् समस्त इत्यर्थः। अत्रोत्तरपदशब्दः समासस्य अन्तिमावयवे प्रसिद्ध इति। यथा 'अब्राह्मणः' इति। अब्राह्मण इति आरोपितब्राह्मणत्वविशिष्ट इत्यर्थः। ब्राह्मणभिन्नो ब्राह्मणसदृशः क्षत्रियादिरिति। पर्युदासस्तु समासे एव भवति।।2।। यत्र क्रियान्वयी नञ् भवति तत्रप्रसज्यप्रतिषेधो ज्ञेयः। अन्यत्सर्वं विस्पष्टमेव। यथा – घटो नास्ति, इति। प्रसज्यप्रतिषेधस्तु प्रायोऽसमासे एव भवति क्वचित् तु स समासेऽपि। यथा – 'अश्राद्धभोजी' इति। अत्रप्रसज्यप्रतिषेधप्राप्तिः। श्राद्धभोजिभिन्न इति वाच्योऽर्थः, श्राद्धभोजनाभाववत्त्वं च तेनाक्षिप्यते व्रतेगम्येणिनिः, 'व्रते' (3।2।80) इति। वस्तुतः 'असूर्यललाटयोर्दृशितपोः' (3।2।36) इतिसूत्रेण क्वचित्तु ज्ञापकाद् असामर्थ्येऽपि समासो भवत्येव। यथा –सूर्यं न पश्यन्ति, इति असूर्यम्पश्या राजदाराः, इति नञो द्विविधित्वम्।।3।।

अन्यत्र तु नञर्थाः षड् भवन्तीति चोक्तम् । तथा हि –

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।

अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ।।

अत्रसुगमोऽर्थः । क्रमशः उदाह्रियते ।अब्राह्मणः, अपापम्, अनश्वः, अनुदरा कन्या, अपशवः, अधर्मश्चैतानि सादृश्यादीनामुदाहरणानि सन्ति । एते सर्वे षडर्था द्योत्या इति नवीनानामेवाभिमतम् । 'नञर्थौद्विविधौ' इति, 'नञर्थाः षट् प्रकीर्तिताः' इति च नञर्थविषयकमभिमतं प्राचीनानां न प्रतिभाति । अन्यथा भाष्ये तेषां नञ्– प्रसंगे क्रमशः उल्लेखोऽवश्यं भवेदिति । भाष्ये तेषामर्थानामभावादिदमेव्र ज्ञायते यत् तेऽर्थाः कैश्चिद् भाष्यानन्तरमेव नञर्थे आरोपिता इति अथवा ते भाष्यादपि प्राचीनाः । किन्तु भाष्ये ते तथा न समादृता इति मन्ये । यतो हि भाष्यकारस्तैः सम्यक् परिचितः सन्नेव नञर्थः 'निवृत्तपदार्थकः' इति यदुक्त वान् तस्मादभावार्थ एव वाच्यो भवति । तस्मिन्नभावार्थे सर्वे ते सादृश्यादयः षडर्था निमग्नाः सन्ति । अर्थात्ते सर्वेऽभावपर्याया एवेति भाष्यसम्मतं प्रतीयते । शब्दस्यानेकार्थत्वं भाष्ये स्पष्टमेव, तस्माद् नञोऽनेकार्थत्वं वाच्यमेव न च द्योत्यमिति भाष्यकाराभिप्रायः । अतस्तेन 'भृशादिभ्यो भुव्यच्वेर्लोपश्च' (3 ।1 ।12) इत्यत्र 'अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृश एवानीयते नासौ लोष्टमानीय कृती भवति' इत्युक्वा सदृशार्थो निवृत्तपदार्थक एवेति संसूचितम् । यदि नञो नानार्थवाचकता तदा का हानिः । ततस्तु वृत्त्यन्तरकल्पनाभावाल्लाघवमेव ।

ये तु लक्षणादिवृत्त्यन्तरमतास्ते यदि नञो द्योतकत्वं स्वीकृत्य सादृश्यादीनां ग्रहणमारोपादिबलेन कुर्वन्ति, ते निश्चितं व्याकरणादर्शनातिरिक्तदर्शनानुयायिनः सन्तोऽपि वैयाकरणंमन्याः । व्याकरणनये तु, व्यवहारकाले, अर्थ एव शब्दत्वं प्राप्नोति । तथा हि –

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।

मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।।

मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्।

इति पाणिनीयशिक्षा (6, 7)

किन्तु व्यवहारात् परे शब्दादेवार्थकत्वमिति। तथा हि भर्तृहरिणोक्तम् –

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

इति वाक्यपदीयम् (1, 1)

उभाभ्यामेव ज्ञायते यद् अर्थ एव शब्दः, शब्द एवार्थ इति। अतो द्वयोरभेदो निगद्यते। अपि च 'अनादि निधनम्' इत्यनेन ज्ञायते यत् शब्दाद् या अर्थसृष्टिः सा अनेकरूपा, इति। साऽनेकरूपाऽर्थात्मिका सृष्टिर्व्यवहारे शब्दाभिधानाद् वाच्येति वक्तव्यम्। अर्थात् शब्दस्य व्यवहारे वाच्यत्वमेव स्पष्टं भवति। अतः शब्दस्यार्थावगमे कुत्रापि आरोपितत्वं द्योतकत्वं वा व्याकरणदर्शने न शक्तः। यदि वाचकद्योतकयोरभेदः स्यात् तदा कापि हानिर्न भविता। भाष्यकारस्य स्वकीये चिन्तने द्वयोरभेद एव। योऽर्थो वाचकशब्दस्य भवति स एवार्थो द्योतकशब्दस्येत्यभिप्रायः। यथा हि लोके श्रूयते – अयं शब्दोऽस्य वाचक इति केचिद् वदन्ति, स एवशब्दोऽस्य द्योतकोऽस्तीति केचिद् स्ववाग्वैशिष्ट्यप्रदर्शनाय निगदन्त्येव। भगवता पतञ्जलिना स्वकीये भाष्ये नञर्थस्य वाचकतां प्रति महर्षिपाणिनेरनुकरणं कृतम्। 'अनचि च' (8।4।47) इत्यादौ नञो वाचकतामेव स्वीकृत्य पाणिनिना नञ्समासस्तत्रविहितः। अभावस्तत्रवाच्यः। न तु अचः सादृश्यं नैव च तस्य भिन्नत्वमपेक्षते। तथा हि –

'अनचि' इति यदि पर्युदासः स्यात्ततो 'नञिवयुक्तमन्यसदृशे तथा

ह्यर्थगतिः' इति न्यायादज्भिन्नेऽच्सदृशे वर्णे हलीत्यर्थः स्यात्,ततोलाघवाद् हलीत्येव वदेत्, तस्मात् प्रसज्यप्रतिषेध इति श्री ज्ञानेन्द्र सरस्वती तत्वबोधिनीटीकायां प्रतिपादितम् । पाणिनीयेऽन्येऽपि बहूनि सूत्राणि सन्ति यत्र पाणिनिना अभावार्थे नञ्समासः शब्देषु व्यवहृतः । तथा हि – 'अदर्शनं लोपः' (1 |1 |60), 'अकथितं च' (1 |4 |51), 'अनभिहिते' (2 |3 |1), 'अकर्तर्यृणे पञ्चमी' (3 |2 |24) 'अनिदितां हल उपधाया क्ङिति' (6 |4 |24) 'अदेशकालात्' (4 |4 |71), 'असूर्यललाटयोर्दृशितपोः' (3 |2 |36) इति कानिचिदुद्धृतानि, तत्रनञर्थो निवृत्तपदार्थको वाच्यो भवति न तु द्योत्यः, इति । यतो हि तत्रअभावार्थस्यैव ग्रहणमभीष्टम् । अतः सूत्रेषु पाणिनिना नञ्समासमाध्यमेन अभावार्थं प्रतिपाद्य नञो वाच्यता प्रतिपादितेति । तद्रक्षार्थमेव पतञ्जलिना नञर्थो निवृत्तपदार्थक इति प्रतिपादितम् । अपि च तेन स्वकीये तत्प्रतिपादने 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः' इति वार्तिकवचने वाच्यपदं सम्यक् समादृतम् ।

यथा हि पूमेवोक्तं यद् अन्येषां व्याकरणेतरदर्शनानां प्रभावेण कैश्चिद् वैयाकरणैः नञर्थस्य द्योतकता प्रतिपादितेति तु सत्यमेव । तथा हि जिनेन्द्रबुद्धिमहोदयेन काशिकाया व्याख्याने 'न्यासे' 'नञ्' (2 |2 |6) इत्यत्र सर्वप्रथमं भाष्यकारोक्तं 'निवृत्तपदार्थकः' इति पदं द्योतकार्थे निर्वाचितम् । तथा हि – 'अथ निवृत्तपदार्थकोऽयं ब्राह्मणशब्दः, सा च निवृत्तिः स्वाभाविकी नञा द्योत्यते' इति । अपि च काशिकाया व्याख्यायां 'पदमञ्जर्यां' हरदत्तमहोदयेन तथैव विवृतम् । तथा हि – 'निवृत्तपदार्थकोऽयं ब्राह्मणशब्दः, सा च निवृत्तिः स्वाभाविकी नञा द्योत्यते, कोऽर्थः? केवलब्राह्मणशब्दः प्रयुज्यमानः प्रसिद्धिवशान्मुख्यमेव ब्राह्मणमाचष्टे, नञ् प्रयोगेण तु क्षत्रियादौ सादृश्यादिना निमित्तेनाध्यारोपितं ब्राह्मण्यं न तात्विकमिति द्योत्यते' इति । तथैव च 'नञ्' इति भाष्ये प्रदीपे कैयटेन निरूपितम् । तथा हि –

निवृत्तपदार्थक इति । निवृत्तपदार्थो मुख्यं ब्राह्मण्यं यस्मिन् स क्षत्रियादिरर्थः । सादृश्यादिना ध्यारोपितब्राह्मण्यो नञ् द्योतिततद–

वस्थइत्यर्थः। अपिचात्र 'उद्योते' नागेशेनापि तथैव स्वीकृतम् – सर्वथा निवृत्त–पदार्थत्वे विशेषणमेव न युज्येतेत्यत आह – सादृश्यादिनेति। आदिना साहचर्यादिनिवृत्तमुख्यब्राह्मण्यादिरारोपिततद्वान् इति भाष्याक्षरार्थः। नञ्द्योतिततदवस्थ इति। एवञ्चारोपितस्वप्रवृत्तिनिमित्तवानुत्तरपदार्थ इत्यत्र तात्पर्यग्राहको नञितितात्पर्यम्। भट्टोजिदीक्षितेन तु बहुविस्तारेण 'नञ्' इत्यत्र प्रौढ़मनोरमायां नञर्थस्य द्योतकतोपपादिता। विस्तारभयात्तदुपपादनं न क्रियते। ततः कौण्डमभट्टेनाऽपि वैयाकरणमूषणसारे नञर्थनिर्णये भाष्यकारस्य अभावविषयकं नञर्थं विमर्द्य नञ्समासे नञ्द्योतकता संरचिता। साऽपि विस्तारभयादस्पृश्या। इदानीं तु सर्वैर्नवीनानां वैयाकरणानां प्रभावेण नञर्थस्य द्योतकत्वमेव स्वीक्रियते तैर्विद्वद्भिर्नञर्थस्य वाचकत्वं विस्मृतमेव। किन्तु 'अनचि च' इत्यादौ कथं नञर्थस्य द्योतकता तेषां मते समुचितेति तु न जाने।

भर्तृहरिणा वाक्यपदीये नञ्विषयकचर्चा कृता। तत्रतेन नञर्थस्य द्योतकता वाचकता च प्रयोगभेदात् स्वीकृता वाक्ये नञ् द्योतक इतै। तथा हि –

प्राक्समासात् पदार्थानां निवृत्तिर्द्योत्यते नञा।

स्वभावतो निवृत्तानां रूपाभेदादलक्षिता।।

इति वाक्य पदीये वृत्तिसमुद्देशे– 250

अत्र हेलाराजेन यदुक्तं तदपि द्रष्टव्यम्। तथा हि – वाक्ये नञ्प्रयोगे निवृत्तिरवसीयते सा च न स्वतंत्रता, निर्विशेषणस्याभावस्याप्रतीतेरिति पदार्थनिष्ठासौ। तत्र सन् पदार्थो नञ् प्रयोगमात्रान्निवर्तितुं नोत्सहते। शब्दान्तरप्रयोगेऽपि च पदानां वाच्यस्य न्यूनातिरेकयोरनुपपत्तिः। तस्मात् स्वभावेनैव निवृत्तानां नञ् द्योतको निवृत्तेः। इति प्रकाशव्याख्या।

समासे नञ् वाचको भवति। तथा हि –

क्रियायाः साधनाधारसामान्ये नञ् व्यवस्थितः।

ततो विशिष्टैराधारैर्युज्यते ब्राह्मणादिभिः ।।

इति वाक्यपदीये वृत्तिसमुद्देशे – 255 ।।

अत्र हेलाराजेनोक्तम् – सामान्याभिधानेऽपि नञोऽसत्ता वचनत्वेन प्रस्तावात् सत्तालक्षणात्रक्रिया । तथा ह्यभावात्मको नञोऽर्थो भावस्य सत्ताया निषेधरूपः, तस्याः साधनमकर्मकत्वात् कर्तृशक्तिः । निराश्रयायाः साधनभा–वानुपपत्तेः सामर्थ्यलभ्यस्तदाधार आश्रयोऽनाश्रितविशेषः सामान्यमस्तीत्येवं रूपोऽत्रनिर्दिष्टः । तत्रवाचकत्वेन नञ् व्यवस्थितः प्रवृत्तः ।............तदित्थं वाचकत्वमभ्युपगम्य सर्वमुपपद्यते । इति प्रकाशव्याख्या ।

द्योतकस्य तर्हि वाक्ये नञो वृत्तौ वाचकत्वं कथमुपपद्यत इति चेदाह –

वृत्तौ यथा गताद्यर्थमुपादाय निरादयः ।.

युज्यन्ते साधनाधारैर्नञ् समासेऽपि स क्रमः ।।

इति वाक्यपदीये वृत्ति समुद्देशे – 256 ।।

अत्र हेलाराजेनोक्तम् – निष्कौशाम्बिः, अतिखट्वः, प्रपर्णः, इत्यादिवृत्तिपदेषु पूर्वपदभूता निरतिप्रभृतयोऽसत्ववचना अपि वाक्ये दृष्टाः सत्वभूतार्थाभिधायिनः । इति प्रकाशव्याख्या । तथा हि अस्यार्थस्याभिप्रायः श्रीरघुनाथशर्मणा साधु प्रकटितम् – यथा निर्गतः कौशाम्ब्या इति विग्रहे निष्कौशाम्बिरिति वृत्तौ निरादयो गताद्यर्थं वाचकत्वेनोपादाय वाक्येऽसत्वप्रधाना अपि अभिधानस्वाभाव्याद् वृत्तौ सत्वप्रधानाः सन्तः अपादानत्वादिशक्ति रूपसाधनाधारैः कौशाम्ब्यादिभिर्युज्यन्ते, स क्रमः – प्रकारो नञ् समासेऽपि । वाक्ये क्रियान्वयिनो नञोऽव्ययत्वात् सत्त्ववाचकत्वेन द्योतकत्वम्, वृत्तौ तु द्रव्यान्वयिनो वाचकत्वमिति । इति 'अम्बाकर्त्री' । एवमसत्सामान्ये – अभावे वाचकत्वेन–वर्तनात् तद् विशेषवचनैर्ब्राह्मणादिभिर्यथारुचि

विशेषणविशेष्यत्वं गुणप्रधानाभावः 'कुब्जखञ्जः खञ्जकुब्जः' इति पर्यायेण संघटते, इति भतृहरिणा प्रतिपादितम्।

तथा हि –

तत्रा सति नञो वृत्तेर्ब्राह्मणक्षत्रियादिभिः।
विशेषणविशेष्यत्वं कल्प्यते कुब्जखञ्जवत्।।

इति वाक्यपदीये, वृत्ति समुद्देशे – 257।।

इत्यं भर्तृहरिपरामर्शेन जायते यद् वाक्ये नञ् द्योतकः, समासे च वाचक इति। जिनेन्द्रबुद्धिः, हरदत्तः कैयटः, भट्टोजिदीक्षितः, नागेशादिश्च विद्वांसः सर्वत्र नञ् द्योतक इति स्वीकुर्वन्ति। किन्तु मुनित्रये नञ् सर्वत्र? समासे वाक्ये वा वाचक इत्येव प्रतिष्ठितोऽनुभूयते। तस्मात्तु शक्त्यन्तरवृत्ति–कल्पनाऽभावाल्लाघव एव। मुनित्रयस्याभिमतो वादो वाचकद्योतकयोरभेदः, 'सर्वे सर्वार्थवाचकाः' इति परमार्थतो दृष्टिर्जायते एव। वाचकस्य दीर्घव्यापारेऽनेकार्थवाच्यता व्याकरणस्य प्राचीनदार्शनिकनये स्वीकृतैव, तथैव 'सत्यप्यर्थभेदे शब्दस्याभेदः' इति मतं प्रसिद्धमेव।

यत्र कुत्रापि नञ्समासे सादृश्यादिविविधार्थाः विद्वद्भिः कल्पिताः सन्ति तत्रापि नञो वाच्यता प्राप्नोति। यतोहि ते अभावार्थस्यैव प्रतिरूपकाः। अभावशब्दोऽपि विचित्र एव, तत्रापि नञ्समासः। अभावस्य कोऽर्थ इति विचारणीयं तावत्। आचार्यभर्तृहरिणा अभावः सुचिन्तितः। तथा हि –

अभाव इति भावस्य प्रतिषेधे विवक्षिते।
सोपाख्यात्वमनाश्रित्य प्रतिषेधो न कल्पते।।

इति वाक्यपदीये वृत्तिसमुद्देशे – 263।।

तर्हिको भावः? 'भावो विद्वान्' इत्यमरः। भावयति परिभावयतीति। 'पचाद्यच् (3।1।134) इति 'भू सत्तायाम्' इति धातोरच्। अथवा भवनं भाव

इति। 'श्रिणीभुवोऽनुपसर्गे (3।3।24) इति भावे घञ्। 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु। क्रियालीलापदार्थेषु बुधजन्तुविभूतिषु।। रत्यादौ च। इति मेदिनी। इत्थं नानार्थको भावशब्दो यदा नञा समस्यते तदा 'अभावः' इति नानार्थकः शब्दो निष्पद्यते। यदा भावस्यदर्शनं न भवति तदा तस्य अभाव एवेति वाच्यम्। अतः अभावो लोप इति निर्वचने कापि हानिर्नास्ति। 'अदर्शनं लोपः' (1।1।60) इति लोपः, अभावार्थे सर्वथा प्रमाणम्। तस्माद् भावस्य लोपः 'अभावः' इति स्वीकर्तव्यम्। सोऽभावो नञर्थः सादृश्यादीन् विविधार्थानुररीकृतः सन् शिष्टप्रयुक्तार्थाभिप्रायेण तेषा सप्रसङ्गं निर्वचनं करोतीति।

इत्थं निर्गलितोऽयमर्थो भवति यद् व्याकरणस्य अतिप्राचीनपरम्परायां नञर्थः सर्वत्रैव समासे, असमासे वा अभावस्य वाचक एव। ततः भर्तृहरेः परम्परायां नञ् वाक्ये द्योतकः, समासे वाचक इति। ततः जिनेन्द्रबुद्धेः परम्परायां नञ् वाक्ये समासे वा सर्वैत्रव द्योतक इति। द्योतक पक्षे द्योत्यमानाः सर्वेऽर्थाबौद्धा मानसिका वेति किन्तु वाचकपक्षे सर्वेऽर्था नञा वाच्याः सन्तः शिष्टानामभिप्रायं पोषयन्ति वाचयन्ति चेति मन्तव्यम्।

❑

पाणिनीये षत्वविमर्शः

भाष्यकारेण भगवता पतञ्जलिना विसर्जनीयस्य ग्रहणमयोगवाहानां मध्येऽकारि के पुनरयोगवाहाः ? विसर्जनीयजिह्वामूलीयो-पध्मानीयानुस्वारयमाः। कथं पुनरयोगवाहा? यदयुक्ता वहन्ति, अनुपदिष्टाश्च श्रूयन्ते इति भाष्यम्।[1] न विद्यते योगो येषां वर्णसमाम्नाये ते अयोगा अनुपदिष्टाः।उपदिष्टैरगृहीताश्चेत्यर्थः। वाहयन्ति प्रयोगं निर्वाहयन्तीति वाहाः, अयोगाश्च ते वाहाश्च अयोगवाहा अनुस्वारविसर्गादयः, इति बालमनोरमा।[2] अपिच – अविद्यमानो योगः प्रत्याहारेषु संबन्धो येषां ते अयोगाः, अनुपदिष्टत्वादुपदिष्टैरगृहीतत्वाच्च प्रत्याहारसंबन्धशून्या इत्यर्थः। वाहयन्ति निर्वाहयन्ति प्रयोगमिति वाहाः। अयोगाश्च ते वाहाश्च अयोगवाहाः। अनुपदिष्टत्वे उपदिष्टैरगृहीतत्वेच सति श्रूयमाणा इत्यर्थः, इति तत्त्वबोधिनी।[3] इत्थं महर्षिपाणिनिना अनुपदिष्टाः प्रत्याहारलक्षणेन पाठाभावाद् असंबद्धाः सन्तो बहुविधंकार्यं निर्वहन्तस्ते विसर्जनीयादयोऽयोगवाहा इति प्रसिद्धिं गताः। तेषु चायोगवाहेषु विसर्जनीयः पाणिनीये बहुप्रकारकं कार्यमावहति। तत्र तस्य षत्वकार्यमत्यन्तं महत्त्वं लभते तदेवात्र विमृश्यते।

विसर्जनीयः विसर्गश्चेति द्वावेव त्यागस्य पर्यायौ। विपूर्वकात् 'सृजविसर्गे धातोरनीयर्, इति विसर्जनीयः। तथैव घञ् प्रत्ययान्तो विसर्गः, इति। अनेन ज्ञायते यद् यः कार्यकाले स्वं स्वरूपं विसृजति स एव विसर्जनीयः विसर्गश्चेति पाणिनीये ':' इति विसर्गाकारेण अवबोध्यते। पाणिनीये विसर्गस्य कुत्र मूर्धन्यषकारादेशो भवतीति विचार्यते।

---

1. हयवरट्, इत्यत्र 2. अटकुप्वाङ्...इत्यत्र 3. तत्रैव

विसर्गस्य मूर्धन्यषकारादेशः–

इण उत्तरस्य विसर्गस्य षकारादेशः स्यात् कुप्वोरपदाद्योः परतः पाशकल्पककाम्येषु ।[1] अत्र 'विर्जनीयस्य सः' (8।3।34) 'कुप्वोः≍कपौ≍च'(8।3।37) 'सोऽपदादौ' (8।3।38) इति सूत्राणामनुवृत्त्या तथा च 'पाशकल्पककाम्येष्विति वाच्यम्' इति वार्तिकेन षकारादेशो विधीयते ।तथा हि–पाश–सर्पिष्पाशम्, कल्प–सर्पिष्कल्पम्, क–सर्पिष्कम्, यजुष्कम्, काम्य–सर्पिष्काम्यति, यजुष्काम्यति।अपदादौ इत्येव ज्ञेयम् । अन्यथा अग्निःकरोति, वायुः करोति, इत्यत्रापि षकारादेशो भवितेति । 'अनव्ययस्येति वाच्यम्' (4901)'काम्ये रोरेवेति वाच्यम्' (4902) इति वार्तिकद्वयस्यापि संबन्धोऽत्र वर्तते ।तस्मात् उच्चैः कल्पम्, दोः पाशम्, गीः काम्यति चेत्यादौ न षकारादेशः, इत्यभिप्रायः ।

इकारोपधस्य उकारोपधस्य च अप्रत्ययस्य विसर्गस्य षकारादेशः स्यादिति कुप्वोः परतः[2] । यथा हि–निष्कृतम्, निष्पीतम्, निष्प्रत्यूहम्, दुष्कृतम्, दुष्पीतम्, बहिष्कृतम्, बहिष्पीतम्, आविष्कृतम्, आविष्पीतम्, चतुष्कृतम्, चतुष्कपालम्, चतुष्कलम्, चतुष्कण्टकम्, प्रादुष्कृतम्, प्रादुष्पीतम्, निष्कुलम्, दुष्कुलम्, दुष्पुरुषः, इति ।मातुः कृपा, मातुः करोति, पितुः करोति, अत्र 'रात् सस्य' (8।2।24) इति सकारलोपे कृते रेफस्य यो विसर्गः तस्य अप्रत्ययविसर्गत्वात् षकारादेशः प्राप्नोति ।किन्तु 'कस्कादिषु च ' (8।3।48) इत्यत्र भ्रातुष्पुत्रग्रहणेन ज्ञाप्यते यद् 'मातुः कृपा' इत्यादौ षकारस्य निषेधः स्यादिति । अस्याभिप्रायः 'मातुः' इत्यत्र मातृशब्दात् पञ्चम्येकवचनविवक्षायां ङसिर्भविष्यति ।ततः 'ऋत उत्'(6।1।111) इति ऋकारस्य अकारस्य च उकार एकादेश इति ।तस्य रपरत्वमिति । अतः मातुर् स् इति स्थिते 'रात् सस्य' (8।2।24) इति प्रत्ययसकारस्य लोपे कृते रेफस्य विसर्गो भवति ।अप्रत्ययतया विसर्गोऽयं षकारादेशे शक्तः ।

---

1 इणः षः (8।3।39)

2 इदुदुपधस्य चाऽप्रत्ययस्य (8।3।41)

अतः 'मातुष्कृपा' इति भवितुं शक्नोति । किन्तु 'कस्कादिषु च' इत्यत्र 'भ्रातुष्पुत्र' इति पाठात् तु ज्ञापनं भवति यत् केवलं 'भ्रातुष्पुत्र' इत्यत्रैव षत्वम्, अन्यत्र वर्जितमिति । तथा हि– 'एकादेशशास्त्रनिमित्तिकस्य न षत्वम्' इति । नैष्कुल्यम्, दौष्कुल्यम्, दौष्पुरुष्यम्, इत्यत्र कथं षत्वम् , इदुदुपधाभावादिति तु न वाच्यम् । बहिरङ्गलक्षणयोर्वृद्धिप्लुतयोरसिद्धत्वात् षत्वं प्रवर्तते । न तत्र कापि हानिरिति मन्तव्यम् ।

द्विस्, त्रिस्, चतुर् इत्येतेषां कृत्वोऽर्थे वर्तमानानां विसर्गस्य षकारादेशो विभाषया भवति कुप्वोः परयोरिति[1] यथा हि– द्विष्करोति, द्विःकरोति । त्रिष्करोति, त्रिःकरोति । चतुष्करोति, चतुःकरोति । द्विष्पचति, द्विःपचति । 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' (5 । 1 । 17), इति कृत्वसुजोऽर्थः कृत्वोऽर्थः । 'द्वित्रिचतुर्भ्यस्सुच' (5 । 1 । 18) इति तेभ्यः कृत्वोऽर्थे सुच् । अत्र तु विसर्जनीयस्य 'इदुदुपधस्य चाप्रत्ययस्य' इति पूर्वस्मादप्राप्ते सत्यत्र विभाषया षत्वं प्राप्नोति । षकारादेशाभावे तु 'कुप्वोः' इति जिह्वामूलीयविसर्जनीयौ यथारुचि विहिताविति । 'चतुष्कपालः' इत्यादौ च 'इदुदुपधस्य' इति पूर्वेणैव नित्यं षकरादेश इति कृत्वर्थाभावात् । चतुर्षु कपालेषु संस्कृतः पुरोडाशः, चतुष्कपाल इति ।

इस् उस् इत्येतयोर्विसर्गस्य विभाषया षकारादेशः स्यात् सामर्थ्ये कुप्वोः परयोरिति ।[2] यथा हि– सर्पिष्करोति, सर्पिःकरोति । यजुष्करोति, यजुःकरोति । धनुष्करोति, धनुःकरोति । अत्र सामर्थ्यमिह व्यपेक्षा । विशिष्टा अपेक्षा व्यपेक्षा । आकाङ्क्षायोग्यतासन्निधिवशाद् यः पदानां परस्परान्वयः सा व्यपेक्षेति । इदं तु सामर्थ्यं वाक्येषु भवति । व्यपेक्षालक्षणमेवात्र सामर्थ्यमाश्रित्य सर्पिष्करोतीति भाष्ये उदाहृतम् । किन्तु काशिकायां 'सामर्थ्यमिह व्यपेक्षा, न पुनरेकार्थीभावः, उभयं वा ' इति कृत्वा स्वीकृतम् ।

समासे इस् उस् इत्येतयोः विसर्गस्य अनुत्तरपदस्थस्य नित्यं षकरा–

---

1 द्विस्त्रिश्चतुरिति कृत्वोऽर्थे (8 । 3 । 43) ।

2 इसुसोः सामर्थ्ये (8 । 3 । 44) ।

देशो भवति कुप्वोःपरयोरिति ।[1] सर्पिष्कुण्डिका, धनुष्कपालम्, सर्पिष्पानम्, धनुष्फलम् । 'अनुत्तरपदस्थस्य' इति ग्रहणेन परमसर्पिःकुण्डिका, परमधनुः कपालम्, इत्यत्र षकारसकारादेशाभावो विद्यते ।अर्थादत्र विसर्गस्य उत्तरपदस्थत्वात् षकारनिषेध इति । अस्याभिप्रायः– 'परमसर्पिःकुण्डिका' इत्यत्र परमसर्पिः शब्दयोः 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' (2 । 1 । 61) इति कर्मधारयं कृत्वा कुण्डिकाशब्देन सह षष्ठीतत्पुरुषसमासः । अत्र परमशब्दापेक्षया सर्पिः शब्दःउत्तरपदम्, तत्रस्थश्च विसर्गः, तस्य षकारादेशो न भवति । परमसर्पिष्करोति, परमसर्पिःकरोति, 'इसुसोः सामर्थ्ये' इति पूर्वसूत्रेण षत्वं भवति । व्यपेक्षा च तत्र वाक्ये स्पष्टमेव । किन्तु सा व्यपेक्षा समासेऽत्र नास्तीति ज्ञेयम् । विसर्गस्यमूर्धन्यषकारादेशः भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याः विसर्गसन्धिप्रकरणे निरूपितः ।

कस्कादिषु इणः परस्य विसर्जनीयस्य षकारादेशो भवेत् कुप्वोः परतः ।[2] यथा हि' भ्रातुष्पुत्रः । यद्यपि 'इदुदुपधस्य' इति पूर्वसूत्रेणात्र षत्वं प्राप्नोति, परन्तु कस्कादिगणे तस्य पाठाद् मातुः करोति, पितुः करोति, मातुः कृपा चेत्यादौ षत्वप्रतिषेधो ज्ञाप्यते । गणे– सर्पिष्कुण्डिका, धनुष्कपालम्, वर्हिष्पूलम्, यजुष्पात्रम्, इत्येषामपि पाठोऽस्ति तेषां तु 'नित्यं समासेऽनुत्तरपदस्थस्य' इति पूर्वसूत्रेणैव षकारः सिद्धः । गणे तेषां पाठः उत्तरपदस्थस्यापि षत्वं यथा स्याद् इति काशिका । अर्थाद् ज्ञापनार्थं तेषां पाठः कृतः । किं ज्ञापनार्थमिति 'परमसर्पिः कुण्डिका' इत्यत्रापि षत्वं यथा भवेदित्यर्थः ।भट्टोजिदीक्षितेनायं षत्वविधिः हल्सन्धिप्रकरणे विहितः ।

सकारस्य मूर्धन्यषकारादेशः –

अपदान्तस्य सकारस्य मूर्धन्यषकारदेशो भवेत् ।[3]

---

1 नित्यं समासेऽनुत्तरपदस्थस्य (8 । 3 । 45) ।

2 कस्कादिषु च (8 । 3 । 48) ।

3 अपदान्तस्य मूर्धन्यः (8 । 3 । 55) ।

सहेर्धातोः साड्रूपस्य अपदान्तस्य सकारस्य मूर्धन्यादेशो भवति ।[1] यथा– जलाषाट्, तुराषाट्, पृतनाषाट् इति ।'जलाषाट्' इति जलं सहते ।

इणः कवर्गाच्च परस्य सकारस्य[2] तथा च नुम्व्यवाये, विसर्गव्यवाये, शर्व्यवाये चापि इणः कवर्गाच्चोत्तरस्य अपदान्तस्य सकारस्य मूर्धन्यषकारादेशो भवति ।[3] सः कुत्र कुत्र भविष्यतीति चाग्रे निरूप्यते ।

इण्कोः परः आदेशस्य यः सकारः प्रत्ययस्य च यः सकारः तस्य मूर्धन्यषकारो भवति,[4] आदेशस्य षकारत्वं यथा– सिषेव, सुष्वाप । प्रत्ययस्य षकारत्वं यथा– अग्निषु, कर्तृषु, रामेषु । अयं विधिः भट्टोजिदीक्षितेन अजन्तपुँल्लिङ्गप्रकरणेऽभिहितः ।

शासि, वसि, घसि, इत्येषां इणः कवर्गाच्च परस्य सकारस्य मूर्धन्यषकारो भवति ।[5] यथा– शिष्टः, शिष्टवान्, अन्वशिषत् अन्वशिषताम्, अन्वशिषन्, इति शासि, अनुशिष्टौ । उषितः, उषितवान्, उषित्वा ऊषतुः, ऊषुः, इति वसि, निवासे । जक्षतुः, जक्षुः, इति घसि कान्तिकरणे, क्वचित्तु उदुपधोऽयं धातुः ।अस्य विधेरुल्लेखो भट्टोजिदीक्षितेन भ्वादिप्रकरणे कृतः ।

स्तौतेः ण्यन्तानां च षभूते सनि परे अभ्यासाद् इणः परस्य आदेशसकारस्य मूर्धन्यषकारो भवति ।[6] यथा हि–'स्तौतेः' इति तुष्टूषति ण्यन्तानाम्– सिषेवयिष्यति, सिषञ्जयिषति, सुष्वापयिषति, सिषाधयिषति । अत्र अभ्यासादेव नियमः, न तु धातोरिति । यथा– प्रतीषिषति, अधीषिषति । अस्य विधेरुल्लेखो भट्टोजिदीक्षितेन सन् प्रकरणे कृतः ।

परिनिविभ्यः सेवसित' (8 । 3 । 70) इत्यत्र सितशब्दात् प्राक् ये

---

1 सहेः साडः सः (8 । 3 । 56)

2 इण्कोः (8 । 3 । 57)

3 नुम्विसर्जनीयशर्व्यवायेऽपि (8 । 3 । 58)

4 आदेशप्रत्यययोः (8 । 3 । 59)

5 शासिवसिघसीनां च (8 । 3 । 60)

6 स्तौतिण्योरेव षण्यभ्यासात् (8 । 3 । 61)

सुनोत्यादयः सन्ति तेषां तु अड्व्यवाये चाऽपि मूर्धन्यषकारः स्यादिति ।[1] यथा– न्यषेधत्, न्यषेधीत्, न्यषेधिष्यत् अस्य विधेरुल्लेखो भट्टोजिदीक्षितेन भ्वादिप्रकरणे कृतः ।

प्राक्सितात् स्थादिषु अभ्यासव्यवधानेऽपि सकारस्य मूर्धन्य–षकारादेशः स्यादिति ।[2] 'उपसर्गात् सुनोति' (8 । 3 । 65) इत्यत्र स्थासेनयसेधसिचसञ्जस्वञ्जा इति स्थादयः । अत्र अभ्याससकारस्यैव षत्वं भवति, नान्यत्रेति वेदितव्यम् । यथा – निषिषेध, निषिषिधतुः । 'अभ्यासस्य इति वचनं नियमार्थं, स्थादिषु एवाभ्याससकारस्य मूर्धन्यो भवति, नान्यत्र । अभिसुसूषति, अभिसिषासति' इति काशिका । अयं विधिरपि भट्टोजिदीक्षितेन भ्वादिप्रकरणे उल्लिखितः ।

उपसर्गस्थान्निमित्तात् परस्य सुनोति, सुवति, स्यति, स्तौति, स्तोभति, स्था, सेनय, सेध सिच, सञ्ज, स्वञ्ज, इत्येषां सकारस्य मूर्ध–न्यषकारादेशः स्यादिति ।[3] यथा हि– 'सुनोति' इति, अभिषुणोति तथैव पर्यभिभ्यामपि । 'सुवति' इति,अभिषुवति, परिषुवति । 'स्यति' इति अभिष्यति, परिष्यति ।'स्तौति' इति अभिष्टौति, परिष्टौति । 'स्तोभति' इति । अभिष्टोभते, परिष्टोभते । 'स्था' इति, अभिष्ठास्यति, परिष्ठास्यति । 'सेनय' इति अभिषेणयति, परिषेणयति । 'सेध इति,अभिषेधति, परिषेधति । 'सिच'इति, अभिषिञ्चति, परिषिञ्चति । 'सञ्ज इति, अभिषजति, परिषजति । 'स्वञ्ज' इति, अभिष्वजते, परिष्वजते । उपसर्गाद् अ यत्र न षत्वम् । यथा– दधि सिञ्चति, मधु सिञ्चति भट्टोजिदीक्षितेनायं विधिः भ्वादिप्रकरणे निरूपितः ।

उपसर्गस्थान्निमित्तात् सदेः सकारस्य अप्रतेरुत्तरस्य मूर्धन्यषकारादेशः स्यादिति ।[4]यथा हि– निषीदति,विषीदति न्यषीदत्,

---

1 प्राक् सितादड्व्यवायेऽपि (8 । 3 । 63) ।

2 स्थादिष्वभ्यासेन चाभ्यासस्य (8 । 3 । 64) ।

3 उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेध सिचसञ्जस्वञ्जाम् (8 । 3 । 65) ।

4 सदिरप्रतेः (8 । 3 । 66)

व्यषीदत् निषषाद। 'प्रति' इत्यनेन न षत्वमिति। यथा– प्रतिसीदति। भट्टोजिदीक्षितेन विधिरयं भ्वादिप्रकरणे अभिहितः।

उपसर्गस्थान्निमित्तात् परस्य स्तन्भेः सकारस्य मूर्धन्यषकारादेशः स्यादिति।[1] यथा हि– अभिष्टभ्नाति, परिष्टभ्नाति, अभ्यष्टभ्नात्, पर्यष्टभ्नात्। एवं च अभिप्रतिभ्यामपि ज्ञेयम्। अयं विधिः भट्टोजिदीक्षितेन भ्वादिप्रकरणे निरूपितः।

आलम्बनाविदूर्ययोरर्थयोः अवादुपसर्गात् स्तन्भेः सकारस्य मूर्धन्यषकारादेशः स्यादिति।[2] आलम्बनम्– आश्रयणम्। अविदूरस्य भावः– आविदूर्यम्। आलम्बने यथा– अवष्टभ्यास्ते, अवष्टभ्य तिष्ठति। आविदूर्ये यथा– अवष्टब्धा सेना, अवष्टब्धा शरत्, इति। 'आलम्बनाविदूर्ययोः' इति किम् ? अवस्तब्धो वृषलः शीतेन, इत्यत्र षत्वाभावः प्राप्नोति। 'अवस्तब्ध'' इत्यत्र अभ्यर्दितः इत्यर्थः। अयं विधिः भट्टोजिक्षितेन भ्वादिप्रकरणे निगदितः।

वेः उपसर्गात् अवाच्च परस्य स्वनतेः सकारस्य मूर्धन्यषकारादेशः स्याद् भोजनार्थे।[3] यथा हि– विष्वणति, व्यष्वणत्,विषष्वाण, अवष्वणति, अवाष्वणत्, अवषष्वाण, इति। भोजनातिरिक्तार्थे षत्वाभावः। यथा हि– विस्वनति मृदङ्ग :, इति। विधिरयं भट्टोजिदीक्षितेन भ्वादिप्रकरणे प्रतिपादितः।

परि, नि, वि चेत्येतेभ्यः उपसर्गेभ्यः परेषां सेव, सित, सय, सिवु, सह, सुट्, स्तु, स्वञ्ज चेत्येतेषां सकारस्य मूर्धन्यषकारादेशः स्यादिति।[4] यथा हि– 'सेव' इति, परिषेवते, निषेवते, विषेवते। 'सित' इति, परिषितः, निषितः, विषितः। 'सय' इति, परिषयः, निषयः, विषयः। 'सिव्' इति, परिषीव्यति,

---

1 स्तन्भेः (8 । 3 । 67)।

2 अवाच्चालम्बनाविदूर्ययोः (8 । 3 । 68)।

3 वेश्च स्वनो भोजने (8 । 3 । 69)।

4 परिनिविभ्यः सेवसितसयसिवुसासुट् स्तुस्वञ्जाम् (8 । 3 । 70)।

निषीव्यति, विषीव्यति । 'सह' इति, परिषहते, निषहते, विषहते । 'सुट्' इति, परिष्करोति, 'स्तु' इति, परिष्टौति, निष्टौति, विष्टौति । 'स्वञ्ज' इति, परिष्वजते, निष्वजते, विष्वजते । विधिरयं भट्टोजिदीक्षितेन भ्वादिप्रकरणे स्थापितः ।

परि, नि, वि, चेत्येतेभ्यः उपसर्गेभ्यः सिवादीनां सकारस्य मूर्धन्यषकारः स्याद् वेति, अड्व्यवधाने प्राप्ते ।[1] यथा हि– 'सिव' दति पर्यसीव्यत् पर्यषीव्यत्, न्यसीव्यत् न्यषीव्यत्, व्यसीव्यत्– व्यषीव्यत्.। 'सह' इति, पर्यसहत– पर्यषहत, न्यसहत– न्यषहत, व्यसहत– व्यषहत । 'सुट्' इति पर्यस्करोत् पर्यष्करोत् । 'स्तु' इति, पर्यस्तौत्– पर्यष्टौत्, न्यस्तौत्– न्यष्टौत्, व्यस्तौत्– व्यष्टौत् । 'स्वञ्ज' इति, पर्यस्वजत– पर्यष्वजत, इति । विधिरयं भट्टोजिदीक्षितेन भ्वादिप्रकरणे निगदितः ।

अनु, वि परि, अभि, नि चेत्येतेभ्यः परस्य स्यन्दतेः अप्राणिषु सकारस्य विभाषया मूर्धन्यषकारादेशः स्यादिति ।[2] तथा हि – 'अनु' इति, अनुष्यन्दते । 'वि' इति, विष्यन्दते । 'परि' इति, परिष्यन्दते । 'अभि' इति अभिष्यन्दते 'नि' । इति, निष्यन्दते । विकल्पपक्षे अनुस्यन्दते, इत्यादि । अप्राणिषु इति पर्युदासोऽयम्, न प्रसज्यप्रतिषेधः' इति काशिका । 'अप्राणिष्विति प्रसज्यप्रतिषेधः, तेन प्राण्यप्राणी समुदायेऽपि । प्राण्यस्तीति प्रतिषेधो भवति । अन्ये तु पर्युदासं मन्यमाना भवितव्यमेवात्र –षत्वेनेत्याहुः' इति पदमञ्जरी । अर्थात् 'मत्स्योदकं परिस्यन्दते' इत्यत्र यदि पर्युदासः गृह्यते तदा षत्वं भवति । प्राण्यप्राणी समुदायो 'मत्स्योदकम्' इति यो प्राणिभ्योऽन्योऽस्ति । प्रसज्यप्रतिषेधे हि यत्र प्राणिगन्धोऽस्ति तत्र मूर्धन्यषकारो न भवेत् । यतो हि मत्स्यः प्राणीति, अतः षकारादेशो न भवतीति मन्तव्यम् । अयं विधिः भट्टोजिदीक्षितेन भ्वादिप्रकरणे प्रतिपादितः ।

वेः उपसर्गात् परस्य स्कन्देः सकारस्य विकल्पेन मूर्धन्यषकारादेशः

---

1 सिवादीनां वाड्व्यवायेऽपि (8 । 3 । 71) ।

2 अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु (8 । 3 । 72) ।

स्यात्, अनिष्ठायां विषये ।[1] विष्कान्ता– विस्कान्ता । विष्कन्तुं – विस्कन्तुम् । निष्ठायां तु षत्वाभाव एव, विस्कन्नः इति ।

परशब्दात् परस्य स्कन्देः सकारस्य विकल्पेन मूर्धन्यषकारादेशः । स्यादिति ।[2] यथा हि– परिष्कन्ता, परिस्कन्ता । परिष्कन्तुम्, परिस्कन्तुम् । अत्र निष्ठायामपि विकल्पेन भवति परिष्कण्णः परिस्कन्नः । अयं विधिः भट्टोजिदीक्षितेन भ्वादिप्रकरणे निवेशितः । तत्र परिष्कन्दति, परिस्कन्दति, इति गृहीतम् । प्राच्यभरतेषु षत्वाभावो निपात्यते ।[3] 'प्राच्यभरतेषु प्रयोगविषयेषु' इति काशिका । यथा– परिस्कन्दः, इत्यत्र 'परेश्च' इति विकल्पेन षत्वं प्राप्नोति, किन्त्वत्र षत्वाभावः केषाञ्चित् प्राचां मतं भवतीति कृत्वा पाणिनिना स्वीकृतम् । अयं विधिः भट्टोजिदीक्षितेन पूर्वकृदन्तप्रकरणे स्थापितः ।

निस् नि वि चेत्येतेभ्यः परस्य स्फुरतेः स्फुलतेश्च सकारस्य विकल्पेन मूर्धन्यषकारादेशः स्यादिति ।[4] यथा हि– 'स्फुरति' इति, निष्ष्फुरति, निस्स्फुरति निष्फुरति, निस्फुरति । 'वि' इति, विष्फुरति, विस्फुरति तथैव स्फुलतेरपि । अयं विधिः भट्टोजिदीक्षितेन तुदादिप्रकरणे स्थापितः ।

अङ्गुलेः परस्य सङ्गसकारस्य समासे मूर्धन्यषकारादेशः स्यादिति ।[5] यथा हि– अङ्गुलिषङ्गः, अङ्गुलेः सङ्गः इत्यर्थः । असमासे नैव स्यादिति । यथा हि– अङ्गुलेः सङ्गं पश्यति ।

भीरोः परस्य स्थाननकारस्य समासे मूर्धन्य षकारादेशो भवेदिति ।[6] यथा हि– भीरुष्ठानम् । भीरोः स्थानं पश्येति असमासे षत्वनिषेधः । अयं

---

1 वेः स्कन्धेरनिष्ठायाम् (8 । 3 । 73)

2 परेश्च (8 । 3 । 74)

3 परिस्कन्दः प्राच्यभरतेषु (8 । 3 । 75)

4 स्फुरतिस्फुलत्योर्निर्निविभ्यः (8 । 3 । 76)

5 समासेऽङ्गुलेः सङ्गः (8 । 3 । 80)

6 भीरोः स्थानम् (8 । 3 । 81)

विधिः भट्टोजिदीक्षितेन समासाश्रयविधि प्रकरणेऽभिहितः।

स्तुत् स्तोम, सोम चेत्येतेषां सकारस्य, अग्नेः परस्य, समासे मूर्धन्यषकारादेशो भवेदिति।[1] यथा हि– अग्निष्टुत् अग्निष्टोमः, अग्नीषोमः। द्वन्द्वसमासे 'अग्नेर्दीर्घात् सोमस्य इष्यते' इति महाभाष्यम्। असमासे तु अग्नेः स्तोमः, इत्येव। अयं विधिः भट्टोजिदीक्षितेन द्वन्द्वसमासप्रकरणेऽभिहितः।

ज्योतिस् आयुस्, इत्येताभ्यां परस्य स्तोमसकारस्य मूर्धन्यषकारादेशः समासे भवेदिति। [2] यथा हि– ज्योतिष्टोमः, आयुष्टोमः, इति। असमासे षत्वनिषेधः स्यात्। यथा–' ज्योतिषः स्तोमः, इति। विधिरयं भट्टोजिदीक्षितेन समासाश्रयविधिप्रकरणे नियोजितः।

मातृ, पितृ, इत्याभ्यां परस्य स्वसृसकारस्य मूर्धन्यषकारादेशः समासे भवेदितिं[3]। यथा हि– मातृष्वसा, पितृष्वसा, इति। असमासे षत्वनिषेधः स्यात्। मातुः स्वसा, पितुः स्वसा इति। विधिरयं भट्टोजिदीक्षितेन अलुक्समासप्रकरणे स्थापितः।

मातुर् ,पितुर् ,इत्याभ्यां परस्य स्वसृसकारस्य समासेऽन्यतरस्यां मूर्धन्यषकारादेशो भवेदिति।[4] यथाहि मातुःष्वसा , मातुः स्वसा । पितुःष्वसा, पितुः स्वसा। 'विभाषा स्वसृपत्ययोः' (6 । 3 । 24) इति ऋदन्तात् षष्ठ्याः विभाषया अलुगिति। विधिरयं भट्टोजिदीक्षितेन अलुक्समासप्रकरणे विहितः।

अभिनिस्, इत्यस्मात् परस्य स्तनतः सकारस्य शब्दसंज्ञाभिधाने विभाषया समासे मूर्धन्यषकारादेशो भवेदिति।[5] यथा हि– अभिनिष्टानो वर्णः, इति। काशिकाकारेणात्र विकल्पविधिः स्वीकृतः। किन्तु भट्टोजिदीक्षितेन

---

1 अग्नेः स्तुत्स्तोमसोमाः (8 । 3 । 82)

2 ज्योतिरायुषः स्तोमः(8 । 3 । 83)

3 मातृपितृभ्यां स्वसा (8 । 3 । 84)

4 मातुः पितुर्भ्यामन्यतरस्याम् (8 । 3 । 85)

5 अभिनिसः स्तनः शब्दसञ्ज्ञायाम् (8 । 3 । 86)

उत्तरकृदन्तप्रकरणे नित्यविधिरिति कृत्वा स्वीकृतम्। शब्दसंज्ञाभावे– अभिनिस्तनति मृदङ्गः, इति।

उपसर्गस्थान्निमित्तात् अर्थात् उपसर्गस्थादिणः प्रादुस्शब्दाच्च परस्य अस्तेः सकारस्य मूर्धन्यषकारादेशो भवेत्, यकारेऽचि च परतः।[1] यथा–यकारे–निष्यात्, प्रादुःष्यात्। अचि–निषन्ति प्रादुष्षन्ति। 'अस्ति इति किम् ? अनुसृतम्, विसृतम्। अथ असत्यपि अस्तिग्रहणे सकारमेव प्रति उपसर्ग आश्रीयते, प्रादुःशब्दस्य च कृभ्वस्तिष्वेव प्रयोगः इति अन्यत्राप्रसङ्गः तथापि एतत् प्रत्युदाहर्तव्यम्, अनुसूते अनुसूः अनूस्वोऽपत्यं आनुसेयः। यच्परः इति किम्? निस्तः विस्तः, प्रादुस्तः' इतिकाशिका। विधिरयं भट्टोजिदीक्षितेन अदादि प्रकरणे विहितः।

सु, वि, निर्, दुर्, इत्येभ्यः परस्य सुपि,सूति सम, इत्येषां सकारस्य मूर्धन्यषकारादेशो भवेदिति।[2] यथा हि– सुषुप्तः,विषुप्तः, निःषुप्तः, दुःषुप्तः। 'सूति' इति, सुषूतिः, विषूतिः, , निःषूतिः, दुःषूतिः।'सम' इति,सुषमम्, विषमम्, निःषमम्, दुःषमम्। 'सुषुषुपतुः, सुषुषुपुः' इति भट्टोजिदीक्षितेन अदादिप्रकरणे स्वीकृतम्।

नि,नदी, इत्याभ्यां परस्य स्नातिसकारस्य कौशलेऽर्थे मूर्धन्यषकारादेशो भवेदिति।[3] यथा हि नदीष्णः, नद्यां स्नातीति। कौशलार्थाभावे तु षत्वनिषेधः। निस्नातः, नद्यां स्नातः इति नदीस्नातः, इति। अयं विधिः भट्टोजिदीक्षितेन 'निष्णातः शास्त्रेषु इत्युक्त्वा पूर्वं कृदन्तप्रकरणेऽभिहितः।

सूत्रं यदि भवति तदा 'प्रतिष्णातम्' इति निपात्यते।[4]यथा हि–

---

1 उपसर्गप्रादुर्भ्यामस्तिर्यच्परः (8 ।3 ।87)।

2 सुविनिर्दुर्भ्यः सुपिसूतिसमाः (8 ।3 ।88)।

3 निनदीभ्यां स्नातेः कौशले (8 ।3 ।89)।

4 सूत्रं प्रतिष्णातम् (8 ।3 ।90)।

प्रतिष्णातम् सूत्रम्, इति। प्रतिष्णातमित्यस्यार्थः शुद्धमिति। अन्यत्र तु 'प्रतिस्नातम्' इत्येव ज्ञेयम्। भट्टोजिदीक्षितेन अयं विधिःपूर्वकृदन्तप्रकरणे विहितः।

गोत्रे 'कपिष्ठलः' इति निपात्यते।[1] 'कपिष्ठलः नाम यस्य सः कापिष्ठलिः पुत्र' इति काशिका। गोत्राद् भिन्ने षत्वनिषेधः। यथा– कपीना स्थलं कपिस्थलम्। अयं विधिः भट्टोजिदीक्षितेन कृदन्तप्रकरणे निरूपितः।

अग्रगामिनि गम्यार्थे 'प्रष्ठः' इति निपात्यते।[2] यथा हि– 'अग्रतो गच्छति' इत्यर्थे प्रष्ठः अश्वः। प्रतिष्ठते इति प्रष्ठः। अग्रगामिनि अगम्यार्थे 'प्रस्थः' इत्येव। भट्टोजिदीक्षितेनायं विधिः पूर्वकृदन्तप्रकरणेऽभिहितः।

वृक्षे आसने चाभिधेये –विष्टर'' इति निपात्यते।[3] यथा हि– विष्टरो वृक्षः, विष्टरम् आसनम्, इति। अन्यत्र तु वाक्यस्य विस्तरः इत्येव। भट्टोजिदीक्षितेनायं विधिः उणादिप्रकरणे प्रदर्शितः।

विष्टारः इति छन्दोनाम निपात्यते।[4] विपूर्वात् 'स्तृ' इत्येतस्माद् धातोः 'छन्दोनाम्नि च' (3 । 3 । 34) इत्येवंविहितो घञ् इति विष्टरः इत्यपि प्रकृते विष्टारः विज्ञायते। विष्टारपङ्क्तिः छन्दः। विष्टारो बृहतीछन्दः। छन्दो नाम्नि इति किम् ? पटस्य विस्तारः, इति काशिका। भट्टोजिदीक्षितेनायं विधिः उत्तरकृदन्तप्रकरणे विहितः।

गवियुधिभ्यां परस्य स्थिरसकारस्य समासे मूर्धन्यषकारादेशो भवेदिति।[5] यथाहि– गविष्ठरः, युधिष्ठिरः, इति। गोशब्दात् अहलन्तादपि निपातनात् सप्तम्याः अलुक् ज्ञेयम्। तथा च 'हलदन्तात्सप्तम्याः संज्ञायाम् (6 । 3 । 9) इति तु 'युधिष्ठिरः' इत्यत्र अलुक्। भट्टोजिदीक्षितेन अलुक्समासप्रकरणे विधिरयं विहितः।

वि, कु, शमि, परि, इत्येभ्यः परस्य स्थलस्य सस्य मूर्धन्यषकारादेशो भवेत्।[6]

---

1 कपिष्ठलो गोत्रे (8 । 3 । 91)
2 प्रष्ठोऽग्रगामिनि (8 । 3 । 92)
3 वृक्षासनयोर्विष्टरः (8 । 3 । 93)
4 छन्दो नाम्नि च (8 । 3 । 94)
5 गवियुधिभ्यां स्थिरः (8 । 3 । 95)
6 विकुशमिपरिभ्यः स्थलम् (8 । 3 । 95)

यथा हि– विष्ठलम्, कुष्ठलम्, शमिष्ठलम्, परिष्ठलम्। विधिरयं भट्टोजिदीक्षितेन पूर्वकृदन्तप्रकरणे प्रतिपादितः।

अम्ब, आम्ब, गो, भूमि, सव्य, अप, द्वि, त्रि, कु, शेकु, शङ्कु, अङ्गु, मञ्जि, पुञ्जि, परमे, बर्हिस्, दिवि, अग्नि चेत्येभ्यः परस्य स्थस्य सस्य मूर्धन्यषकारादेशः स्यात्।[1] क्रमादुदाह्रियते– अम्बष्ठः,आम्बष्ठ, द्विष्ठः, गोष्ठः, भूमिष्ठः सव्येष्ठः अपष्ठः द्विष्ठः,त्रिष्ठः, कुष्ठः, शेकुष्ठः,शङ्कुष्ठः, अङ्गुष्ठः, मञ्जिष्ठः, पुञ्जिष्ठः, परमेष्ठः, बर्हिष्ठः, दिविष्ठः, अग्निष्ठः। विधिरयं भट्टोजिदीक्षितेन पूर्वकृदन्तप्रकरणे निवेशितः।

सुषामादिषु सकारस्य मूर्धन्यषकारादेशो भवेत्।[2] यथा हि– शोभनं साम यस्य सः सुषामा ब्राह्मणः, दुष्षामा, निष्षामा, निष्षेधः, दुष्षेधः,सुषन्धिः, दुष्षन्धिः, निष्षन्धिः, सुष्ठु, दुष्ठु, प्रतिष्णिका, जलाषाहम्, नौषेचनम्, दुन्दुभिषेवणम्, हरिषेणः, वारिषेणः जानुषेणी,एति संज्ञायामगात् इति गणसूत्रम् (182)। विष्वक्सेनः, इण्कोः इत्येव, न तु सर्वसेनः, इत्यत्र। 'नक्षत्राद् वा' (गणसूत्रम्–183), यथा हि– रोहिणीषेणः,–रोहिणीसेनः, भरणीषेणः– भरणीसेनः, अगकारात् इत्येव। शतभिषक्सेनः। अविहित लक्षणो मूर्धन्यषकारादेशः सुषामादिषु भवतीति मन्तव्यम्। भट्टोजिदीक्षितेन समासाश्रयविधिप्रकरणे विधिरयं विहितः।

तादौ तद्धिते परे ह्रस्वान्तात् इणः परस्य सस्य मूर्धन्यषकारादेशः स्यात्।[3] 'तादौ' इत्यनेन तरप्, तमप्, तय, त्व, तल्, त्यप्, इत्येतेषां ग्रहणं भवति। क्रमशः उदाह्रियते–सर्पिष्टरम् , सर्पिष्टमम्, चतुष्टयम्, सर्पिष्ट्वम् , सर्पिष्टा, सर्पिष्टः , 'आविष्ट्यो' वर्धते (ऋ. 1।95।5) इति।

---

1 अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः (8 ।3 ।97)।

2 सुषामादिषु च (8 ।3 ।98)।

3 ह्रस्वान्तादौ तद्धिते (8।3।99)।

तिङन्तस्य प्रतिषेधो भवति। भिन्द्युस्तराम्, छिन्द्युस्तराम्, विधिरयं भट्टोजिदीक्षितेन शैषिकप्रकरणेऽभिहितः ।

अनासेवनेऽर्थे तपतौ परतः निसः सकारस्य मूर्धन्यषकारादेशः स्यात् ।[1] अनासेवनम् सकृत्करणम् ।आसेवनं तु पुनः पुनः करणमिति। यथा हि–निष्टपति सुवर्णम्। सकृत् अग्नौ तपति इत्यर्थः। अनासेवनाभावे षत्वनिषेधः। यथाहि –निस्तपति सुवर्णं सुवर्णकारः, अर्थात् पुनः पुनः अग्नौ स्वर्णकारः सुवर्णं तापयतीति । विधिरयं भट्टोजिदीक्षितेन भ्वादिप्रकरणे वैदिकप्रकरणे चोल्लिखितः।

छन्दसि मूर्धन्यषकारादेशः–

पादमध्ये युष्मत्, तत्, ततक्षुस्, इत्येतेषु तकारादिषु परेषु सकारस्य मूर्धन्यषकारादेशो भवेत् ।[2]'युष्मत्' इत्यनेन युष्मदादेशः–त्वम्, त्वाम्, ते,तव,इत्येते ग्राह्याः। अयं षत्वादेशः छन्दसि विहितः। यथा हि – अग्निष्ट्वं नामासीत्, इति त्वम् अग्निष्ट्वा वर्धयामसि, इति त्वा। एवं चान्यदपि ज्ञेयम्। किन्तु यजुषि विषये चोक्तविधिर्विभाषया भवति ।[3] अपि च स्तुत, स्तोम, इत्येतयोः सकारस्य छन्दसि मूर्धन्यषकारादेशो भवेत्, वेति ।[4] यथा हि त्रिभिष्टुतस्य–त्रिभिस्तुतस्य, इति स्तुत। गोष्टोमम्,गोस्तोमम्, इति स्तोम। तथा च छन्दसि एव पूर्वपदस्थादिणः निमित्तात् परस्य सकारस्य मूर्धन्यषकारादेशो भवेत्, वेति ।[5] यथा हि– द्विषन्धिः– द्विसन्धिः। मधुष्ठानम्– मधुस्थानम्। द्विषाहस्रम्–द्विसाहस्रम्। असमासेऽपि चात्र छन्दसि षत्वं वा भवति–त्रिः षमृद्धत्वाय– त्रिःसमृद्धत्वाय। एवं च छन्दसि एव पूर्वपदस्था–दिणः निमित्तात् परस्य सुञः सकारस्य मूर्धन्यषकारादेशो भवति ।[6] यथा

---

1 निसस्तपतावनासेवने (8 । 3 । 100)।

2 युष्मत्तत्ततक्षुःष्वन्तःपादम् (8 । 3 । 101)।

3 यजुष्येकेषाम् (8 । 3 । 102)।

4 स्तुतस्तोमयोश्छन्दसि (8 । 3 । 103)।

5 पूर्वपदात् (8 । 3 । 104) ।

6 सुञः (8 । 3 । 105)।

हि– अभीषुणः सखीनाम्, ऊर्ध्व ऊ ष ण ऊतये। 'सुञः' इति निपातो गृह्यते। 'सुञ्' अभिषवे, इतिं धातुः न गृह्यते। तथा च छन्दसि एव सनोतेः अनकारान्तस्य सकारस्य मूर्धन्यषकारादेशो भवति।[1] यथा हि– गोषाः गां सनोतीति। षणु' दाने इति। नृषाः, इति। अपि च छन्दसि एव पृतना, ऋत्, इत्याभ्यां परस्य सहिसकारस्य मूर्धन्यषकारादेशो भवेत्।[2] यथा हि– पृतनाषाहम्, ऋताषाहम्। केचित्तु 'सहेः' इति योगविभागं कृत्वा 'ऋतीषहम्' इत्यपि स्वीकुर्वन्ति। उक्तं सर्वं भट्टोजिदीक्षितेन वैदिकप्रक्रियायां प्रपञ्चितम्।

मूर्धन्यषकारादेशनिषेधः–

सम्प्रति कुत्र षत्वनिषेधो भवतीति प्रतिपाद्यते। रेफपरस्य सस्य सृपि, सृजि, स्पृशि, स्पृहि, इत्येतेषां तथा च सवनादीनां मूर्धन्यषकारादेशो न भवति।[3] यथा – विस्रब्धः, विसृपः, निस्पृहम्, वास्रो दिवसः, वाश्रं मन्दिरम्, हस्रो मूर्खः, सिध्रः साधुः इत्येवमन्यदपि ज्ञेयम्।'पूर्वपदात्'(8 । 3 । 104) इत्यनेन प्राप्तस्य षत्वस्य निषेधोऽत्र भवति। भट्टोजिदीक्षितेन कृदन्तगतोणादिप्रक्रियायां निषेधोऽयम् विहितः।

'सात्' इत्येतस्य पदादेश्च सकारस्य मूर्धन्यषकारादेशो न भवति।[4] यथा हि– अग्निसात्, दधिसात्, इति सात्। दधि सिञ्चति, इति पदादेः। भट्टोजिदीक्षितेन आदेशप्रत्यययोः (8 । 3 । 59) इति षत्वे प्राप्ते निषेधोऽयं स्वार्थिकप्रकरणे प्रतिपादितः।

यङिपरे सिचः सकारस्य मूर्धन्यषकारादेशो न भवेत्।[5] यथा हि– सेसिच्यते, अभिसेसिच्यते, इति। –आदेशप्रत्यययोः' (8 । 3 । 59), 'उपसर्गात् सुनोति' (8 । 3 । 65) इति च प्राप्तस्य षत्वस्यात्र निषेधः।

---

1 सुनोतेरनः (8 । 3 । 106)।

2 सहेः पृतनर्ताभ्यां च (8 । 3 । 107)।

3 न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् (8 । 3 । 108)।

4 सात्पदाद्योः (8 । 3 । 109)।

5 सिचो यङि (8 । 3 । 110)।

भट्टोजिदीक्षितेनायं निषेधः यङ्प्रकरणेऽभिहितः ।

'गतौ' इत्यर्थेवर्तमानस्य सेधतेः सकारस्य मूर्धन्यषकारादेशो न भवेत् ।[1] यथा हि– अभिसेधयति परिसेधयति, विसेधयति, इति ।–उपसर्गात् सुनोति' इति प्राप्तस्य षत्वस्य प्रतिषेधोऽत्र वर्तते । भट्टोजिदीक्षितेन निषेधोऽयं भ्वादिप्रकरणेऽभिहितः ।

प्रतिस्तब्धः, निस्तब्धः, इत्यत्र मूर्धन्यषकारनिषेधो निपात्यते ।[2] 'स्तम्भेः' (8 । 3 । 67) इति प्राप्तस्य षत्वस्यापवादो निपात्यते, इत्यर्थः । भट्टोजिदीक्षितेनेदं निपातनं पूर्वकृदन्तप्रकरणे विहितम् । सोढभूतस्य सहेः सकारस्य मूर्धन्यषकारादेशो न भवेत् ।[3] यथा हि– परिसोढः, परिसोढुम्, परिसोढव्यम्, इति 'परिनिविभ्यः, (8 । 3 । 70) इति प्राप्ते षत्वेऽत्र निषेधः । भट्टोजिदीक्षितेनायं निषेधः भ्वादिप्रकरणे सन्दर्भितः' । स्तम्भ सिवु, सह, इत्येतेषां चङि परे सकारस्य मूर्धन्यषकारादशो न भवेत् ।[4] यथा हि पर्यस्तम्भत्, इति स्तम्भु । पर्यसीषिवत्,इति सिवु । न्यसीषहत्, इति सह । 'परिनिविभ्यः (8 । 3 । 70) इति च प्राप्तं षत्वमत्र निषिध्यते । भट्टोजिदीक्षितेनायं निषेधः णिच् प्रकरणे प्रतिपादितः । स्ये, सनि च परे सुनोतेः सकारस्य मूर्धन्यषकारादेशो न भवेत् ।[5] यथा हि– पर्यसोष्यत्, इति स्ये । अभिसुसूषति, अभिसुसुषते, इति सनि । अत्र 'उपसर्गात् सुनोति' (8 । 3 । 35) इति प्राप्तः षकारो न भवति । भट्टोजिदीक्षितेनायं निषेधः स्वादिप्रकरणेऽभिहितः । सदि, ष्वञ्ज, इत्येतयोः धातोः लिटिपरतः सकारस्य परस्य मूर्धन्यषकारादेशो न भवेत् ।[6] यथा हि– अभिषसाद, परिषसाद, निषसाद, इति सदि । परिषस्वजे, परिषस्वजाते, परिषस्वजिरे, इति ष्वञ्ज ।

---

1 सेधतेर्गतौ (8 ।3 । 111) ।

2 प्रतिस्तब्धनिस्तब्धौ च (8 ।3 । 112) ।

3 सोढः (8 ।3 । 112) ।

4 स्तम्भुसिवुसहां चङि (8 ।3 । 113) ।

5 सुनोतेः स्यसनोः (8 ।3 । 114) ।

6 सदिष्वञ्जोः परस्य लिटि (8 ।3 । 115)

'स्वादिष्वभ्यासेन चाभ्यासस्य' (8 । 3 । 64) इति तथा 'उपसर्गात् सुनोति' (8 । 3 । 65) इति प्राप्तं षत्वमत्र निषिध्यते। छन्दसि विषये नि, वि, अभि, इत्येतेभ्यः परस्य सकारस्य अड्व्यवाये मूर्धन्यषकारादेशो विकल्पेन न भवति।[1] यथा हि– न्यषीदत् – न्यसीदत्। व्यषीदत् – व्यसीदत्। अभ्यषीदत्–अभ्यसीदत्, इति । अत्र'सदिरप्रतेः' (8 । 3 । 66) इति षत्वप्राप्तिः। न्यष्टौत्–न्यस्तौत्, इत्यत्र –उपसर्गात् सुनोति' (8 । 3 । 65) इति षत्वं प्राप्नोति, किन्तु विभाषयात्र निषेधो भवति। भट्टोजिदीक्षितेन वैदिक प्रक्रियायां निषेधविकल्पोऽयं निरूपितः।

इत्थं पाणिनीये मूर्धन्यषकारादेशप्रसङ्गोऽयमतिविस्तृतोऽस्ति। आचार्यपाणिनिनाऽयं प्रसङ्गः सप्तषष्टौ सूत्रेषु सम्पूरितः। एतादृशः कोप्यन्य आदेशप्रसङ्गः पाणिनीये न विस्तृतो वर्तते अस्य महत्त्वं वीक्ष्यैव भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याः पूर्वोक्तानेकप्रकरणेषु षकारादेशविधानं सप्रसङ्गं प्रकियासाधनाय सुगृहीतम्। अपि च ज्ञानेन्द्र–सरस्वतीप्रभृतिभिष्टीकाकारैर्भट्टोजिदीक्षितमार्गमनुसृत्य प्राप्तोदाहरणेषु षकारादेशप्रकिया पाणिनिदिशा संसाधिता। तथा च भाष्यकारकाशिकारादिमतं समादृत्य सर्वं मूर्धन्यषकारादेशविधानमभिहितम्। पुनरपि चेयं शङ्का व्यकरणाध्येतृमनस्यपि जायते यत् मूर्धन्यषकारादेशः कुत्र कुत्र कस्मिँश्च स्थितिविशेषे भवित इति। यतो हि वर्तमानकाले नवीनव्याकरणपरम्परामाध्यमेन व्याकरणस्य अध्ययनं प्रमुखतया भवति। तस्यां नवीनाध्ययनपरम्परायां 'वैयाकरणसिद्धान्तकौमुदी' इत्येव सर्वस्वमस्ति। तत्र तु प्रसिद्धिरेव–

कौमुदी यदि नायाति वृथा भाष्ये परिश्रमः।
कौमुदी यदि चायाति वृथा भाष्ये परिश्रमः।।

इति तु सत्यमेवाभिहितम्। किन्तु अष्टाध्यायीमधिकृत्य

---

2 निव्यभिभ्योऽड्व्यवाये वा छन्दसि (8 । 3 । 117)।

व्याकरणाध्ययनस्य या सा प्राचीनपरम्परा वर्तते, तां विना मूर्धन्यादेशसदृशः शाब्दिकप्रसङ्गः सर्वथा दुरूह एव विद्यते। यतो हि व्याकरणस्य नवीनाध्ययनपरम्पराधारभूता सा वैयाकरणसिद्धान्तकौमुदी मूर्धन्यषकारादेशप्रसङ्गं बहुप्रकरणेषु आदधाना वैयाकरणानां कृते मूर्धन्यषकारादेशावबोधनाय नूनं क्लिष्टतामुत्पादयति। अतः मूर्धन्यषकारादेशेऽनभ्यस्ता नवीना विद्वांसोऽपाणिनीयं प्रयोगं कृत्वा संस्कृतं दूषयन्ति। यथा हि– 'अयष्पथगन्त्र्या हैदरपुराख्ये स्थानके तस्मिन् दिने महान् जनसम्मर्द आसीत्' इति।[1] अत्र 'अयष्पथ' शब्दो निश्चितमपाणिनीय इति। यतो हि व्यवहारे पाणिनेः शास्त्रस्यैव प्रवृत्तिः सम्प्रति सर्वतोभावेनाङ्गी कृता, अतः नवीनशब्दनिर्माणाय संस्कृते यदि कापि परमावश्यकता अनुभूयते तदा पणिनिदिशैव शब्दनिर्माणप्रक्रिया विधेया, अन्यथा संस्कृतभाषायां बहुविसङ्गतयोऽज्ञातावशादागमिष्यन्ति। तासां च परिमार्जनं बहुकष्टकरं भविष्यति। अथवा कदाचित् पणिनीयं विहाय अपरशब्दशास्त्रस्य रचनाऽपेक्षिता भवितेति मन्ये। अस्माकं पांणिनीयं शास्त्रं सर्वप्रकारेण परिपूर्णमस्ति। अतः विद्वद्भिः तस्मादेव आधुनिकयुगेऽपि संस्कृते नवशब्द–निर्माणं कर्तव्यमिति। संस्कृतभाषां प्रति छन्दः प्रति च पाणिनीये यो मूर्धन्यषकारादेशस्य विधिः निषेधश्च प्रतिपादितः स तु नास्ति सरलः, नास्ति संक्षिप्तः। अतः भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुद्या अनेकप्रकरणे मूर्धन्यषकारादेशप्रसङ्गो निरूपितः। तत्राभ्यासः सुकरो नास्ति, तस्माद् बालानां प्रबोधायाभ्यासाय च पाणिनीयमूर्धन्यषकारादेशोऽत्रैकत्र विमर्शित इति।

❑

---

1 अजस्रा – संकल्पः। वर्षः 15, अङ्कौ 3–4, 1996। अखिल–भारतीय–संस्कृतपरिषद्, लखनऊ

[5]

व्यधिकरणबहुव्रीहिसमीक्षा

सम्प्रति कैश्चिदाधुनिकैः संस्कृतविद्वद्भिः पाणिनिव्याकरणपरम्परायामेव समानाधिकरणबहुव्रीहिवद् व्यधिकरणबहुव्रीहिः सर्वत्रैव प्रयोगेऽङ्गीक्रियते यत्र कुत्रापि व्यधिकरणबहुव्रीहिः समानाधिकरणबहुव्रीहिवत् प्रयोक्तव्यः,इत्याधुनिकविदुषामभिमतम्। यथाहि इलाहाबादविश्वविद्यालये संस्कृत विभागस्य पूर्वाध्यक्षेण तथा रायपुर विश्वविद्यालयस्य पूर्वकुलपतिना आचार्य बाबूरामसक्सेनामहोदयेन बहुव्रीहिसमासविषये निरूपितम्–'अस्य समासस्य द्वौ भेदो–समानाधिकरणबहुव्रीहिः व्यधिकरणबहुव्रीहिश्च। यत्र द्वयोः पदयोः सर्वेषु पदेषु वा एकाधिकरणं भवति, तत्रसमानाधिकरणबहुव्रीहिः यथा पीताम्बरः–पीतम् अम्बरं यस्य सः। यत्रद्वयोः पदयोः सर्वेषु पदेषु वा एकाधिकरणस्याभावः, तत्र व्यधिकरणबहुव्रीहिः। यथा–चन्द्रशेखरः–चन्द्रःशेखरे यस्य सः (शिवः) चक्रपाणिः– चक्रं पाणौ यस्य सः (विष्णुः), चन्द्रकान्तिः–चन्द्रस्य कान्तिवि कान्तिः यस्य सः, इति।[1] अस्य कथनस्याभिप्रायः–यत्रानेकं प्रथमान्तमन्यपदार्थे वर्तमानं वा समस्यते तत्र समानाधिकरणबहुव्रीहिः। यत्रानेकमप्रथमान्तमन्यपदार्थे वर्तमानं वा समस्यते तत्रव्यधिकरणबहुव्रीहिरिति अर्थाद् व्यधिकरणबहुव्रीहिसमासो यथाभिलषितं सर्वत्रैव करणीयः, इत्यनेन सिद्धं भवति। तथैव च स्वीकृत्य गजेन्द्रगडकरमहोदयेनापि 'अभिज्ञानशकुन्तलम्' इति पदस्य विग्रहः–अभिज्ञानेन शकुन्तला यस्मिन् तन्नाटकम् 'अभिज्ञानशकुन्तलम्' इति कृतम्[2]। इत्थं चैव अन्येऽपि केचिदाधुनिका विद्वांसः 'काव्यस्य प्रकाशो यस्मिन् स ग्रन्थः काव्यप्रकाशः इति व्यधिकरणबहुव्रीहिरिति स्वीकुर्वन्ति। एवं चान्येऽन्यत्रापि यथाभिलषितं व्यधिकरणबहुव्रीहिं नियोजयन्ति।

---

1 संस्कृतव्याकरणप्रवेशिका–बहुव्रीहि समास।

2 अभिज्ञानशाकुन्तल–नोट्स–एक्ट–1।गजेन्द्रगडकर।

व्यधिकरणबहुव्रीहिसमासो यथाभिलषितं सर्वत्र करणीयः, इत्याधुनिकविदुषां सिद्धान्ते किं मूलमिति तावच्चिन्तनीयम्।

अत्र तु आनन्दवर्धनः अभिनवगुप्तश्चेति आचार्यद्वयस्य वचनमेव प्रमुखं मूलं प्रतीयते। आनन्दवर्धनेन—यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ। व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः[1]।। इति कारिकाया वृत्तौ 'सूरिभिः कथितः' इति 'विद्वदुपज्ञेयमुक्तिः' इति पदन्यासः कृतः। अत्र 'विद्वदुपज्ञा' इति पदे तेन व्यधिकरणबहुव्रीहिसमासः कृत एव। अस्य विवेचने अभिनवगुप्तेनापि लोचनटीकायां विद्वद्भ्य उपज्ञा प्रथम उपक्रमो यस्याः उक्तेः' इति व्यधिकरणबहुव्रीहिः स्वीकृतः। इत्थम् आनन्दवर्धनस्य 'विद्वदुपज्ञा' इति पदेन तथा च अभिनवगुप्ताचार्यस्य तन्निर्वचनेन ज्ञायते यद् व्यधिकरणपदानां बहुव्रीहिसमासो यथाभिलषितं सवत्रैव करणीयः, इति।

अत्र तु आनन्दवर्धनस्य अभिनवगुप्तस्य च वचने किं प्रमाणम्, इति तावद्विचारणीयम्। तत्तु विचार्यते। आनन्दवर्धनस्य 'विद्वदुपज्ञा' इति वचने किमपि प्रमाणं नास्ति। तत्र अपाणिनीयत्वम्। 'विद्वदुपज्ञम्' इत्येव पाणिनीयम् 'पाणिन्युपज्ञं ग्रन्थः' इत्यादिवत्, 'उपज्ञोपक्रमं तदाद्याचिख्यासायाम्' (पा० 2–4–21) इति। 'विद्वदुपज्ञा' इति तु पाणिनिपरम्परायां कथमपि न सिध्यति। यतोहि अत्र तत्पुरुषसामर्थ्यं प्राप्नोति तथा च अनभिधानाद् बहुव्रीहिसामर्थ्याभावः। तथैव च अभिनवगुप्तस्य तन्निर्वचनं व्यधिकरणमूलकमपि अपाणिनीयम्। किन्तु पुनरपि आनन्दवर्धनस्य अभिनवगुप्तस्य चोक्तवचने किञ्चित् मूलं प्राप्नोति। तत्रतु कैयटमहोदयस्य 'कण्ठेकालः' इति। व्यधिकरणानां बहुव्रीहिः सप्तम्यन्तस्य पूर्वनिपातविधानेन ज्ञाप्यते[2]

---

1 ध्वन्यालोकः—1/13

2 वर्णो वर्णेन (पा० 2.1.68) इति सूत्रस्य 'समानाधिकारणसमासाद् बहुव्रीहिः' इति वार्तिकस्य भाष्ये प्रदीपटीकायाम्।

इति व्यधिकरणज्ञापकवचनं मूलं प्रतीयते। इदं कैयटवचनं ज्ञापकात् 'कण्ठेकालः' इत्यादौ क्वचिदेव न तु सर्वत्रैव व्यधिकरणबहुव्रीहिरिति प्रमाणयति। अर्थात् कैयटमहोदयेन क्वाचित्को व्यधिकरणबहुव्रीहिः स्वीकृतः। तेन प्रभावित आनन्दवर्धनः अभिनवगुप्तश्च सर्वत्रैव व्यधिकरणबहुव्रीहि–र्भवितव्य इति चिन्तितवन्तौ।

क्वाचित्को व्यधिकरणबहुव्रीहिरिति कैयटस्योक्तस्वीकृतौ किं प्रमाणमस्तीति चिन्त्यम्। तत्तु चिन्त्यते। 'सप्तमीविशेषणे बहुव्रीहौ' (पा0 2–2–35) इति सूत्रं क्वाचित्कव्यधिकरणबहुव्रीहौ प्रमाणमिति कैयटो ज्ञापयति। अनेन सूत्रेण ज्ञापितं यतः सप्तमीपदं बहुव्रीहौ भवति तस्मादेव व्यधिकरणबहुव्रीहिरिति कैयटस्याभिप्रायः। अस्य समर्थनं हेलाराजेन 'वज्रं पाणौ यस्य स इति वज्रपाणिः[1] इति कृतम्। नागेशभट्टमहोदयेनापि ज्ञापकात् क्वाचित्को व्याधिकरणबहुव्रीहिः कैयटदिशा समर्थितः। तथाहि 'सप्तमी विशेषणे बहुव्रीहौ (पा0 2–2–35)' कण्ठेकाल इति। कण्ठे इत्यस्य कारकत्वात्कर्तृद्वारकसम्बन्धेनास्ति क्रियायामन्वयेन यथाकथञ्चित् सामर्थ्यमादाय समासप्रवृत्तिः वस्तुतोऽधिकरणकारकस्य कर्त्राद्यन्वयः इत्यस्येव सामर्थ्यमिति निरूपितं कारके। अत्र वैयधिकरण्येऽपि ज्ञापकात् समास इति बोध्यम्' इति बृहच्छब्देन्दुशेखरे। यद्यपि नागेशभट्टेनात्र कैय्यट–दिशैव व्यधिकरणबहुव्रीहिः ज्ञापितः, किन्तु अन्यत्र 'अव्ययानां च' इति वार्तिकप्रसंगे कैय्यटप्रतिपादितव्यधिकरणबहुव्रीहिरनादृतः। तथाहि– 'अव्ययानाञ्च' इति वार्तिके 'अव्ययानां च बहुव्रीहिर्वक्तव्यः। उच्चैर्मुखममस्येति उच्चैर्मुखः' इति भाष्यम् । तत्र 'उच्चैः–शब्दस्याधिकरणप्रधानत्वाद्वैयधिकण्यम्[2] इत्यनेन वचनेन कैयटो व्यधिकरण–बहुव्रीहिं साध्नोति। परन्तु तत्रैव नागेशभट्टेन 'उच्चैर्मुख इत्यादौ उच्चैरित्यस्याधिकरणशक्तिप्रधानेऽपि वृत्तावाधेयप्रधानत्वात्

---

1 वाक्यपदीयम्–वृत्तिसमुद्देशः–212, प्रकाशव्याख्या।

2 प्रदीपटीका।

सामानाधिकरण्यम्[1] इत्युक्त्वा कैयटस्य तद्विषयकं खण्डनं विधाय समानाधिकरणबहुव्रीहिरभ्यर्थितः। अनेन ज्ञायते यद् यादृशी रुचिः कैयटस्य क्वाचित्कव्यधिकरणबहुव्रीहौ तादृशी नागेशभट्टस्य नास्तीति। नागेशभट्टस्य क्वाचित्कव्यधिकरणबहुव्रीहेः क्षेत्रवृद्धावरुचिः।

कैयटमहोदयस्य समकालिकेन हरदत्तमिश्रेण तु व्यधिकरणपदो बहुव्रीहिः स्वीकृतः। तथाहि – 'अनेकमन्यपदार्थे (पा0 2–2–24)। अन्यग्रहणं बहुव्रीहितत्पुरुषयोः विषयविभागार्थम्, असति तस्मिन् 'कण्ठेकालः' इत्यादौ व्यधिकरणपदे सावकाशं बहुव्रीहिं स्वपदार्थ इव नीलोत्पलं सर इत्यादौ समानाधिकरणे तत्पुरुषो बाधेत। ......उच्चैर्मुखः' इति। उच्चैसोऽधिकरण प्रधानत्वाद् वैयधिकरण्याद्वचनम्। 'सप्तम्युपमान' इति। सप्तम्युपमानवाचि च पूर्वपदं यस्य तस्य शब्दान्तरेण समासः तत्रस्थोत्तरपदस्य लोप इत्यर्थः। 'कण्ठेस्थः' इति पाठे तु सप्तमीतियोगविभागात् समासः। समानाधिकरणत्वात् समासे सिद्धे वचनमुत्तरपदलोपार्थम्। तेन वैयधिकरण्येऽप्यत्र गमकत्वमस्तीति प्रदर्श्यते। 'उष्ट्रमुखमिव' इति। अवयवधर्मेण समुदायव्यपदेशाद् उष्टस्योपमानतेत्यपूर्वपदमुष्ट्रमुखशब्दः, अत्रोपमानोपमेययोः वैयधिकरण्यवद् वचनमुत्तरपदलोपार्थं च। 'उष्ट्रमुखः' इति उष्ट्रो मुखमस्येति विग्रहः, न च प्राणी प्राण्यन्तरस्य मुखमित्युपपद्यत इति, सामर्थ्यात् सादृश्यावगतिः, मुखे न च मुखस्य सादृश्यं प्रसिद्धमित्युष्ट्रमुखमिव मुखमस्येत्ययमर्थो भवति। तस्मादुत्तरपदलोपो न वक्तव्यः[2]। 'सप्तमीविशेषणे बहुव्रीहौ (पा0 2–2–35)–'कण्ठेकालः' इति। यदा कण्ठे किञ्चिदस्तीति निर्ज्ञाते काल इति विशेषणं प्रयुज्यते तदा सप्तमीग्रहणेन प्रयोजनम्, अन्यदा तु विशेषणत्वादेव सिद्धम्[3]।'

---

1 बृहच्छब्देन्दुशेखरः।

2 पदमञ्जरी–अनेकमन्यपदार्थे (पा0 2.2.24)।

3 पदमञ्जरी–सप्तमीविशेषणे बहुव्रीहौ (पा0 2.2.35)

अत्र हरदत्तमिश्रमते 'सप्तमीविशेषणे बहुव्रीहौ (पा0 2–2–35) इति सूत्रं व्यधिकरणबहुव्रीहिज्ञापकं नास्ति, अपि तु 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' 'अव्ययानां च' इति वार्तिकद्वयमेव तज्ज्ञापकम्। तथा चं व्यधिकरणबहुव्रीहिरिति पदस्याभिप्रायः व्यधिकरणपदो बहुव्रीहिः, न तु व्यधिकरणानां बहुव्रीहिरिति। अर्थात् तत्र व्यधिकरणानां पदानां समानाधिकरणमुखेन समसनाद् व्यधिकरणपदो बहुव्रीहिः। समासे त्वत्र केवलं व्यधिकरणपदं दृश्यते, किन्तु तदपि समानाधिकरणपदवाचकम्। तथा हि कण्ठेस्थः काल यस्य स कण्ठेकाल इति। हरदत्तमिश्रस्याभिप्रायः 'कण्ठे कालः यस्य सः' इति विग्रहे, नास्ति, इति तु 'सप्तमीविशेषणे बहुव्रीहौ' (पा0 2–2–35) इत्यस्य व्याख्यानेन 'यदा कण्ठे किञ्चिदस्तीति निर्ज्ञाते काल इति विशेषणं प्रयुज्यते तदा सप्तमीग्रहणेन प्रयोजनम्, अन्यदा तु विशेषणत्वादेव सिद्धम्' इत्यनेन ज्ञायते। अत्र 'यदा कण्ठे किञ्चिदस्तीति निर्ज्ञाते' इत्यंशस्याभिप्रायः 'कण्ठेस्थः इत्येव न तु 'कण्ठे' इति।

अत्र हरदत्तमिश्रस्योक्तविवेचनं तु हरदत्तमिश्रात् पूर्ववर्तिनो जिनेन्द्रबुद्धेः सम्मतमेवास्ति। आचार्येण जिनेन्द्रबुद्धिपादेन काशिकाया 'न्यास' इति टीकायां व्यधिकरणानां पदानां समानाधिकरणमुखेन समसनाद् व्यधिकरणबहुव्रीहिः प्रतिपादितः। स तु क्वाचित्क एव। सर्वत्र तु समानाधिकरणानां पदानां समसनाद् बहुव्रीहिः, क्वचित् 'कण्ठेकालः' इत्यादौ तु व्यधिकरणानां पदानां समानाधिकरणमुखेन समसनाद् बहुव्रीहिः शब्दशक्तिस्वभावाद् भवति। यतो हि शब्दशक्तयः प्रतिनियिताश्रयाः क्वचिदेव प्रवर्तन्ते न च तासां प्रवर्तना यथाभिलषितं सर्वत्र भवितुं शक्नोति। तथा हि – 'बहुव्रीहिः समानाधिकरणानाम्, इत्यादि। समानाधिकरणानां पदानां बहुव्रीहिर्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। किमर्थमित्याह – 'व्यधिकरणानां मा भूद्' इति। तत्रेदं व्याख्यानम्–अभिधानलक्षणा हि कृत्तद्धितसमासा भवन्ति, न च व्यधिकरणानां बहुव्रीहौ कृते विवक्षितार्थाभिधानमस्ति। न हि पञ्चभिर्भुक्तमस्येति वाक्यादयोऽर्थः प्रतीयते स पञ्चभुक्तशब्दात्।

तस्मादनभिधानाद् व्यधिकरणानां बहुव्रीहिर्न भविष्यति। यत्रत्वभिधानमस्ति तत्र वैयधिकरण्येऽपि भवत्येव समासः—कण्ठेकाल इति। 'अव्ययानां च' इति। बहुव्रीहिर्भवतीति सम्बन्धनीयम्। चकारादनव्ययानां च क्वचित्। असमानाधिकरणार्थमिदम्। उच्चैर्मुख इति। उच्चैःशब्दस्याव्ययस्यासत्ववाचित्वात् सत्त्ववाचिना मुखशब्देन नास्ति सामानाधिकरण्यम्, तथापि गमकत्वात् समासो भवत्येव। अनव्ययानामुदाहरणम्—कण्ठेस्थितः कालो यस्येति स कण्ठेकाल इत्येवमादि। कथं पुनस्तुल्येऽपि वैयधिकरण्ये पदानां क्वचिद् बहुव्रीहेर्गमकत्वं भवति? क्वचिन्न भवति? शब्दशक्तिस्वभावात्। शब्दशक्तयश्च प्रतिनियताश्रयाः क्वचिदेव प्रवर्तन्ते न सर्वत्र' इति जिनेन्द्रबुद्धिपादः[1]।

जिनेन्द्रबुद्धिपादेन 'सप्तमीविशेषणे बहुव्रीहौ (पा0 2–2–35) इति तु व्यधिकरणज्ञापकं नास्तीति स्वीकृतम्। तेनात्र गुणवचनेन सह समास इत्येवाङ्गीकृतम्। तथा हि – 'गुणवचनेन सह समासः सोऽस्य विषयः। यत्र तु द्रव्यवाचिना तत्रसर्वनामसंख्ययोर्विशेषणत्वादेव पूर्वनिपातः सिद्ध इति[2]।'

श्रीभट्टोजिदीक्षितेनापि कैयटं विहाय जिनेन्द्रबुद्धि–हरदत्तमिश्रवद् व्यधिकरणबहुव्रीहिरुररीकृतः। किन्तु तेन 'अव्ययानां च' 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' इति वार्तिकद्वयं व्यधिकरणबहुव्रीहिज्ञापकमस्वीकृत्य 'सप्तमीविशेषणे बहुव्रीहौ' (पा0 2–2–35) इत्येव व्यधिकरणबहुव्रीहिज्ञापकमिति मन्यते। तथा हि – 'सप्तमीविशेषणेबहुव्रीहौ' (पा0 2–2–35) सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यम्। कण्ठेकालः। अतएव ज्ञापकाद् व्यधिकरणपदो बहुव्रीहिः।[3] भट्टोजिदीक्षितेनास्या वृत्तेः व्याख्या कृता–'कण्ठेकाल इति। यदा कण्ठे

---

1 न्यासः—अनेकमन्यपदार्थे (पा0 2.2.24)।

2 न्यासः—सप्तमीविशेषणे बहुव्रीहौ (पा0 2.2.35)

3 सिद्धान्तकौमुदी—बहुव्रीहिप्रकरणम्।

किञ्चिदस्तीति निर्ज्ञाते काल इति विशेषणं तदेदं बोध्यम्। अन्यदा तु सप्तमीग्रहणं विनापि विशेषणत्वादेव सिद्धम्[1]। इदं तु हरदत्तमिश्रस्यैव वचनं तदेव भट्टोजिदीक्षितेन निजं कृत्वा उल्लिख्यते। दृश्यतां तावद् हरदत्तमिश्रस्य वचनम् 'कण्ठेकाल इति। यदा कण्ठे किञ्चिदस्तीति निर्ज्ञाते काल इति विशेषणं प्रयुज्यते तदा सप्तमीग्रहणेन प्रयोजनम्। अन्यदा तु विशेषणत्वादेव सिद्धमिति[2]। अत्र भट्टोजिदीक्षितेन 'प्रयुज्यते तदा सप्तमीग्रहणेन प्रयोजन्' इति स्थाने 'तदेदं बोध्यम्' इत्येव केवलं स्वकीयं नियोजितम्। किन्तु भट्टोजिदीक्षितस्याभिप्रायः हरदत्तमिश्रानुसारी वर्तते। यथा हि – यदा कण्ठे किञ्चिदस्तीति निर्ज्ञातं भवति तदेत्यनेन 'कण्ठेस्थः' इत्येव सिद्धं भवति, न तु 'कण्ठे' इति। तदा तु 'कण्ठेस्थः' इत्यस्य गुणवाचकत्वात् 'कालः' इत्यनेन विशेषणेन सह समासोऽन्यपदार्थे भवितुं शक्नोति। कण्ठेस्थः कालो यस्य स कण्ठेकाल इति। 'सप्तमीविशेषणे बहुव्रीहौ (पा0 2–2–35) इति तु सप्तम्यन्तव्यधिकरणपदघटितपदस्य 'कण्ठेस्थः' इत्यस्य पूर्वनिपातः। पुनश्च 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' इति वार्तिकेन 'कण्ठेस्थः' इति पदस्योत्तरपदं 'स्थः' इत्यस्य लोपात् 'कण्ठेकाल' इति लोकप्रसिद्धपदं सिध्यति। भट्टोजिदीक्षितमहोदयेन 'कण्ठेकालः' इत्यस्य पदस्य विग्रहः 'कण्ठेकालः यस्य सः' इति तु कुत्रापि न कृतम्। अत एव 'ज्ञापकाद् व्यधिकरणपदो बहुव्रीहिः' इति तस्य वचनं 'सप्तम्यन्तादिव्यधिकरणपदघटितसमासगर्भो बहुव्रीहिः' इति भावं प्रकटयति। दीक्षितमहोदयस्याशयः 'व्यधिकरणानां बहुव्रीहिः' इति निर्वचने कथमपि नास्ति। तथा सति तु 'समानाधिकरणानां बहुव्रीहिः' इति भाष्यकारवचनेन सह विरोधो जायते। भाष्यकारवचनस्य विरोधो भट्टोजिदीतिस्य नाभीष्टः। तत्कृते भाष्यकारस्य वचनं सर्वाधिकं

---

1 प्रौढमनोरमा–सप्तमीविशेषणे बहुव्रीहौ (पा0 2.2.35)

2 पदमञ्जरी–सप्तमीविशेषणे बहुव्रीहौ (पा0 2.2.35)

प्रामाणकिम्। तथैव तेनोक्तम्–'यथोत्तरं मुनीनां प्रामाण्यम्' इति।[1]

वार्तिककारेण कात्यायनेन महाभाष्यकारेण पतञ्जलिना च समानाधिकरणबहुव्रीहिरेव साधितः। यथा हि 'अनेकमन्यपदार्थे (पा० 2–2–24) इत्यत्र 'बहुव्रीहिः समानाधिकरणानाम्' इति वार्तिकम्। तत्र 'समानाधिकरणानां बहुव्रीहिर्वक्तव्यः। किं प्रयोजनम्? व्यधिकरणानां मा भूदिति। पञ्चभिर्भुक्तमस्येति भाष्यम्। इत्थमत्र वार्तिककारेण महाभाष्यकारेण च पाणिनि–परम्परायां समानाधिकरणानां बहुव्रीहिरित्येव स्वीकृतम्। तयोर्निर्वचनेन कुत्रापि व्यधिकरणानां बहुव्रीहिर्न भवति। यत्र कुत्रापि बहुव्रीहौ यद् व्यधिकरणपदं दृश्यते तदपि समानाधिकरणपदस्य द्योतकमेव। अस्मिन् प्रसङ्ंगे कानिचिद् वार्तिकानि महाभाष्यवचनानि च द्रष्टव्यानि। यथा हि – 'अव्ययानां ' इति वार्तिकम्। अत्र अव्ययानां च बहुव्रीहिर्वक्तव्यः। उच्चैर्मुखमस्येति उच्चैर्मुखः, नीचैर्मुखः' इति भाष्यम्। 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' इति वार्तिकम्। अत्र सप्तमीपूर्वस्योपमानपूर्वस्य च बहुव्रीहिर्वक्तव्यः, उत्तरपदस्य च लोपो वक्तव्यः। कण्ठेस्थः कालोऽस्य कण्ठेकालः। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः। खरमुखः।' इति भाष्यम्। 'समुदाय–विकारषष्ठ्याश्च' इति वार्तिकम्। अत्र 'समुदायविकारषष्ठ्याश्च बहुव्रीहिर्वक्तव्यः। उत्तरपदस्य लोपो वक्तव्यः। केशसमाहारश्चूडा अस्य केशचूडः। सुवर्णविकारोऽलंकारो यस्य सुवर्णालंकारः' इति भाष्यम्। 'प्रादिभ्यो धातुजस्य वा' इति वार्तिकम्। अत्र 'प्रादिभ्यो धातुजस्य बहुव्रीहिर्वक्तव्यः। उत्तरपदस्य च लोपो वक्तव्यः। प्रपतितपर्णः प्रपर्णः। प्रपतितपलाशः प्रपलाशः। इति भाष्यम्। 'नञोऽस्त्यर्थानांच' इति वार्तिकम्। अत्र नञोस्त्यर्थानां बहुव्रीहिर्वक्तव्यः। उत्तरपदस्य च वा लोपो वक्तव्यः। अविद्यमानः पुत्रोऽस्य अविद्यमानपुत्रः अपुत्रः। अविद्यमानभार्यः अभार्यः। इति भाष्यम्।

---

1 सिद्धान्तकौमुदी–न बहुव्रीहौ (पा० 1.1.29)–वृत्तिः।

'तत्तर्हीदं बहु वक्तव्यम्' इत्याक्षेपभाष्यम्। 'न वाऽनभिधानादसमानाधिकरणेषु समाससंज्ञाभावः' इति परिगणननिराकरणवार्तिकम्। अत्रा'न वा वक्तव्यम्। असमानाधिकरणानां बहुव्रीहिः कस्मान्न भवति? अनभिधानात्। तच्चावश्यमनभिधानमाश्रयितव्यम्। क्रियमाणेऽपि परिगणने यत्राभिधानं न भवति तत्र न बहुव्रीहिः। यथा पञ्च भुक्तवन्तोऽस्ये'ति भाष्यम्।

इत्थमत्र वार्तिककारेण महाभाष्यकारेण च संसूचितं यत् सर्वत्रैव समानाधिकरणानामेव बहुव्रीहिर्भवति। अनभिधानाद् व्यधिकरणबहुव्रीहिर्निभवति। अस्याशयस्तु–यतो हि महर्षिपाणिनिनाव्यधिकरणबहुव्रीहेरभिधानं न कृतम्, तेन तु 'शेषो बहुव्रीहिः' (पा0 2–2–'23) 'अनेकमन्यपदार्थे' (पा0 2–2–24) इति सूत्रद्वयेन समानाधिकरणबहुव्रीहेरभिधानं कृतमेवास्ति। अत एव व्यधिकरणबहुव्रीहेरवसर एव नास्ति। तस्मात् 'सप्तमीविशेषणे बहुव्रीहौ (पा0 2–2–35) इति सूत्रं तु कात्यायन–पतञ्जलिदृष्टौ व्यधिकरणबहुव्रीहेर्ज्ञापकमेव न भवति।

श्रीवामनजयादित्यविरचितायां पाणिनीयाष्टाध्यायीसूत्रवृत्तौ काशिकायामपि ज्ञापकाद् व्यधिकरणबहुव्रीहिरिति तु नोक्तम्। तथा हि – 'सप्तमीविशेषणे बहुव्रीहौ (पा0 2–2–35) सर्वोपसर्जनत्वाद् बहुव्रीहेरनियमे प्राप्ते नियमार्थं वचनम्। सप्तम्यन्तं विशेषणं च बहुब्रीहिसमासे पूर्वं प्रयोक्तव्यम्। कण्ठेकालः। उरसिलोमः। विशेषणम्–चित्रगुः। शबलगुः। इति काशिकायाम्। अनेन ज्ञायते यत् सूत्रे सप्तमीति पदं समासे पूर्वनिपातनाय न तु व्यधिकरणज्ञापनाय, इति बोध्यम्। अत्रतु 'कण्ठेकालः' इत्यादौ 'कण्ठे' इति पदं 'कण्ठेस्थः' इति पदस्य द्योतकम्। तथा सति च समासस्य सार्थकता साक्षात् क्रियान्वयेन प्राप्यते। कण्ठेकालः यस्येत्यत्र साक्षात् क्रियान्वयाभावः। तस्मात् समास–सामर्थ्याभावः, वाक्यसामर्थ्यादिति।

भर्तृहरिणा स्वकीये वाक्यपदीये ग्रन्थे पाणिनीयव्याकरणस्य दार्शनिक विवेचनं महता प्रयत्नेन प्रस्तूयते स्म। तेनापि चान्यपदार्थे समानाधिकरणानां बहुव्रीहिरित्येव संस्थापितम्। तथाहि–

यथा स्वशब्दाभिहिते चैत्रार्थे न प्रयुज्यते।

चैत्रशब्दो बहुव्रीहावप्रयोगस्तथा भवेत्।।[1]

अत्र 'इहान्यपदार्थे बहुव्रीहिरन्वाख्यायते। ततश्च तेनैवान्यपदार्थस्योक्तत्वाद् द्वन्द्व इव च शब्दस्य तदभिधायिनश्चैत्रादेः प्रयोगो न प्राप्नोति। तद्यथा चैत्रशब्देनोक्ते स्वार्थे पुनश्चैत्रशब्दो न प्रयुज्यते। उक्तार्थानां ह्यप्रयोगः। यदुक्तं वार्तिके– 'पदार्थाभिधानेऽनुप्रयोगानुपपत्तिरभिहितत्वाद्' इति। अत्र परिहारोऽभिहितः–'न वाऽनभिहितत्वात्, सामान्याभिधाने हि विशेषाभिधानम्' इति हेलाराजः प्रकाशव्याख्यायाम्। अत्र स्पष्टं प्रतीयते यद् अन्यपदार्थः विशेष्यम्, बहुव्रीहिः विशेषणम्। अतएव विशेषणविशेष्ययोः सामानाधिकरण्यं भवत्येव। एतत् सर्वमग्रे प्रतिपाद्यते –

यथा गौरिति शुक्लादेरविधानं न विद्यते।

एवं यस्याभिसम्बन्धो गोभिस्तावत् प्रतीयते।।[2]

अत्र'सम्बन्धिसामान्ये बहुव्रीहिरिति तद्विशेषप्रतिपत्तिरतो न भवति। तद्यथा – सामान्यवाची गोशब्दो विशेषाभिधानायाऽसमर्थः, इति प्रयुज्यते। विशेषप्रतिपत्तये शब्दः, तत्रगौः शुक्लः कृष्णो वेत्यादिः। एवं चित्रश्चैत्रो मैत्रो वा इति प्रयोगो विशेषप्रतिपत्तये न्याय्यः। चित्रा गावो यस्येति स्वामिमात्रस्य प्रतीतेः' इति हेलाराजः प्रकाशव्याख्यायाम्।

भर्तृहरिणा बहुव्रीहौ सामानाधिकरण्यमत्यन्तमावश्यकमिति स्वीकृतम्। भेदेन अर्थाद् असामान्याधिकरण्येन सलिङ्गस्य ससंख्यस्य पदार्थस्यागतिरेवेति तेन स्पष्टं घोषितम्–

---

1 वाक्यपदीयम्–वृत्तिसमुद्देशः, 210।

2 तत्रैव, 211

भेदेन तु विवक्षायां सामान्ये वा विवक्षिते ।

सलिङ्गस्य ससंख्यस्य पदार्थस्यागतिर्भवेत् ।[1]

अत्र 'सम्बन्धिनो व्यतिरेकेण यदा सम्बन्धस्य बहुव्रीहिणा प्रतिपादनमिष्टम्, तदा द्रव्येणासामानाधिकरण्यात् तल्लिङ्गसंख्ययोर योगात् कृत्स्नस्य पदार्थस्यागतिरुक्ता' इति हेलाराजः प्रकाशव्याख्यायाम्। तथैव चात्र'यदा वृत्तिवाच्यस्य सम्बन्धस्य सम्बन्धिनो भेदेन तु बहुव्रीहिणा प्रतिपादनं वक्तुरिष्टम्, तदा स्वाश्रयेण द्रव्येण वृत्तिवाच्यस्य सम्बन्धस्य असामानाधिकरण्यात् सम्बन्धिलिङ्गसंख्ययोः सम्बन्धे वृत्तिवाच्येऽयोगात् कृत्स्नस्य पदार्थस्यागतिर्ज्ञानाभावः 'उक्तः' इति रघुनाथशर्मा अम्बाकर्त्र्याम्।

इत्थं विवेचनेन सुस्पष्टं भवति यत् पाणिनिपरम्परायां सर्वप्रथमं वार्तिककारेण कात्यायनेनोद्घोषितमेव–समानाधिकरणानां बहुव्रीहिः' इति। अर्थात् समानाधिकरणानां पदानां समसनाद् बहुव्रीहिसमासो भवति। तथैव महाभाष्यकारेण पतञ्जलिनापि 'समानाधिकरणानां बहुव्रीहिर्वक्तव्यः। व्यधिकरणानां मा भूदिति निर्दिष्टम्। तत्पश्चात् काशिकाकारयोः वाक्यपदीयकारस्य च मतः समानाधिकरणनां बहुव्रीहिरिति। वार्तिककारादीनामिदमपि मतं यद् यत्र कुत्रापि 'कण्ठेकालः' इत्यादौ यत् 'कण्ठे' इत्यादि सम्तम्यन्तादिव्यधिकरणमुखेन समासत्वात् सामानाधिकरण्यमेव प्राप्नोति।अतएव वार्तिककाराद्याचार्यैः बहुव्रीहिसमासे नामोल्लेख एव व्यधिकरणपदस्य न क्रियते। यतो हि तत्र नामोल्लेखे सति व्यधिकरणानामपि बहुव्रीहिः स्यादिति भ्रमः कालान्तरे कदाचिद् भवितुं शक्नोति। किन्तु स एव भ्रमः कालान्तरे जिनेन्द्रबुद्धिपादनिर्वचनविधिना न्यासाद् आरभ्य अद्यावधि विविधग्रन्थेषु बद्धमूलो दृश्यते। यतो हि जिनेन्द्रबुद्धिपादेन न्यासे क्वाचित्को व्यधिकरणपदो बहुब्रीहिः संसूचितः।[2]

---

1 तत्रैव 212 ।

2 न्यासः–अनेकमन्यपदार्थे (पा0 2.2.24)

अस्याभिप्रायोस्ति–यद्यपि समानाधिकरणानां बहुव्रीहिः किन्तु क्वचित् समानाधिकरणाधायकपदस्य लोपे सति समासे व्यधिकरणपदं दृश्यते, यथा 'कण्ठेकालः' इत्यादि। तत्परवर्तिनः केचिद् आचार्याः तस्मात् परिभ्रान्ताः क्वाचित्को व्यधिकरणानां बहुब्रीहिरिति तथा च केचिदन्येऽप्याधुनिकाः सार्वत्रिको व्यधिकरणानां बहुव्रीहिरिति मन्यन्ते।

इत्थं बहुव्रीहिविषये चत्वारः पक्षाः प्राचीनकालाद् आधुनिककालं यावत् प्राप्यन्ते। तथा हि –

1. समानाधिकरणानां बहुव्रीहिरिति प्रथमः पक्षः

अस्मिन् पक्षे बहुव्रीहिसमासे तस्य विग्रहवाक्ये च सर्वत्रैव सामानाधिकरण्यं भवति। अत्रयथा – कण्ठेस्थः कालः यस्य स कण्ठेकालः। समासे 'कण्ठे' इति पदं 'कण्ठेस्थः' इत्यस्य प्रत्यायकम्। तस्मात् 'कालः' इति पदेन सह तस्य सामानाधिकरण्यमेव सम्पद्यते। अस्य प्रमुखौ समर्थकौ कात्यायनः पतञ्जलिश्च।

2. क्वाचित्को व्यधिकरणपदो बहुव्रीहिरिति द्वितीयः पक्षः

अस्मिन् पक्षे तु वैयधिकरण्यं समासे दृश्यते, किन्तु विग्रहवाक्ये सामानाधिकरण्यं संजायते। अत्र व्यधिकरणानां समानाधिकरणमुखेन समासः। यथा–कण्ठेस्थः कालः यस्य स कण्ठेकालः। अत्र समासे कण्ठकालपदयोः वैयधिकरण्यं प्रतीयते, किन्तु विग्रहवाक्ये सामानाधिकरण्यमेवास्ति। अयं समासः क्वाचित्कः। अस्य प्रमुखाः पक्षधराः जिनेन्द्रबुद्धिहरदत्तभट्टोजिदीक्षिताः।

3. क्वाचित्को व्यधिकरणानां बहुव्रीहिरिति तृतीयः पक्षः

अस्मिन् पक्षे बहुव्रीहिसमासे तस्य विग्रहवाक्ये च क्वचिद् वैयधिकरण्यं स्पष्टमुपलक्ष्यते। यथा – कण्ठे कालः यस्य स कण्ठेकालः। अस्य प्रमुखौ पक्षकौ कैयटः नागेशभट्टश्चेति। अयमपि समासः क्वाचित्कः।

4. सार्वत्रिको व्यधिकरणानां बहुव्रीहिरिति चतुर्थः पक्षः

अस्मिन् पक्षे समासे तस्य विग्रहवाक्येऽपि च यथाभिलषितं सर्वत्र वैयधिकरण्यं सन्दृश्यते। यथा – विद्वद्भ्य उपज्ञा यस्याः सा विद्वदुपज्ञा (उक्तिः) अस्य प्रमुखौ पोषिणौ आनन्दवर्धनः अभिनवगुप्तश्चेति।

अनेन प्रकारेण चतुर्षु पक्षेषु कतमः पक्षः समुचितः, तस्य ग्रहणे कोक्तिरिति विचार्यते। अत्र 'सार्वत्रिको व्यधिकरणानां बहुव्रीहिः' इति यश्चतुर्थपक्षः तस्य मूलं 'क्वाचित्को व्यधिकरणानां बहुव्रीहिः' इति तृतीयः पक्षः । यदि क्वाचित्को व्यधिकरणबहुव्रीहिः स्यात् तदा सार्वत्रिको व्यधिकरणबहुव्रीहिःकथं न स्यादित्यधिकृत्यैव चतुर्थः पक्षः संस्थापितः, इति।

अयं पक्षस्तु सर्वथाऽसंगतः, एव। अस्य ग्रहणेन तत्पुरुषसमासेऽपि सर्वत्रैव व्यधिकरणबहुव्रीहेः प्रसक्तिः स्यादिति। यथा राज्ञः पुरुषो यस्य स राजपुरूषः चैत्रः, इति। नीलो घटो यस्य स नीलघटः मैत्रः, इति। अनेन तु पाणिनिपरम्परया प्राप्तं समासगतसामर्थ्यं विहाय किञ्चित् तद्भिन्नसामर्थ्यकल्पनं ह्यनर्थकारित्वादनुचितमेव। अत एव चतुर्थोऽयं पक्षोऽपाणिनीयत्वादश्रद्धेय इति।

अत्र क्वाचित्को व्यधिकरणानां बहुव्रीहिः' इति यस्तृतीयः पक्षः, तस्य मूलं 'क्वाचित्को व्यधिकरणपदो बहुव्रीहिः' इति द्वितीयः पक्षः । यदि समासे क्वचिद् व्यधिकरणपदं दृश्यते तदा विग्रहेऽपि तस्य स्थितिः कथं न भवेदित्यधिकृत्यैव तृतीयः पक्षः समुल्लसितः। तस्य कृते 'सप्तमीविशेषणे बहुव्रीहौ' (पा0 2–2–35) इति सूत्रे सप्तमीतिपदं 'व्यधिकरणानामपि बहुव्रीहिः' इति ज्ञापयति। अत्र ज्ञापकता लाघवार्थं स्वीकृता। यतो हि कण्ठे कालः यस्य स कण्ठेकालः, इत्यत्र यल्लाघवं प्राप्यते तल्लाघवं कण्ठेस्थः कालः यस्य स कण्ठेकालः, इत्यत्र नास्तीति। अत एव लाघवार्थं ज्ञापकता कर्तव्येति चेत्, तन्न। इयं लाघवमूलकज्ञापकता त्वनर्थकारिणी। यतो हि तया क्वाचित्को व्यधिकरणबहुव्रीहिरिति ज्ञापितम्। किन्तु सैव ज्ञापकता

कालान्तरे सार्वत्रिको व्यधिकरणानां बहुव्रीहिरित्यस्य कारणमभवत्। तया तु पाणिनिप्रतिपादितमसमासगतसामर्थ्यं कुपरिणमितम्। अतः तत्पुरुषस्य सामर्थ्ये बहुव्रीहिसामर्थ्यं बहुव्रीहेः सामर्थ्ये तत्पुरुषसामर्थ्यमिति मत्वा केचिद् आधुनिकाः सर्वत्र व्यधिकरणवादिनः स्वयं भ्रान्ताः परानपि च भ्रामयन्ति। तस्मात् कारणात् सर्वथाऽनर्थकारित्वाल्लाघवमूलिका व्यधिकरणबहुव्रीहिज्ञापकता तत्र न कर्तव्या।

अत्र 'क्वाचित्को व्यधिकरणपदो बहुव्रीहिः' 'इति यो द्वितीयः पक्षः, तस्य मूलं 'समानाधिकरणानां बहुब्रीहिः 'इति प्रथमः पक्षः। प्रथमपक्षस्य स्पष्टार्थमेव द्वितीयपक्षस्य संस्थापना संजायते। द्वितीयपक्षस्य स्पष्टाशयः–समासे विग्रह–वाक्ये च सर्वत्र सामानाधिकरण्यमेव, किन्तु क्वचित् समासे वैयधिकरण्यं प्रतीयते। तद्वैयधिकरण्यं कल्पितमेव, तत्रतु स्वाभाविकं सामानाधिकरण्यं विद्यते। यद्यपि द्वितीयपक्षोऽयं प्रथमपक्षस्य स्पष्टार्थाय व्याख्यानम्। परन्तु तस्य तृतीयपक्षेऽतिव्याप्तिर्जायते। अतोऽतिव्याप्तिदोषत्वात् सोऽपि द्वितीयपक्षोऽग्राह्यः।

अत्र 'समानाधिकरणानां बहुव्रीहिः' इति प्रथमः पक्षः सर्वथा निर्भ्रान्तिमूलको बहुव्रीहिविषयकपाणिनीयसिद्धान्तान्वितश्चास्ति। तत्रैव 'शेषो बहुव्रीहिः' (पा0 2–2–23), 'अनेकमन्यपदार्थे' (पा0 2–2–24) इति सूत्रद्वयस्य सार्थकतापि वर्तते। सर्वेषां तथोक्तानां त्रयाणां भ्रान्तपक्षाणां भ्रमसमाधानमपि तत्रैवास्ति। अतः प्रेक्षावद्भिः वार्तिककारादिसम्मतः प्रथमः पक्षो व्यवहारे ग्रहणीयः। कात्यायनः पतञ्जलिश्च पाणिनेः नातिदूरकालिकावाचार्यौ स्तः। अतो याथातथ्यं पाणिनीयव्याकरणं ताभ्यां यथा सुविज्ञातं सुचिन्तितं निरुक्तं च न तथा कैश्चिदन्यैः तत्परिवर्तिभिराचार्यै रिति। पाणिनीयव्याकरणनिर्वचने यादृशी प्रामाणिकता कात्यायनपतञ्जल्योः न तादृशी प्रामाणिकता तत्परवर्तिनामाचार्याणां

परिलक्ष्यते। तथा हि स्वयं कैयटेन 'यथोत्तरं हि मुनित्रयस्य प्रामाण्यम्' इति स्वीकृतमेव।[1] तस्मात् परमप्रमाणभूतस्य पतञ्जलेः 'समानाधिकरणानां बहुव्रीहिर्वक्तव्यः। व्यधिकरणानां मा भूत्' इति वचनं बहुव्रीहौ प्रामाणिकं मन्तव्यमिति।

कात्यायनपतजलिभ्यां पाणिनीव्याकरणसिद्धान्तानां सूक्ष्मातिसूक्ष्मविवेचनं पूर्णमननपूर्वकं कृतमेवेत्यत्र नास्ति कश्चित् संदेहः। तयोर्दृष्टौ 'सप्तमीविशेषणे बहुव्रीहौ' (पा0 2–2–35) इत्यपि सूत्रमासीदेव, किन्तु ताभ्यां तत्र व्यधिकरणबहुव्रीहेर्ज्ञापकता नोच्चारिता। तया तु सर्वथाऽनर्थकत्वं संजायते। सर्वत्र भ्रमाद् व्यधिकरणानां बहुव्रीहिर्भविष्यति, इत्यनर्थकत्वम्। यथा कालान्तरे क्वाचित्कं व्यधिकरणबहुव्रीहिं विहाय सार्वत्रिको व्यधिकरणबहुव्रीहिरिति सम्प्रति क्रियते एव। तस्मात् तु सर्वत्रैव तत्पुरुषाधिकारे बहुव्रीहेरधिकारो बहुव्रीह्यधिकारे तत्पुरुषस्याधिकारः, इत्यनर्थकत्वं पाणिनिविरुद्धमुद्भूतमेव। किन्तु तन्नाभीष्टम्।

'सप्तमीविशेषणे बहुव्रीहौ' (पा0 2–2–35) इति सूत्रं व्यधिकरणबहुव्रीहिं न ज्ञापयति, किन्तु तद्भिन्नं किचिदन्यं प्रकटयति। इदं सूत्रं बहुव्रीहौ फलितत्वात् 'शेषो बहुव्रीहिः' (पा0 2–2–23), 'अनेकमन्यपदार्थे' (पा0 2–2–24) इति द्वाभ्यां सूत्राभ्यां सह सम्बद्धम्। तद् द्वयोः सूत्रयोः सार्थकतासिद्धौ तस्य द्वावर्थौ भवतः। सप्तम्यन्तपदं विशेषणपदं च कृते बहुव्रीहौ क्रमशः क्वचित् पूर्वं निपात्येते, इति प्रथमोऽर्थः। यथा 'कण्ठेकाल' इति कृते बहुव्रीहौ। सप्तम्यन्तादिघटितपदं गुणवाचिविशेषणपदं च बहुव्रीहौ चिकीर्षिते क्रमशः पूर्वं निपात्येते। यथा कण्ठेस्थः कालो यस्येति बहुव्रीहौ चिकीर्षिते। यत्राभिप्रायः—द्विविधमत्र विशेषणं स्वीकर्तव्यम्। स्वाभाविकम्, कृत्रिमं चेति। तत्र 'कालः' इत्यादि गुणवाचि स्वाभाविकं विशेषणम्। यत्रबहुव्रीहौ चिकीर्षिते तद्द्वयोर्विशेषणपदयोरकेत्र प्रसक्तिर्भवेत्

---

1 न बहुव्रीहौ (पा0 1.1.29)—प्रदीपः।

तत्र तु कृत्रिमविशेषणपदस्य पूर्वनिपतः कर्तव्य इति सूत्रकारस्याऽभीष्टम् ।तथा च सूत्रकारस्याऽभीष्टसिद्धौ वार्तिककारेण 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' इति वार्तिकम्, तथा च महाभाष्यकारेण 'सप्तमीपूर्वस्योपमानपूर्वस्य च बहुव्रीहिर्वक्तव्यः। उत्तरपदस्य च लोपो वक्तव्यः। कण्ठेस्थः कालोऽस्य कण्ठेकालः। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः। खरमुखः' इति भाष्यवचनं प्रस्तुतम्। अत्र यद्यपि गौरवं दृश्यते, परन्तु तत् किञ्चिदर्थकारि, न त्वनर्थकारीति। यतोहि 'कण्ठे कालः तिष्ठति' इति व्यपेक्षाभावसामर्थ्यापन्नं वाक्यं कथंचित् 'कण्ठेकाल' इति एकार्थीभावसामर्थ्यापन्नं संज्ञापदं निर्माति। 'कण्ठेस्थः' इति पदे सत्येव 'तिष्ठति' इति क्रियापदस्य साक्षात् प्रतीतिर्भवति। 'कण्ठे' इत्यनेन तु केवलमधिकरणस्यैव बोधो जायते। लोके 'कण्ठेकालः' इत्येव पदं व्यवहृतम्। अतः 'स्थः' इत्यस्य तत्र लोप आवश्यकः। किन्तु लोपे सत्यपि यः शिष्यते स लुप्यमानार्थाभिधायीति वचनेन लुप्यमानस्य 'स्थः' इति पदस्य प्रतीतिर्भवत्येव। तस्मात् कण्ठेकालः' इति पदं 'कण्ठेस्थकालः' इत्यस्यैव बोधकम्। तेनैव तु 'कण्ठेकालः तिष्ठति' इति वाक्यं प्रत्यक्षं फलितं भवति। अत एवात्र कण्ठेस्थः कालोयस्य स कण्ठेकालः, इत्थमेव समानाधिकरणां बहुव्रीहिः गौरवेणापि, अर्थकारित्वाद् ग्राह्य। तथा च कण्ठे कालो यस्य स कण्ठेकाल, इत्थं व्यधिकरणानां बहुव्रीहिः लाघवेनापि, अनर्थकारित्वादग्राह्यः।

अतो निर्गलितोऽयमर्थो यत् त्रिमुनिव्याकरणसम्मतस्तु समानाधिकरणानां बहुव्रीहिरित्येव, क्वचिदपि व्यधिकरणानां बहुव्रीहिर्न भवति। तस्मात्तु कण्ठेकालः, उरसिलोम':, वज्रपाणिः, चक्रपाणिः, चन्द्रशेखरश्चेत्यादौ समानाधिकरणानामेव बहुव्रीहिरिति। क्रमेण तेषां विग्रहः प्रस्तूयते।'कण्ठेकालःइति।'सुपिस्थः' (पा० 3–2–4) इति कः। कण्ठे तिष्ठतीतिकण्ठेस्थः ।अत्रोपपदसमासः। 'अमूर्धमस्तकात् स्वाङ्गादकामे' (पा० 6–3–12) इत्यनेन सप्तम्या अलुक् । तदा 'कण्ठेस्थः' इति समस्तपदम्। पुनश्च कालपदेन तस्य बहुव्रीहिसमासः। ततश्च 'सुपो

धातुप्रातिपदिकयोः' (पा० 2–4–71) इत्यनेन सुपो लुक्। 'कण्ठेस्थकालः' इति। अत्र कण्ठेस्थ इत्येतद् बहुव्रीहेः पूर्वपदं सप्तम्यन्तं तत्र यदुत्तरपदं 'स्थः' इति तस्य लोपः 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' इति। तदा कण्ठेकालः। अत्र सप्तम्यन्तपदघटितसमासपूर्वकः समानाधिकरणबहुब्रीहिरेवास्ति। तथैव च 'उरसिलोमः' इति।

'वज्रपाणिः' इति। अत्र 'सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परवचनम्' इति वार्तिकेन गड्वादिभ्यः परा सप्तमी भवति। शेषं पूर्ववत्। तथाहि पाणौस्थं वज्रं यस्य स पाणौस्थवज्रः। 'स्थम्' इत्यस्य लोपः। पाणौवज्रः। समासे सप्तम्याः परनिपातनाद् 'वज्रपाणौ' इति। अन्यपदार्थस्य प्रथमान्तविशेषणत्वाद् 'वज्रपाणिः इति। विशेषणानां चाजातेः' (पा० 1–2–52)। तथैव चक्रपाणिः, चन्द्रशेखरश्चेति। किन्तु 'चन्द्रशेखरः' इत्यस्य विग्रहः चन्द्रःशेखरो यस्य सः' इति श्रीभट्टोजिदीक्षितस्य पुत्रेण श्रीभानुजिदीक्षितेन अमरकोशस्य सुधाव्याख्यायां 'चन्द्रशेखरः' इति शब्दस्य व्युत्पादने कृतः।

❑

[6]

'ङमो ह्रस्वादचि ङमुण् नित्यम्' इत्यस्य विमर्शः

आचार्यपाणिनिना 'ङमो ह्रस्वादचि ङमुण् नित्यम्' इत्यस्य प्रयोगः 'अष्टाध्यायी' (8 ।3 ।32) इत्यत्रसंहिताधिकारे सुविहितः। संहितेति किम्? 'परः सन्निकर्षः संहिता' (1 ।4 ।109) इति। 'दूरानात्मोत्तमाः पराः' इत्यमरः। तस्मात् 'परः' इत्यतिशयित इति। 'सन्निकर्षः' इति सामीप्यम्, प्रत्यासत्तिः, संश्लेषश्चेति ज्ञेयम्। किन्तु संश्लेषार्थोऽत्र न ग्राह्योभवति, तस्य वर्णेष्वसम्भवात्। संश्लेषो ह्येककालानां भवति, न वर्णानामेककालतापत्तिः, क्रमेणेच्चारितत्वादुच्चारितप्रध्वंसितत्वात्। सत्यामपि चैक कालतायां न सम्भवत्येव वर्णानां संश्लेषः। तथा हि – संश्लेषः संयोगतो वा स्यात्, समवायतोवा, तत्रपूर्वो द्रव्यस्यैव स्यात्, न तुशब्दस्य निर्गुणा गुणा इति कृत्वा। इतरोऽपि नैव शब्दस्य सम्भवति नहि वर्णो वर्णे समवैति, शब्दस्याकाशसमवायित्वात्, इतिन्यासः। पूर्ववर्णोच्चारणानन्तरमेव यद्वर्णान्तरमुच्चार्यते न तु तच्छून्यान्तरालसद्भावः स पर उत्कृष्टः सन्निकर्षः प्रत्यासत्तिलक्षणः संहितासंज्ञ इति सूत्रार्थः, इति प्रदीपः। वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्, इति सिद्धान्तकौमुदी। परः अतिशयितः सामीप्यम् अर्धमात्राधिककालव्यवधानाभावः, अर्धमात्राकालाव्यवधानस्य अवर्जनीयत्वात्, इति 'परः सन्निकर्षः' इत्यत्राबालमनोरमा। परो यः सन्निकर्षो वर्णानामर्धमात्राकालव्यवधानं स संहितासंज्ञो भवति, इति काशिका। अत्र सर्वेषां नवीनानां व्याख्यानानां काशिकैवोपजीव्यमिति मन्ये। महाभाष्येतु 'परः सन्निकर्षः संहिता' इत्यत्र व्याख्यानकाठिन्यं वर्तते, किन्तु भाष्यमनुसृत्यैव काशिकाकारेण काशिकावृत्तिः सरलतयात्र संपादिता। अतः काशिकोपजीव्यं महाभाष्यमिति।

इत्थं 'ङमो ह्रस्वादचि ङमुण् नित्यम्' इत्यस्यार्थः – 'संहितायां विषये ह्रस्वात्परो यो ङम् तदन्तात्पदात् परस्याचो ङमुडागमो नित्यं भवेत्' इति। अत्रसंहितायाम्' (6 ।1 ।72) इत्यनुवृत्तिः । अधिकरणसप्तम्येषा । अधिकरणं त्रिविधम्–व्यापकम्, औपश्लेषिकम्, वैषयिकम्, इति। व्यापकमिति। यथा–दध्नि सर्पिः, तिलेषु तैलमिति। औपश्लेषिकमिति। कटे तिष्ठति, काश्यां वसतीति। वैषयिकमिति। यथा–खे शकुनयः, इत्यत्र आकाशकल्पित देशसम्बन्धाद् वैषयिकत्वम्। गुरौ वसति इत्यत्रापि वैषयिकमधिकरणत्वं बोध्यम्। यतो हि शिष्यस्य गुर्वधीनायां वृत्तौ इति। अत्र विषयसप्तमी ज्ञेया। 'संज्ञायां विषये' इति। महाभाष्ये 'ङमोह्रस्वादचि' इत्यत्र'संहितायाम्' इत्यस्यानुवृत्तेरुल्लेखो नास्ति। तथैव च काशिकायामपि। काशिकायां 'संहितायाम्' इत्यस्यानुवृत्तिरधिकारवशात् 'अनुदात्तं पदमेकवर्जम् (6 ।1 ।158) इति यावत् व्यवस्थिता। सिद्धान्तकौमुद्यामपि 'संहितायाम्' इत्यस्यानुवृत्तिः 'ङमोह्रस्वादचि' इत्यत्र भविता न वेति वृत्तावुल्लेखो नास्ति। तथैव तस्या विविधटीकास्वपि तदुल्लेखो न विद्यते। 'इको यणचि' इत्यत्र यथा 'संहितायाम्' इत्यस्यानुवृत्तिः सुविहिता तथैव 'ङमोह्रस्वादचि' इत्यत्रापि विस्पष्टार्थं सा विधेया। तस्याभावे शङ्का भवति यद् 'ङमोह्रस्वादचि' इत्यत्र संहिताविषयता प्राप्यते न वेति। सूत्राणां क्रमः समालोचनेन ज्ञायते यत् 'संहितायाम्' इत्यस्याधिकारः 'अष्टाध्यायी' इत्यस्य अष्टमाध्यायपर्यन्तं प्राप्यते, नतु केवलम् 'अनुदात्तं पदमेकवर्जम्' (6 ।1 ।158) इतियावत्। यतो हि 'संहितायाम्' (6 ।1 ।72) इतिसूत्रात् संहिता विषयता आरभते तथा च सा विषयता अष्टमाध्यायान्ता यथास्थानं वर्तत एव। अतो 'ङमो ह्रस्वादचिङमुण्नित्यम्' (8 ।3 ।32) इत्यत्र 'संहितायाम्' इत्यस्याधिकारस्तस्यानुवृत्तिरपि भवितेति नास्ति संदेहावसर इति। अन्यथा संहिताऽभावे ङमुडागमस्य कोऽपि प्रयोजनमेव नास्ति। संहिताया विवक्षायामेव तत्र ङमुडागमो नित्यमितिज्ञेयम्।

तत्र'नित्यम्' इत्यस्य कोऽर्थः? निश्चितार्थः पौनःपुन्यार्थो वेति

विचार्यते। 'अष्टाध्यायी' इत्यस्य सूत्राणां पौर्वापर्येण तत्र गतस्य 'नित्यम्' इत्यस्यार्थो निश्चीयते। अर्थात् सूत्रप्रयोगवशात् सर्वत्रैव 'नित्यम्' क्वचिद् अविचालिभावे निश्चितार्थे प्रमुखेऽर्थे, क्वचिद् आभीक्ष्ण्ये क्वाचित्के पौनः पुन्ये प्रायिके चेति गौणार्थे प्रयुक्तमिति मन्ये। तथैव महाभाष्यकारेण 'सिद्धे शब्दार्थ सम्बन्धे' इतिवार्तिके 'अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिभावेषु वर्तते। किं तर्हि? आभीक्ष्ण्येऽपि वर्तते। तद्यथा – नित्य प्रहसितो,नित्यप्रजल्पितः इतिपस्पशाह्निके प्रतिपादितमेव। तथा च तेन 'नित्यवीप्सयोः' (8।1।4) इत्यत्रापि 'अयं नित्यशब्दोऽस्त्येव कूटस्थेष्वविचालिषु भावेषु वर्तते। तद्यथा नित्या द्यौः, नित्या पृथिवी, नित्यमाकाशमिति। अस्त्याभीक्ष्ण्ये वर्तते। तद्यथा नित्यप्रहसितो नित्यजल्पितः' इति पुनः प्रतिष्ठापितमेव। भाष्यकारस्येदं पौनः पुन्येन नित्यमित्येतस्य निरूपणमेव विज्ञापयति यत् पाणिनीयशास्त्रे प्रयुक्तं 'नित्यं' इति सावधानं क्वचिद् अविचालिभावेषु क्वचिद् आभीक्ष्ण्ये स्वीकर्तव्यमिति। अर्थात् प्रसंगानुसारेण नित्यार्थाभिव्यक्त्यर्थमुभयोपादनमावश्यकमिति बोध्यम्। आभीक्ष्ण्यमिति। अभीक्ष्णमेव आभीक्ष्ण्यमिति स्वार्थे ष्यञ्। अभीक्ष्णमिति। 'अभिक्ष्णौति। 'क्ष्णु तेजने' (अ.प.से.)। बाहुलकाड्डमुः। 'अन्येषामपि दृश्यते' (6।3।137) इति दीर्घः। अभीक्ष्णं तु पौनः पुन्ये सर्वदार्थे च दृश्यते' इति रामाश्रमी। स्वार्थे बाहुलकात् प्रत्यया भवन्त्येव। तथा हि – 'अन्येऽपि स्वार्थिकाः प्रत्यया नित्यमिष्यन्ते' इति भाष्यवचनं भट्टोजिदीक्षितेन 'अषडक्ष' इत्यस्य वृत्तौ समुल्लिखितम्।

'ङमो ह्रस्वादचि ङमुण् नित्यम्' इत्यत्र किं नित्यमिति? प्रथमं तावद् भाष्यकारेणात्र किं प्रथितमिति वक्तव्यम्। तथा हि –'ङमुटि पदादिग्रहणं कर्तव्यम्। इह मा भूत्–दण्डिना शकटिनेति। तत्तर्हि वक्तव्यम्? न वक्तव्यम्। 'पदा'दिति वर्तते। एवमपि परमदण्डिना परमच्छत्रिणेत्यत्र प्राप्नोति। नैषदोषः। उक्तमेतत्–उत्तरपदत्वे चापदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति। एवमपि पदादिति वक्तव्यम्। यद्धि तत्प्रकृतं 'प्राक् सुपि कुत्सना'

दित्येवं तत्। एवं तर्हि ङम् एवायं ङमुट् क्रियते। कथम्? 'पदस्येति वर्तते।' 'ङम' इति च नैषा पच्चमी। का तर्हि? सम्बन्धषष्ठी। पदान्तस्य ङमो ङमुड्भवति ह्रस्वादुत्तरस्याचीति। यदि ङम एव ङमुट् क्रियते कुर्वन्नास्ते कृषन्नास्ते 'रषाभ्यां नोणः समानपदे (8।4।1) इति णत्वं प्राप्नोति। 'पदान्तस्यनेति प्रतिषेधो भविष्यति। पदान्तस्येत्युच्यते नैष पदान्तः। पदान्तभक्तः पदान्तग्रहणेन ग्राहिष्यते। एवमपि न सिध्यति। किं कारणम्? उक्तमेतत् 'न वा पदाधिकारस्य विशेषणत्वादिति। तेन दण्डिना शकटिनेत्यत्र प्राप्नोति। एवं तर्हि पद इतिवर्तते। क्व प्रकृतम् उञि च पदे (8।3।21) इति। इति भाष्यम्। अत्रावधेयं भवति यद् भाष्यकारेणान्यत् सर्वं प्रपञ्चितम्, किन्तु ङमुडागमः संहितायां भविष्यतीति, न वेति तथा च नित्यमित्यस्यात्र कोऽभिप्रायः, इति विस्पष्टं न कृतम्। तस्मादग्रेऽपि स्पष्टं केनापि आचार्येण नाभिहितम्। तथाहि काशिकारेण 'ह्रस्वात्परो योङम् तदन्तात्पदादुत्तरस्याचो ङमुडागमो भवति नित्यम्। ङणनेभ्यो यथासंख्यं ङणना भवन्ति। ङकारान्ताद् ङुट् – प्रत्यङ्ङास्ते। णकारान्ताण्णुट् – वण्णास्ते। वण्णवोचत्। नकारान्तान्नुट् – कुर्वन्नास्ते। कुर्वन्नान्ते। कुर्वन्नवोचत्। कृषन्नास्ते कृषन्नावोचत्। ङम इति किम्? त्वमास्से। ह्रस्वादिति किम्? प्राङास्ते। भवानास्ते। अचीति किम्? प्रत्यङ्करोति। इह परमदण्डिनौ परमदण्डिनेति उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधादुत्तरपदस्य पदत्वं नास्तीति ङमुण्नभवति। अथवा उञि च पद इत्यतः सप्तम्यन्तं पद इत्यनुवर्तते। तेन अजादौ पदे ङमुड् भवति।–' – इतिकाशिकायामुक्तमेव। किन्तु काशिकाकारेण सर्वथा भाष्यकारस्यानुगमनमत्र विहितम्। तेन 'संहितायाम्' (6।1।72) इत्यस्यानुवृत्तिः, नित्यमित्यस्य व्याख्यानं चेतिद्वयं नैव कृतम्।

काशिकाया व्याख्याकारेण जिनेन्द्रबुद्धिपादेन 'संहितायाम्' इत्यस्यानुवृत्तिं विहाय नित्यमित्यस्य व्याख्यानं कृतम्। तथा हि –'अथ

नित्यग्रहणं किमर्थम्, यथोत्तरसूत्रे (8 |3 |33) वाग्रहणादेव नित्यो विधिर्विज्ञास्यते? सत्यमेतत् पूर्वसूत्रेऽपि (8 |3 |31) नित्यत्वं विज्ञायेत। तस्मात् पूर्वसूत्रेषु 'हेमपरे वा' (8 |3 |26) इत्यतो 'वा' इत्यनुवर्तत इति ज्ञापनार्थं नित्यग्रहणम्' इति न्यासः। अत्र न्यासकारेण काशिकागतानि उदाहरणानि एव व्याख्यातानि। अपिचतेन नित्यमिति पूर्वसूत्रेषु 'वा' ग्रहणार्थमिति स्वीकृतम्। तस्मात्तु नित्यमिति नित्यविधिप्रतिपादकमित्येवास्तीति प्रतीयते। काशिकाया अपरेण व्याख्याकारेण हरदत्तमिश्रेण काशिकादिशैव सर्वं व्याख्यातम्। तेनापि 'संहितायाम्' इत्यस्य नैव चर्चा कृता, नैव च नित्यमित्यस्योल्लेखः कृत इति। तथैव प्रदीपे कैयटः, उद्योते नागेशश्च।

'ह्रस्वात् परो योङम् तदन्तं यत्पदं तस्मात् परस्याचो नित्यं ङमुडागमः स्यात् प्रत्यङ्ङात्मा, सुगण्णीशः, सन्नच्युतः, इति सिद्धान्तकौमुदी। 'नित्यग्रहणं विस्पष्टार्थम्। 'हेमपरेवा' (8 |3 |26) इति 'मय उञो वो वा' (8 |3 |33) इति च विकल्पद्वयस्य मध्ये पाठादेव नित्यत्वलाभात्।' इति प्रौढ़मनोरमा। इत्थं भट्टोजिदीक्षितेन विस्पष्टार्थं नित्यग्रहणं स्वीकृतम्। कस्य विस्पष्टार्थं नित्यग्रहणमिति तु स्पष्टं नाभिहितम्। किन्तु प्रत्यङ्ङात्माद्युदाहरणैः सुविज्ञायते यत् तस्य मतो ङमुडागमो निश्चित विधिरिति। तथैव च ज्ञानेन्द्र सरस्वतीमहोदयेनापि स्वीकृतम्– 'नित्यग्रहणं विस्पष्टार्थम्। 'हेमपरेवा' इति 'मय उञो वो वा' इति च विकल्पद्वयस्य मध्ये पाठादेव नित्यत्वलाभात्। नन्विह नित्यग्रहणाभावे 'हेमपरेवा' इति वा ग्रहणमुत्तरसूत्रेषु पञ्चस्वप्यनुवर्तते वा न वेति शङ्का स्यादितिचेत्सत्यम्। अत एव विस्पष्टार्थमित्युक्तं न तु व्यर्थमिति।' इति तत्वबोधिनी। तथैव वासुदेव दीक्षितमहोदयस्यापि निर्वचनम् 'हेमपरेवा, इति वाग्रहणानुवृत्तिशङ्काव्युदासार्थं नित्यग्रहणम्। इति बालमनोरमा।

'ङमो ह्रस्वादचि ङमुण् नित्यम्' इत्यत्र महामहोपाध्यायदाधिमथ पण्डितशिवदत्तशर्मणष्टिप्पणी प्राप्यते। तस्यां नित्यमिति प्रायः

पण्डितशिवदत्तशर्मणष्टिप्पणी प्राप्यते। तस्यां नित्यमिति प्रायः समानार्थकमिति प्रतिपादितम्। तथा हि – 'नित्यमिति। 'नित्यप्रहसितो नित्यप्रजल्पितः' इत्यादाविव 'नित्यवीप्सयोः' इत्यत्र भाष्ये नित्यपदस्याभीक्ष्ण्य वाचिकत्वेन प्रायः समानार्थकत्वं व्यवस्थापितम्। अतएव "तिङ्ङतिङः" "तस्मिन्नणिच" इत्यत्रङमुट्कृतः "सुप्तिङन्तम्" ''सनाद्यन्ता इत्यादौ ङमुड् न कृतः'' "सन्नन्तान्न सनिष्यते" इत्यत्र तु ङमुड्भावाभावौ।' इति टिप्पणी सिद्धान्तकौमुद्यां श्रीवेंकटेश्वर स्ट्रीममुद्रणालये 1982 तमे संवत्सरे मुद्रितायामुल्लिखिता। 'केचित्तु अनुबन्धो यो ङम् तदन्तात् पदादचो ङमुडागमे कामचारिता, अन्यत्रतु नित्यतेत्याहुः। इति टिप्पणी भीमसेनशास्त्रिणा 'लघुसिद्धान्त कौमुद्या भैमीव्याख्यायां "ङमोह्रस्वादचि ङमुण् नित्यम्" इत्यत्रोल्लिखिता।

'ङमोह्रस्वादचि' इत्यत्र विशिष्टं विवेचनं नित्यमित्यस्यैव वर्तते। ङमुडागमःकस्य भविष्यतीति तु भाष्यकारादिभिः सम्यग् निरूपितमेव। तत्तु पूर्वमस्भाभिर्वर्णितमेवास्ति। भाष्यकारेण सूत्रगतस्य नित्यमित्यस्य विवेचनं कथं न कृतमिति रहस्यविषयः प्रतीयते। भाष्यकारेण निश्चितविधिरिति कृत्वा ङमुडागमस्य भाष्ये तथा तूदाहरणान्यपि न प्रस्तुतानि यथा काशिकाकारेण क्रमश उल्लिखितानि, इत्यपि चिन्त्यम्। भाष्यकारः 'ङमो–ह्रस्वादचि इतिसूत्रस्य स्थितेः सुपरिचितोऽस्ति। तस्य बुद्धौ सूत्रगतस्य नित्यमित्यस्यार्थः 'आभीक्ष्ण्यम्' इति स्पष्टमेव। यतो हि पूर्वमेव भाष्यकारेण 'नित्यवीप्सयोः' इत्यत्र नित्यमिति आभीक्ष्ण्येऽपि भवतीति स्पष्टं कृतमेव। भाष्यकारस्य तथा नित्यपदस्यार्थप्रतिपादनं 'ङमोह्रस्वादचि ङमुण् नित्यम्' इत्यत्र प्राप्तस्य नित्यमित्यस्य कृतेऽपि भवेदिति विचिन्त्यैव पुनः तद्व्याख्यानं कृतम्। अन्यथा पस्पशाह्निके नित्यमित्यस्य कृतव्याख्यो भाष्यकारः 'नित्यवीप्सयोः' इत्यत्र पुनः तस्य, व्याख्याने व्यर्थमेव स्वमतिं चकार। इत्थं

भाष्यकारेण 'नित्यवीप्सयोः' इत्यत्र नित्येत्यस्य व्याख्यानमग्रवर्ति 'ङमो ह्रस्वादचि ङमुण् नित्यम्' इत्यस्य नित्यमिति मनसि निधायकृतमिति प्रतीयते। तस्मादेव भाष्यकारेण 'ङमोह्रस्वादचि' इत्यत्र नित्यमित्यस्य व्याख्यानं पुनर्न प्रस्तुतमिति मन्ये।

नित्य वीप्सयोः' इत्यत्र यथा प्रसंगात् नित्येति आभीक्ष्ण्ये, तथैव सूत्रक्रमानुरोधाद् 'ङमोह्रस्वादचि ङमुण् नित्यम्' इत्यत्रापि ङमुडागमे नित्यमिति आभीक्ष्ण्ये वर्तते। प्रथमं तावत् सूत्रक्रमोऽवलोकनीयः। तथा हि – 'हे मपरेवा (8 |3 |26), 'न परे नः' (8 |3 |27), 'ङ्णोः कुक्टुक्शरि' (8 |3 |28), 'डः सि धुट्' (8 |3 |29), 'नश्च' (8 |3 |30), 'शितुक्' (8 |3 |31), 'ङमोह्रस्वादचि ङमुण् नित्यम्' (8 |3 |32), 'मय उञो वो वा' (8 |3 |33) इत्यष्टौ सूत्राणि, येषां क्रमानुरोधेन 'ङमोह्रस्वादचि' इत्येतस्य, प्रायिक विधिरवगम्यते। उक्तेषु सूत्रेषु 'हेमपरेवा' इति प्रथमं सूत्रं यद् विभाषाविधिं प्रकटयति तथैव 'मय उञो वो वा' इति चान्तिमं सूत्रं तदपि विभाषाविधिं समुन्नयति। एतयोः सूत्रयोर्मध्ये केवलमेकं 'ङमोह्रस्वादचि' इति सूत्रं वर्तते यद् नित्यमिति स्वस्मिन् विधत्ते। इदमेव नित्यमिति अन्येषु मध्यपातिसूत्रेषु 'हे मपरेवा' इत्यस्य 'वा' इत्यस्यानुवृत्तिं कृत्वा तेषु विकल्पविधिं प्रतिपादयति तथा स्वस्मिन् प्रायोविधिं निरूपयति। तथैव 'सुप्तिङन्तं पदम्', इकोयणचि, 'सनाद्यन्ता धातवः' 'तस्मिन्निति निर्दिष्टे पूर्वस्य, 'तिङ्ङतिङः', 'तस्मिन्नणि च', 'सन्नन्तान्न सनिष्यते' इत्यत्र प्रायो ङमुडागमः स्पष्टमेव संस्थापितम्।

येषां ङमुडागमः सर्वथा निशिचितविधिरिति मतम्, तन्नोचितम्, पाणिनिप्रमाणाभावादिति। द्वयोः पदयोर्मध्ये संहिता सर्वथा विवक्षाधीनैव, कथं तत्र संहितेति निश्चितम्। तथा हि 'कुर्वन्नास्ते' इति। अत्र 'कुर्वन्' इति पृथक् पदम्, 'आस्ते' इति पृथक्। द्वयोः संहिता विवक्षाधीनेति। यदि कश्चित् 'कुर्वन् आस्ते' कुर्वनास्ते' वेति वदति तदा कः केन निवारयितुं समर्थः। यदा द्वयोः

पदयोः समासो विवक्षितः तदा संहिता निश्चितमेव भवितुमर्हति । तत्र ङमुडामो निश्चितमेव कर्तव्यमिति । यथा सुगण्णीश इति । सुगणाम् ईशः, इति षष्ठी तत्पुरुषः । यदि 'प्रत्यङ्ङात्मा' 'सन्नच्युतः' 'कुर्वन्नास्ते' 'भगवन्नत्र' इत्यादौ निश्चितं ङमुडागमविधिः स्वीक्रियते तदा तत्रत्या संहितापि निश्चितं स्वीकर्तव्या। यदि एवं स्यात् तदा संहिताविषयको 'वाक्ये संहिता विवक्षाधीना' इति प्रामाणिको नियम एवोच्छिन्नो भविष्यति । तथा हि–

संहितैकपदे नित्या नित्या धातूपसर्गयोः ।

नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ।।

यदि पाणिनेर्ङमुडागमो निश्चितविधिरिति मतं स्यात्तदा 'मय उञो वः' इति कृत्वा तदनन्तरं 'ङमोह्रस्वादचि ङमुण्नित्यम्' इत्यस्याभिधानं तेन सुविहितं भवेत् । यस्मात् 'हेमपरेवा' (8 |3 |26) इत्यतः 'मय उञो वः' (8 |3 |33) इतियावद् 'वा' इत्यस्यानुवृत्ति र्नित्यमित्यनेन सुकरतया स्यात् तथा च नित्यमिति 'निश्चितं ङमुडागमः' इत्यस्य प्रतिपादकं भवेदिति । किन्तु तथैव पाणिनिना न विहितम्, अपितु 'मय उञो वो वा इत्यस्मात् प्रागेव 'ङमोह्रस्वादचि ङमुण् नित्यम्' इत्युक्त्वा नित्यमित्यनेन, प्रायोविधिः सुसाधितः । तस्य प्रामाण्यम् – 'तस्मिन्निति (1 |1 |66) 'इको यणचि' (6 |1 |77), 'अनचिच' (8 |4 |47), 'तिङ्ङतिङः' (8 |1 |28), 'सुप्तिङन्तम्' (1 |4 |14) 'सनाद्यन्ताः' (3 |1 |32) 'सनाशंसभिक्षः' (3 |2 |168) 'सन्नन्तान्न सनिष्यते' (वार्तिकम्) इत्यत्र स्वयं पाणिनिना प्रस्तुतमेव। तस्मात् 'ङमोह्रस्वादचि ङमुण् नित्यम्' इत्यत्र ह्रस्वात् परो यो ङम् तदन्तं यत्पदं तस्मादुत्तरस्याचो नित्यं (प्रायः) ङमुडागमो भविष्यतीति ज्ञेयम् । अत्र 'ङमः' इति 'ङमुट्' इति उभयमपि प्रत्याहारग्रहणम् । उङिति प्रत्येकं ङकारादिभिः सम्बध्यते । तथा हि – ङुट्, णुट्, नुट् चेति त्रय आगमा भवन्ति । उकार उच्चारणार्थः । 'ट्' इत्संज्ञकः, 'हलन्त्यम्' (1 |3 |3) इति । ङमुडागमो यथासंख्यं प्रवर्तते । 'यथासंख्यमनुदेशः समानाम्' (1 |3 |10) इति । 'ङमः'

इत्यत्र पञ्चमी। 'अचि' इत्यत्र सप्तमी। 'उभय निर्देशे पञ्चमीनिदेशो बलीयान्' इति परिभाषया 'अचि' इति 'अचः' इति षष्ठ्यर्थौअतोऽचो ङमुडागम इति पञ्चमीनिर्देशाद् बोध्यम् । टित्वाद् आद्यवयव आगमः, 'आद्यन्तौ टकितौ' (1 ।1 ।45) इति । यत्र आगमोभवति तत्र प्रायः षष्ठ्येव भवति । अतः 'अचि' इत्यस्य 'अचः' इति विपरिणाम उचित एव । आगमः सदैव मित्रवदेव भवति । तथाहि – 'मित्रवदागमा भवन्ति' इति भाष्यम् । आगमाः प्रायः टित्, कित् मित्, इति । 'ङमुट्' इत्यादिः टित्, 'कुक्' इत्यादिः कित्, 'नुम्' इत्यादिः मित्, इति । सर्वे आगमाः संहिताया विषये एव भवन्ति । भट्टोजिदीक्षितेन संहिताकृते 'सन्धिः' इति पदं व्यवहृतम् । तथा हि – 'सन्धिप्रकरणम्' इति ।

□

पाणिनीये णत्वविमर्शः

आचार्यपाणिनिना स्वकीये 'अष्टाध्यायी' इति नामके ग्रन्थे 'रषाभ्यां नोणः समानपदे (8 |5 |1) इत्यारभ्य 'क्षुभ्नादिषु च' (8 |4 |39) इति यावद् एकोनचत्वारिंशत्सूत्रेषु रकारषकाराभ्यां परस्य नकारस्य णत्वं कुत्र भवति, कुत्र च न भवतीति निर्दिश्यते। 'रषाभ्याम्' इत्यत्र प्रतीयते यद् आचार्येण 'र' इति सामान्यमुपादीयते, अपेक्ष्यते वा। तस्माद् यः केवलो रेफः, यश्च ऋकारस्थः, तयोर्द्वयोरपि ग्रहणं भवतीति ज्ञेयम्। यतो हि आचार्येण 'क्षुभ्नादिषु' नृनमनशब्दः तृप्नोतिशब्दश्च पठ्येते। अतोऽत्र णत्वनिषेधो रश्रुतिसामान्यं बोधयति। तस्मात्तु ऋकारादपि णत्वं भवति–'मातृणाम्' इत्यादाविति विज्ञाप्यते। किन्तु वार्तिककारेण 'रषाभ्यां णत्वे ऋकारग्रहणम्' इत्युक्त्वा स्वतन्त्रमृकारग्रहणं कर्तव्यमित्युद्घोषितम्। किन्तु तत्र सूत्रे ऋकारग्रहणं न कर्तव्यम्, यतोहि ऋकारस्थाद्रेफाद् णत्वं भवितुं शक्नोतीति भाष्यकारस्याभिप्रायः, तथाहि–"रषाभ्यां णत्वे ऋकारग्रहणं कर्तव्यम्।" 'रषाभ्यां नोणः समानपदे' ऋकाराच्चे' ति वक्तव्यम्। इहापि यथा स्यात्– 'मातृणाम्' पितृणामिति। तत्तर्हि वक्तव्यम् ? न वक्तव्यम्। योऽसावृकारे रेफस्तदाश्रयं णत्वं भविष्यति।" अथ च महाभाष्यकारेण तत्रैव ऋकारस्याग्रहणादेव णत्वेऽनेके अन्ये विकल्पा अपि प्रस्तुताः। यथा–ऋकारग्रहणाभावे अड्व्यवायेऽपि णत्वम्, योगविभागाद् णत्वम्, ज्ञापकाद् णत्वं वा भवतीति। 'रषाभ्याम्' इत्यत्र भाष्यनिर्वचने कैयटेनापि विकल्पानङ्गीकृत्य रेफादेव ऋकास्य ग्रहणं भवति अथवा केवलं ज्ञापनादेव ऋकाराद् णत्वं भवत्येवेति 'प्रदीपे' प्रतिपादितम्। तथाहि–इदं ज्ञापकमृकारादपि नो णो भवतीत्यनुमापयति। अथवा वर्णैकदेशोऽपीह रेफो गृह्यते, रेफाकृतिर्वा निर्दिश्यते, भक्तिव्यवधानेऽपि वा णत्वं भवतीत्यनुमीयते।'

तथैव 'उद्योते' नागेशोऽपि स्वीकरोति। तथैव 'रषाभ्याम्' इत्यत्र काशिकाकारेणापि स्वीकृतम्। इत्थं ज्ञायते यद् वार्तिककारेणाऽत्र स्वतन्त्रमृकारग्रहणं रेफाद् व्यतिरिक्तं यत् कृतं तत् केवलं विष्पस्टार्थम्, न चाऽनुक्तदर्शनार्थम्। यतो हि सूत्रे ऋकारस्याग्रहणादपि प्रकरणाद् ऋकारग्रहणं भवत्येवेति। तथा कोऽपि दोषो न जायते। अग्रे तु नित्यानित्यसमानपदे णत्वं विमृश्यते।

पाणिनिनये नित्यसमानपदेऽनित्यसमानपदे च रषाभ्यां परस्य नस्य णत्वं विधीयते। तत्र त्विदं नित्यसमानपदम्, इदमनित्यसमानपदमिति कृत्वा तु नोक्तम्। पुनरपि सूत्रस्थशब्दप्रयोगेण विज्ञायते यद् इदं नित्यसमानपदस्थस्य नस्य णत्वम्, इदमनित्यसमानपदस्थस्य नस्य णत्वं विधीयत इति। यथाहि 'रषाभ्यां नो णः समानपदे' इति सूत्रे 'समानपदे' इति शब्दो नित्यसमानपदस्य परामर्शकः, तथैव 'पूर्वपदात् संज्ञायामगः' इतिसूत्रे 'पूर्वपदात्' इति शब्दोऽनित्यसमानपदस्य परामर्शको भवतीति संलक्ष्यते। कथं तौ द्वौ क्रमशो नित्यसमानपदस्य अनित्यसमानपदस्य च परामर्शकावित्यस्य विवेचनमग्रे विधास्यते।

नित्यसमानपदे णत्वम्

रकारषकाराभ्यां परस्य नकारस्य णत्वं भवति नित्यसमानपदे[1]। सूत्रे 'समानपदे' इत्यस्य यदुच्चारणं कृतं तस्मादेव नित्यसमानपद इति गृह्यते। अन्यथा तु सूत्रे समानशब्दग्रहणस्य वैयर्थ्यमेवास्ति। 'पदेऽपदेशे' (6।2।7) इत्यस्य सामर्थ्यादिवैकपदत्वे प्राप्ते किं पुनः सूत्रे समानपद इतिग्रहणेन? अतः समानपद इति ग्रहणे किञ्चिदन्यत् प्रयोजनमाचार्यस्य लक्ष्यते। तत्तु नित्यसमानपदलाभार्थमेव। किं नाम चात्र नित्यसमानपदमिति? यत् समानवमेव पदं तद् नित्यसमानपदमिति। एतदवधारणाबलेन समस्तं समानपदं नित्यसमानपदत्वं नाप्नोति। किन्तु

---

1 रषाभ्यां नो णः समानपदे (8।4।1)

यथा–तीर्णम्, शीर्णम्, जीर्णम्, कुष्णाति, पुष्णाति, मुष्णाति, यूष्णः, भूष्ण इति च समासाभावाद् नित्यसमानपदम्। रामनाम, गन्धर्वगानं चेत्यादि समस्तपदत्वाद् अनित्यसमानपदमिति। समासे समानपदत्वं वर्तते, किन्तु तत्र नित्यसमानपदत्वं न वर्तते। यतो हि समासे कदाचित् पूर्वोत्तरपदापेक्षा भवति, कदाचिन्न भवति। यदा हि समासे पूर्वोत्तरपदापेक्षा तदा तत्रं असमानपदत्वं भवति, यदा तत्र पूर्वोत्तरपदापेक्षाऽभांवस्तदा समानपदत्वमिति वाच्यम्। अतः समस्तपदे नित्यसमानपदत्वाभाव उपलक्ष्यते। अस्याभिप्रायः – यथा 'रामनाम' इति। अत्र अवयवापेक्षया रामेति पूर्वपदं नाथेति चोत्तरपदमिति, तस्मात् पूर्वोत्तरपदापेक्षया समासेऽसमानपदत्वमपि भवत्येव। इत्थं समासे यदा पूर्वोत्तरपदापेक्षा भवति, तदा पूर्वोत्तरपदविभागादसमानपदत्वं सिद्धम्, यदा समासे समुदायापेक्षा भवति, तदा पूर्वोत्तरपदविभागाभावात् समानपदत्वं प्रकटितमेव। अतः समासे नित्यसमानपदत्वं न प्राप्नोति। भाष्यकारोऽपि समस्तपदं न नित्यं समानपदमित्येव स्वीकरोति–'समानपद इत्युच्यते, न चैतत्समानपदम्। समासे कृते समानपदम्। समानपदमेव यन्नित्यं न चैतन्नित्यं समानपदमेव। किं वक्तव्यमेतत्? नहि। कथमनुच्यमानं गंस्यते? समानग्रहणसामर्थ्यात्, यदि हि यत्समानं चाऽसमानं च तत्र स्यात् समानग्रहणमनर्थकं स्यात्। इति महाभाष्ये, 'पूर्वपदात्संज्ञायामगः' (8।4।3) इति।

कालान्तरे चात्र भाष्यकारेण सुगृहीतं नित्यसमानपदम्, अखण्डपदमिति कृत्वा भट्टोजिदीक्षितादिभिः समर्थितम्। यथाहि – "रषाभ्याम्"।। 'पद इतीयतैव सामर्थ्यादेकपदत्वे लब्धेऽपि समानग्रहणं यत्समानमेव, अखण्डमिति यावत्। तत्र यथा स्यात्तेन समासे न भवति। रामनाम।' इति प्रौढमनोरमायाम्। अत्र भट्टोजिदीक्षितेनोल्लिखितम् अखण्डपदं भाष्यकारप्रतिपादितं नित्यपदं च अभिन्नमेव। द्वयोः प्रतिपाद्यविषयैकत्वं विद्यते। किन्तु भट्टोजिदीक्षितानुयायिभिरखण्डपदमेव सुपल्लवितम्। तस्य पल्लवने परिष्कारे वा तैस्तु रषना निमित्तनिमित्तीति

कृत्वा निर्दिश्यन्ते। निमित्ते रषौ, निमित्ती नकार इति। तैस्तु निमित्तनिमित्तीतिग्रहंणं काशिकातः कृतम्। तथाहि – रषाभ्यामित्यत्र काशिकायामुक्तमेव – 'रेफषकाराभ्यामुत्तरस्य नकारस्य णकारादेशो भवति समानपदस्थौ चेन्निमित्तनिमित्तिनौ भवतः' इति। भट्टोजिदीक्षितस्यानुयायिनां मध्ये नागेशभट्टस्य स्थानं सर्वोपरि विद्यते। अतस्तस्यैव वचनमग्रे तूदाह्रियते।

नागेशभट्टस्तु– रषाभ्याम् (8 ।4 ।1) निमित्तनिमित्तिनोरपदस्थ–योरसम्भवात् 'पदे' (6 । 2 ।7)इत्यनेन सामर्थ्यादेव पदत्वे लब्धे, समानग्रहणमखण्डत्वलाभार्थम्। तेन समासे न, 'रामनाम' इति। अखण्डत्वं चात्र निमित्ताऽनधिका रणनिमित्तिमत्पदाऽघटितत्वम्। तेन 'मातृभोगीणः' इत्यादौ णत्वसिद्धिः। केवलं 'भोगीन' इत्यस्य प्रत्ययमात्रस्य वा पदत्वाभावात् लोकेऽर्थबोधकत्वाभावाच्च। अतएव 'आचार्यादणत्वं च' (ग0 4 ।1 ।49) इति सार्थकम्। 'सुपर्वण' इत्यादिसिद्धये निमित्तानधिकरणेति। 'पद' शब्देन चाऽत्र लोकेऽर्थप्रतीतिकृदुच्यते, पद्यते बोध्यते इति व्युत्पत्तेर्लक्षणया वा। एवं च 'गन्धर्वगानम्' इत्यादौ 'गतिकारकोपपदानाम्' (प0 77) इति सुबुत्पत्तेः पूर्वं समासेऽपि, णत्वं न भवत्येव, इति बृहच्छब्देन्दुशेखरे।

अत्र नागेशभट्टस्य अखण्डत्वविषयकः 'निमित्ताऽनधिकरणनिमित्तमत्पदाऽघटितत्वम्' इति परिष्कारः सर्वथात्र अखण्डत्वप्रतिपादने महत्तमः। तेन तु 'मातृभोगीणः' इत्यादौ 'सुपर्वणा' इत्यादौ च णत्वसिद्धिरखण्डत्वेन भवति, तथैव आस्तीर्णम्, विशीर्णम्, अवगूर्णम्, इत्यत्रापि। 'मातृभोगीणः' इत्यत्रैका शङ्का वर्तते। कथमत्राऽखण्डपदत्वमस्ति। यतो हि मातृपदमेकं भोगीनपदमपरं चेति। इत्थं न शङ्कितव्यम्। मातुः भोगः मातृभोगः तस्मै हितः 'मातृभोगीणः' इति। 'मातृभोग' इत्यस्मात् न तु 'भोग' इत्यस्मादिति

'आत्मन्विश्वजनभोगोत्तरपदात्खः' (5।1।9) इत्यनेन खप्रत्ययः, 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' (7।1।2) इति खस्य 'ईन' भवति, ततो 'मातृभोगीनः' इति अखण्डपदं प्राप्यते। 'अटकुप्वाङ्' इत्यनेन नस्य णत्वं भवति। अत्राऽखण्डपदस्थौ निमित्तनिमित्तिनौ स्त एवेति। यत्र द्वावपि निमित्तनिमित्तिनौ समानपदस्थत्वं व्यभिचरतः, तत्र णत्वाभावो भवति यथा रामनाम। अत्र समासे निमित्तिनिमित्तनोरसमानपदे स्थितिः, तस्मात् समासे णत्वाभावः स्फुट एव। 'खारपायणः' इत्यादावपि चाखण्डत्वं प्राप्यते। खरं पिबतीति खरपः पाधातोः कप्रत्ययः, खरपः ऋषिविशेषः, खरपस्य गोत्रापत्यं खारपायणः। 'नडादिभ्यः फक्' (4।1।99) इति। अत्रापि निमित्तनिमित्तिनावखण्डपदस्थौ स्तः, तस्मान्नस्य णत्वं भवति। यद्यपि मातृभोगीणः, पितृभोगीणः, खारपायणः, इत्यादौ नस्य णत्वं 'अटकुप्वाङ्' इत्यनेन प्राप्यते, पुनरपि नागेशभट्टप्रतिपाद्यानुरोधादत्रैव तस्य निरूपणं कृतम्। अग्रे यथोचितं यथा स्थानं च 'अटकुप्वाङ्' इत्यनेन प्राप्तं नस्य णत्वं विस्तरेणोदाहरणमुखेन च निरूपयिष्यते।

नागेशभट्टेन काशिकामनुसृत्य निमित्तं निमित्तीति च पदं परिष्कारे दृढतया नियोजितम्। यथा हि पूर्वं कथितं रकारषकारौ निमित्ते, नकारः निमित्तीति। किन्तु कथं नकारो निमित्ती भवितुं शक्नोतीति विचार्यते। निमित्तं कारणं भवति, निमित्ती कार्यमिति। तस्मात् तु नस्य स्थानेणकारः कार्यत्वेन गृह्यते, तस्मान्निमित्ती णकारो न तु नकार इति। साधूक्तमेतद् भवति, साक्षान्निमित्तीणकार एव। किन्तु नस्य परिणामभूतो णकारः कार्यं भवति। तत्तुनकारादभिन्नमेव। अतो निमित्ती नकारो भवितुं शक्नोति लक्षणया, न तु साक्षादभिधयेति। तदुक्तं जिनेन्द्रबुद्धिपादेनं – 'अत्र निमित्तं रेफः षकारश्च। तन्निमित्तं यस्यास्तीति णत्वभावेन विपरिणतौ साध्यायां स निमित्ती नकारः' इति न्यासे 'रषाभ्याम्' इत्यत्र तथैव चोक्तं हरदत्तमिश्रेण – 'निमित्ते रषौ, निमित्ती नकारः। यद्यप्यसौ प्रागेव सिद्धस्वरूपः, तथापि तत्स्थाने भवतो णकारस्य यन्निमित्तम्, तस्यापि तेन सम्बन्धोऽस्त्येव। णकार

एव वा निमित्ती, तस्य तु विधानोत्तरकालं समानपदस्थत्वम्' इति तत्रैव पदमञ्जर्याम् यतो हि साक्षान्नकारो निमित्तीति भवितुं न शक्नोति, स तु लक्षणया गृह्यते, अतो भट्टोजिदीक्षितेन सन्देहनिवृत्त्यर्थं निमित्तनिमित्ती विहाय 'एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यादित्येवोक्त्वा रषाभ्याम्' इत्यस्य वृत्तौ स्पष्टोल्लेखो विहित इति। पुनरपि नागेशभट्टेन निमित्तानधिकरणनिमित्तिमत्पदाघटितत्वमखण्डत्वमि'त्यत्र, निमित्तनिमित्तीति यदुल्लिख्यते तत्तु परिष्कारे लाघवार्थं प्राज्ञवैयाकरणानामुद्बोधनार्थं चेति ज्ञेयम्। निश्चितं परिष्कारोऽयं वैयाकरणानां कृते विपत्तिकरः। अस्य परिष्कारस्य व्याख्याने भैरवमिश्रेण किञ्चिदधिकं क्लिष्टं प्रतिपादितम्। तथाहि – 'निमित्तानधिकरणनिमित्तिमत्पदघटितं यत्तद्भिन्नं यत्पदन्तदवयवत्वं यत्र द्वयोस्तत्रणत्वमित्यर्थः' इतिशब्दरत्नटीकाया व्याख्याने भैरवीटीकायाम्। इदं व्याख्यानं मघवामूलविडौजाटीकावत् परिलक्ष्यते। नागेशभट्टेन कृतोऽखण्डत्वविषयकपरिष्कारः सुकरतयेत्थमवबोध्यते – निमित्तानधिरणेति। निमित्तं यद्रेफादि तदनधिकरणभूतं यन्निमित्तिमन्नकारवद् यत्पदं धनवनादिकं तेनाऽघटितत्वमखण्डत्वमिति। अर्थादखण्डत्वं तत्रैव यत्र धनवनाद्युदासीनपदाऽघटितत्वम्। मातृभोगीणादौ विशीर्णादौ च तादृशाऽघटितत्वाद् अखण्डत्वं भवत्येवेति।

नागेशभट्टकृतोऽखण्डत्वविधायकपरिष्कारोऽत्र सर्वप्रकारेण निर्दुष्टोऽस्ति। निमित्तानधि करणनिमित्तिमत्पदाघटितत्वमखण्डत्वमित्यत्र विन्यस्तं प्रतिपदं सार्थकं वर्तते। अत्र पदे निमित्तानधिकरणेति विशेषणाऽभावे विशीर्णः,सुपर्वण चेत्यादौ णत्वानुपलब्धिः, पदे निमित्तिमदितिविशेषणाऽग्रहणे रामेण, हरिणा चेत्यादौ तूदासीनतादृशपदाऽघटितत्वेन णत्वसिद्धावपि विशीर्ण इत्यत्र तादृश 'वि' पदघटितत्वेन णत्वाऽनापत्तिः, तथैव 'सुपर्वणा' इत्यत्रापि, अपिच मातृभोगीणः पितृभोगीण इत्यत्रापि तादृशभोगपदघटितत्वेन णत्वाऽनुपलब्धिरेव। पदग्रहणाभावे तु मातृभोगीण इत्यादौ तादृशभोगीन

घटितत्वात्तत्त्वाऽप्राप्तिः, पदग्रहणे तु भोगीनेत्यस्य प्रत्ययमात्रस्य वा पदत्वाऽभावात्तत्त्वसिद्धिरेव भवतीति। अत्र तावद्विचारणीयं पदशब्देन किं गृह्यते – सुप्तिङन्तं पदमिति अथवा अर्थवन्मात्रमिति। न प्रथमः रामनाम गन्धर्वगानमित्यादौ सुबुत्पत्तेः प्रागेव समासे नामगानयोः पदत्वाभावेन तादृशोदासीन पदाऽघटितत्वेनाऽखण्डपदत्वेन णत्वापत्तेरिति। नापि द्वितीयः, रामेण, हरिणा, मातृभोगीणः इत्यादौ इननेनानामर्थवत्त्वेन तद्घटितत्वादखण्डपदत्वाभावेन णत्वाभाव इति, तस्मादत्र पदशब्देन लोकेऽर्थप्रतीतिकृदुच्यते। अर्थाद् विभक्तीतरानपेक्षया लोकेऽर्थविषयकबोध जनकमेव पदशब्देनोच्यते इति। ततस्तु 'मातृभोगीणः' इत्यत्र भोगीनेत्यस्य ईनस्य वा तादृशपदत्वाऽभावेन तद्घटितत्वेऽपि नाऽखण्डत्वहानिरिति ज्ञेयम्। अमुना प्रकारेण च रामनामादौ सुबुत्पत्तेः प्राक् समासेऽपि निमित्तान धिकरणनिमित्तिमदर्थवन्नाम पदघटितत्वान्नाऽखण्डपदत्वमिति बोध्यम्। तस्माद् रामनामादौ णत्वाभावः सुलभ एव।

केचित्तु[1] नागेशभट्टस्य परिष्कारेऽव्याप्तिं तथैव चाऽतिव्याप्तिं परिकल्पयन्ति। यथा हि 'नाथरघुणा' इत्यत्र निमित्ताऽनधि करणनिमित्तिमत्पदेन नाथेत्यनेन घटितत्वमस्त्येव। अतः समानपदत्वाऽभावाण्णत्वाऽभावो गंस्यते। कथं तत्र णत्वं भविष्यतीति। तत्र तु परिष्कारेऽव्याप्तिरेव। अपि च सर्वनरेणं, परमाग्नीध्रेणेत्यादौ निमित्ताऽनधिकरणनिमित्तिमत्पदाघटितत्वरूपसमानपदत्वसत्त्वाद् नरशब्दाऽवयवनकारस्य तथैवाऽग्नीशब्दस्य नकारस्य णत्वं स्यादिति त्वतिव्याप्तिरेव। अतः परिष्कारो न निर्दुष्टोऽस्ति, एतन्न वाच्यम्। यतो हि नागेशभट्टेन तादृशसमस्तपदेषु त्वखण्डत्वं न प्रतिपादितम्। अपितु तेन आस्तीर्णम्, अवगूर्णम्, सुपर्वणः, इत्यादौ

1 द्रष्टव्यम्– 'वादरत्नम्'

निमित्तनिमित्तिरहितोपसर्गपदघटितनिमित्तविशिष्टनिमित्तिमत्पदे तथा च निमित्तविशिष्टपदघटिततद्धितस्थनिमित्तिमत्पदे मातृभोगीणः, खारपायणः, इत्यादौ च समानत्वसिद्धयर्थं परिष्कारः कृत इति ज्ञेयम्। तीर्णः, यूष्णः, इत्यत्र तु स्वाभाविकं नित्यसमानपदत्वं भवत्येव। तथैव रामेण, रामाणाम्, इत्यादावपि। यतो हि महाभाष्यकारेण 'पूर्वपदात्' (8। 4। 2) इत्यत्र खारपायणः, मातृभोगीणः, इत्यादौ तद्धितान्तत्वान् नित्यसमानपदत्वं संकेतितम्। अतो नागेशभट्टेन तत्र अखण्डत्वप्रतिपादनार्थं परिष्कारः सन्दर्शितः। 'मातृभोगीण'' इत्यादावत्र तद्धितप्रत्ययबलेनैवाऽखण्डत्वं भवतीति। मातृभोगशब्दात् खप्रत्ययविधानेन तदर्थ विशिष्टस्वार्थबोधकत्वमेव तस्य अखण्डत्वम्, न तु भोगशब्दात्रार्थविशिष्टस्वार्थबोधकत्वमिति स्पष्टमेव। नाथरघुणा, करणप्रियः, इत्यत्र यण्णत्वं भवति तत्र नाथप्रियपदयोरखण्डत्वे कापि सार्थकता नास्ति । तत्र रघुणाकरणपदयोः स्वाभाविकमखण्डत्वं सिद्धमेव। इत्थं नागेशेनात्र अखण्डत्वप्रतिपदकः यः परिष्कार उद्भावितः, स तु केवलं मातृभोगीणः, विशीर्णः इत्यादावेवाऽखण्डत्वारोपणाय, नहि चान्यत्र। सर्वनरेणादौ यस्य नस्य णत्वं भवति तत्राऽखण्डत्वं कारणं तत्रनरशब्दस्य यस्य नस्य णत्वं न भवति, तत्र खण्डपदत्वमेव कारणं ज्ञेयम्। अर्थात् तत्र तु निमित्तनिमित्तिनौ असमानपदस्थौ स्तः, अतस्तत्र निमित्तात् परस्य नस्य णत्वं न भविष्यतीति भावः। तत्र तु णत्वाऽभावः सिद्ध एव, समासत्वादिति। अस्मात्तु निर्गलितोऽयमर्थो यन्नागेशभट्टकृताखण्डत्व विषयकपरिष्कारो निर्धारितक्षेत्रविषयकत्वात् सर्वथा दोषरहितो निर्भ्रान्तश्चेति। निर्धारितक्षेत्रातिरिक्तक्षेत्रे तत्परिष्कारे दोषकल्पनं भ्रान्तमेवेति। नारायणशब्दे यण्णत्वं विदितं तत्तु 'पूर्वपदादि' ति संज्ञाशब्दत्वेन न तु अखण्डपदत्वेनेति बोध्यम्।

इत्थं सूत्रे समानपद इत्यस्याभिप्रायो विवृतः। समानमेव यत् पदं तत्समानपदम्, नित्यं समानपदम्, अखण्डपदं वा तत्समानपदमिति। अग्रे च करिष्यमाणणत्वप्रक्रियाप्रदत्तोदाहरणेषु विव्रियते। तीर्णमिति। स्तृञ्

आच्छादने, निष्ठा, 'श्र्युकः किति' (7 |2 |11) इतीट् प्रतिषेधः, 'ऋत इद्धातोः' (7 |1 |100) इतीत्वम्, रपरत्वञ्च, 'रदाभ्यां निष्ठातो नः' (8 | 2 | 42) इति तकारस्य नकारः, 'रषाभ्यामि'त्यनेन नस्य णत्वमिति । तथैव शीर्णमिति । शृ हिंसायाम् । तथैव गूर्णमिति । गुरी उद्यमने । कुष्णाति, पुष्णाति, इति । कुषनिष्कर्षे, पुषपुष्टौ । श्ना प्रत्ययः । नस्य णत्वञ्चेति । ऋवर्णाच्चेति । मातृणाम्, पितृणाम् । आमि 'ह्रस्वनद्यापो नुट्' (7 |1 |54) इत्यनेन नुट्, 'नामि' (6 |4 |3) इति दीर्घत्वं भवति । ततो नस्य णत्वमिति । तथैव पितृणाम् । तिसृणाम्, चतसृणाम् इत्यत्रतु 'त्रिचतुरोः स्त्रियां तिसृचतसृ' (7 | 2 | 99) इत्येतावादेशौ भवतः । 'न तिसृचतसृ' (6 | 4 | 4) इतिनिषेधात् 'नामि' इत्यनेन न दीर्घत्वमिति । णत्वं तथैव भवति ।

नित्यसमानपदेऽडादिव्यवायेऽपि णत्वम्

अट्, कवर्गः, पवर्गः, आङ्, नुम्, इत्येतैर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधानेऽपि रकारषकाराभ्यां परस्य नकारस्य णकारादेशो भवतीति[1] पूर्वमेवाभिहितम् । क्रमेणोदाहियते – अड्व्यवधाने यथा – करणमिति । 'करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि' इत्यमरः । 'करणं कारणे काये साधनेन्द्रियकर्मसु । कायस्थे व्रतबन्धे च नाट्यगीतप्रभेदयोः । । पुमाञ् शूद्राविशोः पुत्रे वानरादौ च कीर्त्यते ।' इत्यजयः, इतिकृत्वा अमरकोशे उद्धृतम् । डुकृञ् करणे । 'कर्तरि', 'कर्मणि', 'भावे', 'करणे' च ल्युट् (3 | 3 |13, 15, 17) इति नस्य णत्वम्, 'अट्कुप्वाङ्' इति । तथैव हरणम्, मरणमिति । हृञ् हरणे, मृङ् प्राणत्यागे । हरिणेति । 'आङो नाऽस्त्रियाम्' (7 |3 |129) इति घेः परस्याङो नादेशोऽस्त्रियाम् । आङिति टासंज्ञ प्राचाम् । नस्य णत्वं चेति । तथैव किरिणा, गिरिणा, कुरुणा, गुरुणेति च । कवर्गव्यवधाने – अर्केण, मूर्खेण, गर्गेण, अर्घेण च । पवर्गव्यवधाने – दर्पेण, रेफेण, गर्भेण, चर्मणा, वर्मणेति । आङ्व्यवधाने – पर्याणद्धम्' इति । णह बन्धने,

---

1. अट्कुप्वाङ्नुम्व्यवायेऽपि (8 |4 |1)

निष्ठा, 'नहो धः' (8 ।2 ।34) इति हकारस्य धकारः, 'झषस्तथोर्धोऽधः' (8 ।2 ।40) इति तकास्य धकारः, पूर्वधकारस्य 'झलां जश् झशि' (8 ।4 ।53) इति दकारः। नस्य णत्वम्। तथैव निराणद्धम्। सूत्रे आङ्ग्रहणं सार्थकम्। आङ्ग्रहणाभावे 'पदव्यवायेऽपि' (8 ।4 ।38) इत्याङ्व्यवधाने णत्वप्रतिषेधः स्यात्। अतस्तद्बाधनार्थमाङ्ग्रहणं कृतम्। नुम्व्यवधाने – वृंहणम्। 'वृहि' वृद्धौ, 'इदितोनुम् धातोः' (7 ।1 ।58) इति नुम्, ल्युट्, 'नश्चापदान्तस्य झलि' (8 ।3 ।24) इत्यनुस्वारः। तथैव तृंहणमिति। तृंह्हिंसायाम्। ल्युट्। अत्र तु स्वाभाविकोऽनुस्वारः। नुम् ग्रहणेन अनुस्वारो लक्ष्यते। नुम्ग्रहणस्यानुस्वारोपलक्षणत्वादसत्यपि नुम्यनुस्वारव्यवाये णत्वं भवत्येव। सत्यपि नुमि यत्रानुस्वारव्यवायो नास्ति, तत्र णत्वं न भवतीति ज्ञेयम्। यथा – प्रन्वनमिति। 'इवि' व्याप्तौ पूर्ववन्नुम्, अझल्परत्वात्तस्यानुस्वारो न भवति। अत्रानुस्वारोपलक्षणार्थत्वाद् विद्यमानेऽपि नुम्यनुसारव्यवायाऽभावाण्णत्वाभावोऽस्ति। अत्राऽवधेयम् – 'नुम्' इत्यनेन केवलमनुस्वारोऽभिप्रेतः। सोऽनुस्वारो नुम्स्थानी स्वाभाविकानुस्वारश्चेत्युभयोरपि ग्रहणं निर्विवादं भवति। पर्याणद्धम्, निराणद्धम्, इत्यत्र न समानपदत्वम्। 'उपसर्गादसमासेऽपि णोपदेशस्य' (8 ।4 ।14) इत्यत्र णत्वं भवति, किन्तु तत्र 'अट्कुप्वाङ्' इत्यस्यऽनुवृत्तिर्लब्धाऽस्ति। 'अट्कुप्वाङ् इत्यत्र आङ्ग्रहणं त्वनित्यसमानपदे णत्वसिद्ध्यर्थं विद्यते। अत्र आङ्ग्रहणाभावे तु 'उपसर्गादसमासेऽपि णोपदेशस्य' इत्यत्र आङननुवृत्या णत्वं न भवेदिति विज्ञेयम्। नित्यसमानपदे कुत्रापि आङ्व्यवाये णत्वाऽवसर एव नास्तीति चिन्त्यम्। आङ्व्यतिरिक्ताडादिव्यवधाने नित्यसमानपदे अखण्डपदे वा णत्वं भवत्येवेति।

अनित्यसमानपदे णत्वम्

'पूर्वपदात् संज्ञायामगः' (8 ।4 ।3) इति सूत्रं समस्ते पदे णत्वं करोति। समस्ते पदे हीदं पूर्वपदम्, इदमुत्तरपदमिति विभागो भवति। समस्तपदं

पूर्वोत्तरपदविभागापेक्षया असमानपदमपि भवितुमर्हतीति। अतः समस्तं पदं न नित्यसमानपदम्। इत्थमाचार्यपाणिनिना 'पूर्वपदात्' इत्यनेन अनित्यसमानपदे णत्वविधानार्थं संसूच्यते। मातृभोगीणः, सुपर्वणेत्यादिव्यतिरिक्तं यत् समस्तमसमस्तं वा पदं तत्सर्वं तु अनित्यसमानपदम्, असमानपदं खण्डपदं वेति ज्ञातव्यम्। इत्थमनित्यसमानपदं द्विविधं भवति – समस्तपदम्, असमस्तपदं चेति। अत्राणत्वप्रसङ्गे समस्तपदमपि द्विधा संज्ञाभूतं समस्तपदम्, असंज्ञाभूतं समस्तपदं चेति सोपसर्गं तिङ्ङन्तपदमसमस्तमिति।

संज्ञाऽसंज्ञाभूतसमस्तपदे णत्वम्

यदा समासे काचित् संज्ञा विभासते तदा तत्र समानपदत्वं भवति किन्तु तत्र नित्यसमानपदत्वं न संभवति। समासभूतसंज्ञाऽसंज्ञापदे णत्वविधानार्थं पाणिनिना विधिः क्रियते। तथा हि – गकाराऽव्यवधाने संज्ञायां पूर्वपदस्थान्निमित्तात् परस्य नकारस्य णकारो भवति[1]। 'द्रुणसः' इति। द्रुरिव नासिका यस्येति बहुव्रीहिः। द्रुशब्दोऽत्र शाखावाचकः। 'अञ्नासिकायाः संज्ञायां नसञ्चास्थूलात्' (5।4।118) इत्यच् समासान्तः। नासिकायाश्च नसादेशः, न तु स्थूलपूर्वादिति। तथैव 'खुरणसः' 'खरणसः' इति। खुरखराभ्यां परस्य नासिकायाश्च नसादेशो वा भवति, 'खुरखराभ्यां वा नस्' इति वार्तिकम्। खुरणाः, खरणाः। तथैव 'वार्ध्रीणसः' इति। वाध्रीव नासिका यस्य स मृगविशेषः। वध्री चर्मपट्टिका, वर्ध्री एव वार्ध्री। 'वार्ध्रणसः' इति कथं न भवति। अस्वपदविग्रहबहुव्रीहित्वात् पुंवद्भावाभाव उपलक्ष्यते। अथवा वार्ध्रीशब्दस्य नित्यस्त्रीलिङ्गतया भाषितपुंस्कत्वाभावान्न पुंवत्त्वमिति। तथैव 'शूर्पणखा' इति। कथं शूर्पनखीति? 'ततः शूर्पनखी वाक्यात्' इति। यदा तु पूर्वोत्तरपदयोगेन शूर्पाकाराणि नखानि यस्या इति विग्रहेण संज्ञा न विवक्ष्यते

---

1. पूर्वपदात्संज्ञायामगः (8।4।3)।

तदा 'नखमुखात्संज्ञायाम्' (4 । 1 । 5) इत्यनेन टाप्–प्रत्ययं विहाय ङीष्प्रत्यययत्वेन 'शूर्पनखी इत्येव असंज्ञायां भवितुं शक्नोति । तथैव असंज्ञायां णत्वाभावो 'चर्मनासिका' इत्यत्रापि । गकारव्यवाये तु 'ऋगयनम्' इति । ऋचोऽयनमिति षष्ठीसमासः । न च 'रघुनाथः' इत्यादौ संज्ञायां णत्वं शङ्क्यम् । तत्र तु निपातनान्नत्वं ज्ञेयम् । यथा 'सर्वनाम' इति संज्ञायाम् । यतो हि लोके 'रघुनाथः' इत्येव संज्ञा, अतो णत्वाभावो निपानात् तत्र कर्तव्यः । कृते णत्वे तु संज्ञात्वभङ्गापत्तिरिति । 'नृनमनः' इत्यत्रापि संज्ञात्वेऽपि णत्वाभावः, तत्रापि निपातनं कर्तव्यम् । अथवा 'क्षुभ्नादिषु' पाठो विधेय इति । 'ब्रह्माणी' इत्यत्र 'पूर्वपदात्' इति णत्वम् । ब्रह्माणमानयति जीवयतीति उपपदसमासः, 'कर्मण्यण्' इति । ब्रह्मानशब्दात् 'टिड्ढाणञ्' – इति ङीपि, णत्वे, ब्रह्माणीति । अत्र आनुगाभावान्न ङीष् । इन्द्राणी, रुद्राणी, शर्वाणीत्यत्र आनुगागमः, ङीष् च, 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्' (4 ।1 ।49) इति । तत्र नित्यसमानपदत्वाण्णत्वम्, 'अट्कुप्वाङ्' – इत्यनेन ।

संज्ञायां पुरगा, मिश्रका, सिध्रका, शारिका, कोटरा, अग्रे, इत्येतेभ्य एव नान्येभ्यः परपदस्य वनशब्दस्य नस्य णत्वं भवतीति ।[1] यथा –पुरगावणम्, मिश्रकावणम्, सिध्रकावणम्, शारिकावणम्, कोटरावणम्, । सूत्रे वनमिति षष्ठीस्थाने प्रथमेति बोध्यम् । पुरगावनमित्यादौ षष्ठी समासः । 'वनगिर्योः संज्ञायां कोटरकिंशुलकादीनाम्' (6 ।3 ।117) इति पूर्वपदस्य दीर्घः । अग्रेवणमिति । वनस्याग्रे इति षष्ठीसमासः । राजदन्तादिवद वनशब्दस्य परनिपातः । 'हलदन्तात् सप्तम्याः संज्ञायाम्' (6 ।3 ।9) इति सप्तम्या अलुक् । अत्र पुरगादिभ्यो वननकारस्यैव णत्वमिति नियमनिर्देशः । यत्रैषां दीर्घत्वं तत्र नियमो भवति, अन्यत्र नियमो मा भूदिति विज्ञेयम् । तस्मादेव कुबेरवनम्, शत धारवनम्, असिपत्रवनम्, इत्यादौ णत्वं न भवतीति । नियमार्थं परिभाषा विद्यते– 'सिद्धे सत्यारम्भो नियमार्थः' इति । अत्र पुरगादिषु 'पूर्वपदात्' इत्येव

1. वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः (8 ।4 ।4)

णत्वं भवितुं शक्नोति। किन्तु सिद्धेऽपि णत्वे सूत्रे पुरगाद्यारम्भो नियमार्थं भवतीत्यर्थः। 'पुरगावणम्' इत्यत्र 'पूर्वपदात्' इत्यनेन गकारव्यवाये णत्वं न भवतीति तु न वक्तव्यम्। यतो हि पूर्वसूत्रे 'अगः' इत्यस्य पचम्यन्तत्वं मत्वा 'गान्तात् पूर्वपदात्परस्य णत्वं न भवति' इति व्याख्यानेन 'पुरगा' इत्यस्य आकारान्तत्वाद् 'अगः' इत्यनेन निषेधाभाव एव। अतो नियमस्तत्र भवति, न तु विधिरिति वक्तव्यम्। पुरगावणमित्यादयो नरकविशेषाणां संज्ञा, इत्यत्र बालमनोरमायां वासुदेवेनोक्तम्।

प्र, निर्, अन्तर्, शर, इक्षु, प्लक्ष, आम्र, कार्ष्य, खदिर, पीयूक्षा, इत्येभ्यः परस्य वननकारस्य णत्वं भवति संज्ञायामसंज्ञायामपि।[1] यथा – प्रवणम्, निर्वणम्, अन्तर्वणम्, शरवणम्, इक्षुवणम्, प्लक्षवणम्, आम्रवणम्, कार्ष्यवणम्, खदिरवणम्, पीयूक्षावणमिति। अत्र 'प्रवणम्, निर्वणम् इति। प्रगतं वनं निर्गतं वनमिति प्रादिसमासः, 'प्रादयो' गताद्यर्थे प्रथमया' इतिवार्तिकेन। 'अन्तर्वणम्' इति। विभक्त्यर्थे अव्ययीभावसमासः 'अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्य थानुपुर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु' (2 ।1 ।6) इति। वनस्य मध्ये इत्यर्थः। 'शरवणम्' इत्यादयश्च षष्ठीसमासा इति। अत्र सत्रे 'असंज्ञायामपि' इत्यनेन संज्ञाधिकारं निवर्त्त्य सामान्येन विधिरुच्यते, यतो हि सदा संज्ञाग्रहणमकर्तुं शक्यते। अतो विष्पटार्थं तु 'असंज्ञायामपि' इति गृह्यते।

ओषधिवाचिवनस्पतिवाचिपूर्वपदस्थान्निमित्तादुत्तरस्य वननकारस्य णत्वं वा भवति।[2] अत्राऽसंज्ञायामेव विभाषया णत्वं ज्ञेयमिति। यथा – दूर्वावनम्, दूर्वावणम्। मूर्वावनम्, मूर्वावणमिति ओषधिवाचिभ्यः। शिरीषवनम्, शिरीषवणम्। वदरीवनम्, वदरीवणमिति वनस्पतिवाचिभ्यः।

---

1 प्रनिरन्तः शरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि (8 ।4 ।5)।

2 विभाषौषधिवनस्पतिभ्यः (8 ।4 ।6)।

वनस्पत्यादिवाचकः प्रकीर्णोऽधोलिखितः श्लोकः काशिकायामुद्धृतः –

फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगाः।

ओषध्यः फलपाकान्ता लतागुल्माश्च वीरुधः।।

अत्र वृक्षवनस्पत्योर्भेदेऽपि अभेदो ग्राह्यः। यदि चेह वृक्षवनस्पत्योरभेदेन ग्रहणं न स्यात्, ततो वनस्पतित्वादतिदेशात् 'शिरीषवणम्' इत्यत्र विभाषया णत्वप्रसज्जनं च नोपपद्यते। 'फली वनस्पतिर्ज्ञेयः' इति। पुष्पमन्तरेण फलमात्र यस्यास्तीति स फली वनस्पतिः, यथा – उदुम्बरादयः। 'वृक्षाः पुष्पफलोपगाः पुष्पं फलं चोपगच्छन्ति प्राप्नुवन्ति ये ते पुष्पफलोपगाः। 'अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः' (3 |2 |48) इत्यादौ 'अन्यत्रापि दृश्यत इति वक्तव्यम्' इति वार्तिकोपसंख्यानाड्डप्रत्ययः। 'ओषध्यः फलपाकान्ताः' इति। ओषधिशब्दात् 'कृदिकारादक्तिनः' (गणसूत्रम्–50) इति, 'सर्वतोऽक्तिन्नर्थादित्येके' (गणसूत्रम्–51) इति 'बह्वादिभ्यश्च' (4 |1 |45) इति बह्वादिपाठात् ङीष्। फलपाकेनान्तो विनाशो यासां ताः फलपाकान्ता ओषध्यः कदल्यादयः। 'लता गुल्माश्च वीरुधः' इति। लताः प्रतानवत्यो मालत्यादयः, गुल्माः ह्रस्वस्कन्धतरवः, वीरुधः बहुप्रकाण्डपत्रा इति विज्ञेयमिति। दूर्वावणमित्यादयः षष्ठीसमासाः सन्ति।

अदन्तपूर्वपदस्थान्निमित्तादुत्तरस्याह्नादेशस्य नकारस्य णत्वं भवति।[1] सूत्रे 'अह्नः' इति षष्ठ्यर्थे प्रथमा। यथा–'सर्वाह्णः' इति। सर्वम् अहरिति। 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन' (2 |1 |49) इति समासे 'राजाहःसखिभ्यष्टच्' (5 |4 |91) इति टच्, 'अह्नोऽह्न एतेभ्यः' (5 |4 |88) इति अह्नादेशः णत्वं चेति। तथैव 'पूर्वाह्णः' इति, 'पराह्णः' इति। 'पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे' (2 |2 |1) इति समासः। 'रात्रह्नाहाः पुंसि' (2 |4 |29) इति पुंस्त्वम्। 'दीर्घाह्नी इत्यत्र कथं णत्वाभाव इति?

1 अह्नोऽदन्तात् (8 |4 |7)।

दीर्घाणि अहानि यस्यां सा 'दीर्घाह्नी शरत्' इति बहुव्रीहिः। बहुव्रीहौ टज् न भवति, तत्पुरुषाधिकार एव टज्विधिः, 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (5।4।86) इत्यतः तत्पुरुषग्रहणमनुवर्तते। 'अन उपधालोपिनोऽन्यतरस्याम्' (4।1।28) इति ङीप्, 'अल्लोपो नः' (6।4।134) इत्युपधाकारलोपः। सूत्रे 'अह्नः' इत्यकारान्तग्रहणाद् 'दीर्घाह्नी' इत्यत्र णत्वं न भवति। 'दीर्घाह्नी' इत्यस्य क्षुभ्नादिषु पाठो न कर्तव्य इति। यतोहि निषेधश्चात्र सुलभ एवेति। 'पराह्न' इत्यत्रापि णत्वाभावः सुलभः। यतो हि आकारान्तान्न णत्वं भवति। परागतम् अहः 'पराह्नः' इति।

आहितवाचिपूर्वपदस्थान्निमित्तात् परस्य वाहननकारस्य णत्वं भवति।[1] अत्रापि 'वाहनम्' इति षष्ठ्यर्थे प्रथमा। उह्यते अनेनेति करणे ल्युट्। अत्र निपातनादेवोपधाया दीर्घत्वमिति बोध्यम्। आरोप्य यदुह्यते तदाहितं भवति। अर्थाद् वाहने आधीयते वाहनाय यन्न तु स्वयमेवारोढुं शक्नोति तदाहितं भवति। आहितमिति भूतकालो नाऽत्र विवक्षितः। 'कृत्यल्युटो बहुलम्' (3।3।113) इति कालसामान्ये क्तो भवति। तस्माद् यदापि वाहने वाहनार्थं शरादिकमारोपितं न भवति, अपितु वाहनाय भूतले शरादिकमुपकल्पितमेव तदापि णत्वं तत्र कर्तव्यमिति। उदाहरणं यथा – शरवाहणम्, इक्षुवाहणं वेति। षष्ठीसमासः। 'दाक्षिवाहनम्' इत्यत्र णत्वं न भवति। तत्र तु दाक्षिस्वामिकं वाहनमिति वाञ्छितम्। न तु दाक्षीति आहितत्वेनाङ्गी कृतः। अत्र तु शब्दशक्तिहेतुरेव प्रमाणमिति विज्ञेयम्।

पूर्वपदस्थान्निमित्तात् परस्य पाननकारस्य णत्वं भवति देशे गम्यमाने।[2] यथा – 'क्षीरपाणा उशीनराः' इति। क्षीरं पानं येषां ते। 'कृत्यल्युटो बहुलम्' (3।3।113) इति कर्मणि ल्युडत्र भवति। पीयते इति पानम्। अत्र यद्यपि मनुष्याभिधानं वर्तते न तु देशाभिधानमिति। किन्तु

---

1 वाहनमाहितात् (8।4।8)।

2 पानं देशे (8।4।9)

उशीनरादिदेशवासिनां तात्स्थ्यात् तथा प्रतीयमानत्वादुशीनरादिदेशसम्बन्ध द्वारेण मनुष्येषूशीनराख्या उशीनरादयोऽपि शब्दाः संज्ञात्वेन प्राग्देशेष्वपि प्रवृत्ता भवन्ति, पश्चाच्च तत्सम्बन्धेन मनुष्येष्वपि। तस्मात्तु मनुष्याभिधाने देशाभिधानं गम्यत इत्युक्तं भवति, यथा – सुरापाणाः प्राच्याः, काषायपाणा गान्धारा इति। यदा तु देशाभिधानं न भवति तदा तु णत्वाभावः। यथा – दाक्षीणां पानं 'दाक्षिपानम्' इति।

पूर्वपदस्थान्निमित्तात् परस्य भावकरणयोर्यः पानशब्दस्तस्य नकारस्य वा णत्वं भवति।[1] भावे यथा–क्षीरपाणम् क्षीरपानम्। करणे यथा–क्षीरपाणः कंसः, क्षीरपानः कंस इति। भावे द्योत्ये 'पानम्' इत्यस्यार्थः 'पीतिः'। 'नपुंसके भावे क्तः' (3 ।3 ।114) इत्यनुवर्तमाने 'ल्युट् च' (3 ।3 ।115) इति ल्युट्प्रत्ययः। करणे तु पानः पीयते अनेन इति, 'करुणाधिकरणयोश्च' (3 ।3 ।117) इति ल्युट्। अत्र पूर्वपदस्थान्निमित्तात् पानभिन्नपरपदस्थस्यापि नस्य णत्वं भवति। अत्र तु 'वा प्रकरणे गिरिनद्यादीनामुपसंख्यानम्' इति वार्तिकम्। यथा–गिरिणदी, गिरिनदी। चक्रणदी, चक्रनदी चक्रणितम्बा, चक्रनितम्बेति।चक्रमिवनितम्बो यस्याः सेति विग्रहवाक्यम्, 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्चे त्यनेन वार्तिकेन। तथैव चक्रणदी, चक्रनदीति।

पूर्वपदस्थान्निमित्तादुत्तरस्य प्रातिपदिकान्तनुम्विभक्तिषु स्थितस्य नकारस्य णत्वं वा भवति।[2] अत्र किं नाम प्रातिपदिकमिति? प्रतिपदि भवं प्रातिपदिकं 'कालाट्ठञ्' (4 । 3 । 11) इति पारिभाषिकं वा। नाद्यं प्रसङ्गाभावत्, द्वितीयं भवितुमर्हति – 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' (1 ।2 ।45) 'कृत्तद्धितसमासाश्च' (1 ।2 ।46) इति। अत्र प्रसङ्गानुसारेण 'कृत्तद्धिते'ति प्रातिपदिकं ग्राह्यम्। कृदन्ताः तद्धितान्ताः समासाश्च

---

1 वा भावकरणयोः (8 ।4 ।10)

2 प्रातिपदिकान्तनुम्विभक्तिषु च (8 ।4 ।11)

प्रातिपदिकसंज्ञाः स्युः। 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति। इत्थमत्र 'पूर्वपदात्' इत्यनेन प्राप्तं पूर्वपदाधिकारादुत्तरपदस्य प्रातिपदिकस्य योऽन्त्यो नकारः तस्यैव वा णत्वं भवति, नान्यस्येत्ययमर्थः। उदाहरणं वक्ष्यते। यथा–प्रातिपदिकान्ते – माषवापिणौ, माषवापिनौ, इति। 'बहुलमाभीक्ष्ण्ये' (3 |2 |81) इति णिनिः, माषान् वपते इति माषवापी तौ। नुमि– 'माषवापाणि' इति। माषान् वपन्ति, इति। 'कर्मण्यण्' (3 |2 |1), 'जश्शसोः शिः' (7 |1 |20) इति शिरादेशः, 'शिसर्वनामस्थानम्' (1 |1 |42) शीत्येतत्तु सर्वनामस्थानसंज्ञकं भवति। 'नपुंसकस्य झलचः' (7 |1 |72) सर्वनामस्थाने परे झलन्तस्याजन्तस्य च क्लीबस्य नुमागमो भवतीति नुम्, 'सर्वनामस्थाने चाऽसम्बुद्धौ' (6 |4 |8) इति चोपधादीर्घः। विभक्तौ च – माषवापशब्दात् तृतीयैकवचनस्य 'टाङसिङसामिनात्स्याः' (7 |1 |12) इत्यनेन इनादेशः नस्य णत्वं भवतीति अत्र तु माषवापिणावादौ उपपदसमासोऽस्ति। गर्गाणां भगिनी 'गर्गभगिनी' इत्यत्र णत्वाभावः, प्रातिपदिकं यत् तदन्तनकाराभावेनेति। यदा तु गर्गाणां भगः गर्गभगः, गर्गभगोऽस्या अस्ति, इति विग्रहे, गर्गभगिणी' इत्येव भवितव्यम्, मातृभोगीणवदिति। 'अट्कुप्वाङ्' इति णत्वम्।

तत्र युवादिप्रतिषेधः स्यात् 'युवादीनां प्रतिषेधो वक्तव्यः' इति वार्तिकम्। यथा – 'आर्ययूना इति। आर्यश्चासौ युवा चेति विग्रहः। विशेषणसमासः। 'श्वयुवमघोनामतद्धिते' (6 |4 |133) इति सम्प्रसारणम्, 'सम्प्रसारणाच्च' (6 |1 |109) इति पूर्वरूपम् 'अकः सवर्णे दीर्घः (6 |1 |101) इति दीर्घत्वम्। तथैव रम्ययूना, क्षत्रिययूना। अत्र प्रातिपदिकान्तत्वाण्णत्वं प्राप्तम्, किन्तु युवादित्वान्निषिध्यते। 'परिपक्वानि' इति। अत्र गतिसमासः, नुमो नकारस्य 'कुमति च' (8 |4 |13) इत्यनेन नित्यं णत्वं प्राप्तम्, तदपीह युवादित्वान्निषिध्यते। तथैव 'प्रपक्वानि' इत्यत्रापि णत्वनिषेधः।

एकाजुत्तरपदे समासे पूर्वपदस्थान्निमित्तादुत्तरस्य

प्रातिपदिकान्तनुम्विभक्तिस्थस्य नकारस्य णत्वं नित्यं भवति ।[1] एकाजुत्तरपदं यस्य स एकाजुत्तरपदः समासः, तस्मिन्निति एकाजुत्तरपदे समासे। सूत्रे पुनर्णग्रहणं 'प्रातिपदिकान्तनुम्विभक्तिषु च' इति विकल्पनिवृत्त्यर्थमिति केचित्। अपरे तु आरम्भसामर्थ्यान्नित्यत्वे सिद्धे पुनर्ग्रहणं स्पष्टार्थमिति। प्रातिपदिकान्ते – वृत्रहणौ, वृत्रहणः, इति। वृत्रो नाम–कश्चिद् असुरः। तं हतवानित्यर्थे 'ब्रह्मभ्रूणवृत्रेषु क्विप्' (3 ।2 ।87) एषु कर्मसूपपदेषु क्विब् भवति। 'वृत्रहा' इति, ततः प्रथमाविभक्तेर्द्विवचनान्तो बहुवचनान्तश्चेति। तथैव ब्रह्महणौ, ब्रह्महणः, इति। 'हरिंमाणी' इति। हरिं मानयतीति मनेर्ण्यन्तात् 'क्विप् च' (3 ।2 ।76) इति क्विप्, नान्तत्वाद् ङीप्। 'मान्' इति तु प्रातिपदिकमुत्तरपदं वर्तते तदन्तत्वान्नकारस्य विभाषया णत्वं भवति। परन्तु सूत्रेण नित्यं णत्व चात्र विधीयते। नुमि – क्षीरपाणि, इति। कर्मण्युपपदे पिबतेः 'आतोऽनुपसर्गे कः' (3 ।2 ।3) इति कः, 'आतो लोप इटि च' (6 ।4 ।64) इत्याकारलोपः। क्षीरपशब्दाद् 'जश्शसोश्शिः' इत्यजन्तलक्षणो नुम्, दीर्घः, ततो नित्यं णत्वम्। तथैव 'सुरापाणि' इति। विभक्तौ – क्षीरपेण सुरापेणेति।

कवर्गवत्युत्तरपदेऽपि प्रातिपदिकान्तनुम्विभक्तिषु पूर्वपदस्थान्निमित्तात् परस्य नकारस्य नित्यं णत्वं भवति ।[2] प्रातिपदिकान्ते – 'हरिकामिणौ' इति। 'बहुलमाभीक्ष्ण्ये' (3 ।2 ।81) इति णिनिः। नुमि – 'हरिकामिण' इति। अजन्तलक्षणो नुम्। विभक्तौ 'हरिकामेण' इति। एवमन्यत्रापि ज्ञेयम्– वस्त्रयुगिणौ, वस्त्रयुगिणः, स्वर्गकामिणौ, वृषगामिणौ, इति प्रातिपदिकान्ते। वस्त्रयुगाणि, खरयुगाणि, इति नुमि। वस्त्रयुगेण, खरयुगेण, इति विभक्तौ चेति। अत्रानेकाजुत्तरपदे णत्वविधानं कृतम्।

उपसर्गस्थान्निमित्तात् परस्य णोपदेशधातुनकारस्य णत्वं भवति, असमासेऽपि चेति ।[3] उपदिश्यते प्रथमत उच्चार्यते इति उपदेशः, ण उपदेशो

---

1 एकाजुत्तरपदे णः (8 ।4 ।12)।

2 कुमति च (8 ।4 ।13) ।

3 उपसर्गादसमासेऽपि णोपदेशस्य (8 ।3 ।14) ।

यस्येति बहुव्रीहिः। णोपदेशा धातवस्तु–नृत्नर्द्नन्दनक्क्नाट्नाथृनाधृनृवर्जम् णोपदेशाः, इति महाभाष्ये 'णो नः' (6 |1 |65) इत्यत्र 'नृती' गात्रविक्षेपे, 'नर्द्' शब्दे, 'नदि' समृद्धौ, 'नक्क्' नाशने, 'नादि' अवस्कन्दने, 'नाथृ' 'नाधृ' याच्ञादौ, 'नृ' नये, एभ्योऽष्टाभ्यो भिन्ना णकारादिधातवः 'णो नः' इत्यनेन नकारादित्वेन दृश्यमाना णोपदेशा भवन्ति। असमासे–'प्रणमति' इति 'णम' प्रह्वत्वे शब्दे च। तथैव परिणमति। समासे– 'प्रणायकः' इति। 'णीञ्' प्रापणे, ण्वुल् प्रादिसमासः। तथैव परिणायकः। तत्पुरुषे प्रादिसमासे णोपदेशं प्रत्युपसर्गत्वं भवति, किन्तु बहुव्रीहौ णोपदेशं प्रत्युपसर्गाभावो दृश्यते। यथा–'प्रनायको देशः' इति प्रगता नायका अस्माद् देशादिति 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' इति वार्तिकेन निर्दिष्टं भवति–बहुव्रीहौ प्रादिभ्यः परस्योत्तरपदस्य धातुजस्य लोपो वा स्यादिति। अत्र तु गमिं प्रत्युपसर्गत्वं, न नयतिं प्रति। तस्मात् 'प्रनायको देशः' इत्यत्र णत्वाभावः सुलभ एवेति। प्रनर्दति, प्रदर्नकः, इत्यत्र तु णोपदेशाभावाण्णत्वाभावो भवति।

उपसर्गस्थान्निमित्तात् परस्य 'हिनुमीना' इत्येतयोर्नकारस्य णत्वं भवति।[1] 'हिनुमीना इत्यत्र द्वन्द्वसमासः षष्ठीद्विवचनस्य आर्षो लुक्। 'हिनु' इति। 'हि' गत्यर्थकस्वादिधातोः श्नुप्रत्ययान्तः, 'स्वादिभ्यः श्नुः' (3 |1 |63) इति। 'मीना' इति। 'मीञ्' हिंसार्थक्र्यादिधातोः श्नाप्रत्ययान्तः, 'क्र्यादिभ्यः श्ना' (3 |1 |81) इति। क्रमश उदाह्रियते–प्रहिणोति, प्रहिणुतः। प्रमीणाति, प्रमीणीतः। अत्र विकृतस्य नकास्य णत्वं भवति। तथा हि चात्र महाभाष्यकारेणोक्तम्–'हिनुमीनाग्रहणे विकृतस्योपसंख्यानं कर्तव्यमिति।

उपसर्गस्थान्निमित्तात् परस्य लोडादेशस्य 'आनि' इत्येतस्य नकारस्य णत्वं भवति।[2] 'प्रवपाणि' इति। प्रपूर्वकवपेर्लोट्, मिप्, 'मेर्निः'

---

1 हिनुमीना (8 |4 |15)।

2 आनि लोट् (8 |4 |16)।

(3 |4 |89) इति, 'आडुत्तमस्य पिच्च्' (3 |4 |92) इत्याट् । तथैव परिवपाणि, प्रयाणि, परिपाणि, प्रभवाणि चेति । 'प्रवपानि मासानि' इति कथं णत्वाभावः? प्रकृष्टा वपा येषामिति बहुव्रीहिः, 'जश्शसोः शिः (7 |1 |20) इति शिरादेशः, 'नपुंसकस्य झलचः' (7 |1 |72) इति नुम्, 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति दीर्घः, प्रवपानीति । अत्र लोडाभावाण्णत्वं न भवति । सूत्रे आनीति लोडिति च लुप्तषष्ठीकं पदं विज्ञेयम् । 'दुर्भवानि' इत्यत्र णत्वं कथं न भवति? दुरो णत्वे उपसर्गाभावात् तत्रणत्वं न भवति । 'सुदुरोः षत्वणत्वयोरुपसर्गत्वप्रति– षेधो वक्तव्यः' इति वार्तिकम् 'गतिश्च' (1 |4 |59) इत्यत्र कथम् 'अन्तर्भवाणि' इत्यत्र णत्वं भवति? यतो हि 'अन्तः' इत्यस्योपसर्गत्वं भवति । 'अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम्' इति वार्तिकम् 'अन्तरपरिग्रहे' (1 |4 |45) इत्यत्र ।

उपसर्गस्थान्निमित्तात् परस्य 'नि' इत्येतस्य नकारस्य णत्वं भवति, गद नद पत पद घु मा स्यति हन्ति याति वाति द्राति प्सति वपति वहति शाम्यति चिनोति, देग्धि इत्येतेषु परेषु ।[1] यथा–'गद व्यक्तायां वाचि'–प्रणिगदति, 'नद (णद) अव्यक्ते शब्दे' – प्रणिनदति, 'पत गतौ' – प्रणिपतति, 'पदगतौ' – प्रणिपद्यते, 'घु' इत्यनेन घुसंज्ञकानां धातूनां ग्रहणं भवति । दाधाघ्वदाप्' (1 |1 |20) दारूपा धारूपाश्च धातवो घुसंज्ञका भवन्ति दाप्दैपौ विनेति । अत्र दारूपाश्चत्वारो धातवः । डुदाञ् दाने, दाण, दाने, दो अवखण्डने, देङ् रक्षणे । धारूपौ द्वौ धातू–डुधाञ्धारणपोषणयोः, धेट् पाने चेति । दाप् लवने, दैप् शोधने, इति द्वौ विना पूर्वोक्ताः षड्धातवो घुसंज्ञाः सन्तीति ज्ञेयम् । डुदाञ्–प्रणिददाति, दाण्–प्रणियच्छति–'पाघ्राध्मा' (7 |3 |78) इति यच्छादेशः, दो–प्रणिद्यति, देङ्–प्रणिदयते, डुधाञ्–प्रणिद धाति, धेट्––प्रणिधयति, इति । 'मा' इत्यनेनात्र मेङ्माङोरेव ग्रहणं भवति ।

---

1 नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यति– चिनोतिदेग्धिषु च (8 |4 |17)

'माङ्' माने शब्दे च। प्रणिमिमीते, 'मेङ्' प्रणिदाने, प्रणिदानं विनिमयः प्रत्यर्पणं च। प्रणिमयते। स्यति–प्रणिस्यति, 'षो' अन्तकर्मणि। हन्ति–प्रणिहन्ति, 'हन' हिंसागत्योः। याति–प्रणियाति, 'या प्रापणे। वाति–प्रणिवाति, 'वा' गतिग न्धनयोः, गन्धनं सूचनम्। द्राति–प्रणिद्राति 'द्रा' कुत्सायां गतौ। प्साति–प्रणिप्साति, 'प्सा' भक्षणे। वपति–प्रणिवपति, 'डुवप्' बीजसन्ताने, बीजसन्तानं क्षेत्रे विकिरणं गर्भाधानं चेति, अयं छेदनेऽपि केशान् वपतीति। वहति–प्रणिवहति 'वह' प्रापणे। शाम्यति–प्रणिशाम्यति, 'शमु' उपशमे, उपशमो नाशः, इन्द्रियनिग्रहश्चेति। चिनोति–प्रणिचिनोति, 'चिञ्' चयने। देग्धि–प्रणिदेग्धि, 'दिह्' उपचये। अत्र णत्वं पर्युपसर्गादपि भवति। यथा–परिणिगदतीति। एवमन्यत्रपि। अत्र सूत्रे गदादीनां चतुर्णां शपा निर्देशः, स्यत्यादीनामेकादशानां श्तिपा निर्देशश्च यङ्लुङ्निवृत्यर्थः। तस्मात्तु प्रनिजगादीति, प्रनिनानदीति, प्रनिसासेति, प्रनिजङ्घनीति इत्यादौ णत्वं न भवति।

उपसर्गस्थान्निमित्तात् परस्य नेर्नस्य णत्वं भवति विभाषया, उपदेशे अकखादौ षान्ते च गदनदादेरन्यस्मिन्धातौ परे।[1] यथा–प्रणिपचति, प्रनिपचति प्रणिभिनत्ति, प्रनिभिनत्ति। प्रनिकरोति, प्रनिखादति, इत्यत्र विकल्पेन णत्वं न भवति, कखादिधातुपरत्वादिति। तथैव षान्तधातुपरत्वात् 'प्रनिपिनष्टि' इत्यत्र णत्वाभाव एव। प्रनिचकार, प्रनिचखाद, प्रनिप्रेक्ष्यति, इत्यत्रोपदेशे कखादिधातुः षान्तधातुरेव विद्यते, अतः णत्वाभावः। 'प्रणिवेष्टा' इत्यत्र णत्वं भवति। अत्र 'विश्' प्रवेशने इति धातुः। उपदेशे षान्ताभाव इति। तथैव प्रणिवेशयति।

उपसर्गस्थान्निमित्तात् परस्य अनितेर्नकारस्य णत्वं भवति।[2] अत्र

---

1 शेषे विभाषाऽकखादावषान्त उपदेशे (8।4।18)।

2 अनितेः (8।4।19)।

अनितेरिति श्तिपा निर्देशो धातुनिर्देशार्थ एवास्ति 'अन' प्राणने, इति। उदाह्रियते—प्राणिति, पराणिति 'रुदादिभ्यः सार्वधातुके' (7 |2 |76) इतीट्।

उपसर्गस्थान्निमित्तात् परस्य पदान्तानितेर्नकारस्य णत्वं भवति।[1] यथा—हे प्राण, हे पराण इति। 'पदान्तस्य' इत्यनेन प्राप्तस्य प्रतिषेधस्यात्र अपवादः प्राप्तः। अत्र प्रपरापूर्वकादनधातोः क्विबन्तः सम्बोधनैकवचनशब्दः। 'न ङिसम्बुद्ध्योः' (8 |2 |8) ङौ सम्बुद्धौ च नस्य लोपो न भवति। ततः पदान्तानितेर्नकारस्य णत्वमिति।

उपसर्गस्थान्निमित्तात् परस्य साभ्यास्यानितेरुभौ नकारौ णत्वमधिगतौ।[2] आवृत्तिरभ्यासः। णिजन्तादिविधौ साभ्यासस्यानितेरुभयोर्नकारयोरत्र णकारो विधीयते । णिजन्तम्—प्राणिणात्' इति। ण्यन्ताल्लुङ्, च्लेश्चङ्, णिलोपः, 'द्विर्वचनेऽचि' (1 |1 |59) इति स्थानिवदभावः निशब्दस्य द्विर्वचनम्, णत्वं चेति। तथैव पराणिणत्। सन्नन्तम्—'प्राणिणिषति' इति। सनि, 'अजादेर्द्वितीयस्य' (6 |1 |2) इति पूर्ववन्निशब्दस्य द्विर्वचनम्। तथैव पराणिणिषति।

उपसर्गस्थान्निमित्तादुत्तरस्य अकारपूर्वस्य हन्तिनकारस्य णत्वं भवति।[3] यथा— प्रहण्यते' इति 'हन्' हिंसागत्योः, भावकर्मणोः' (1 |3 |13) इत्यात्मनेपदम्। तथैव—परिहण्यते, प्रहणनम्, परिहणनम्, इति। प्रपूर्वकहन—धातोर्ल्युडिति हन्तेरत्पूर्वस्यैव नस्य णत्वं नान्यत्र, यथा— प्रघ्नन्ति, परिघ्नन्ति। प्राधानि, पर्यधानि, इति। लुङ्, 'चिण्भावकर्मणोः' (3 |1 |66) इति च्लेश्चिण्, 'अत उपधायाः' (7 |2 |116) इति वृद्धिः, 'चिणे लुक्' (6 |4 |114) इति तकारस्य लुक्। अत्र श्तिपा निर्देशो धातुनिर्देशार्थ एव।

---

1 अन्तः (8 |4 |20)।

2 उभौ साभ्यासस्य (8 |4 |21)।

3 हन्तेरत्पूर्वस्य (8 |4 |22)।

उपसर्गस्थान्निमित्तात् परस्य वकारमकारयोः परतो हन्तिनकारस्य वा णत्वं भवति।[1] यथा – प्रहण्वः, प्रहन्वः, परिहण्वः, परिहन्वः। प्रहण्मः, प्रहन्मः। परिहण्मः, परिहन्मः। प्रहण्मि, प्रहन्मि। परिहण्मि, परिहन्मि। अत्र वा ग्रहणे द्वयोर्विभाषयोर्मध्ये ये विधयः सन्ति ते नित्या एवेति तेषां नित्यत्वं विज्ञायते। पूर्वेण नित्ये प्राप्तेऽत्र विकल्पार्थं वचनं ज्ञेयम्।

अदेशे वाच्येऽन्तःशब्दात् परस्य अत्पूर्वस्य हन्तिनकारस्य णत्वं भवति।[2] यथा – अन्तर्हण्यते, अन्तर्हणनम्। अत्र भावे ल्युट्। मध्ये हननमित्यर्थः। किन्तु देशवाचित्वाद् 'अन्तर्हननः' इत्यस्य नस्य णत्वं न भवति। 'अन्तरपरिग्रहे' (1।4।65) इत्यत्र 'अन्तःशब्दस्याङ्किविधि णत्वेषूपसर्गसंज्ञा वक्तव्या' इति वार्तिकेन णत्वविधौ उपसर्गसंज्ञा विधीयते। 'अन्तर्घणो देशः' इत्यत्र देशाभिधानेऽपि निपातनादेव णत्वं भवति, इति न्यासकारेण न्यासे प्रतिपादितम्। अन्तर्घ्नन्ति, इत्यत्र अत्पूर्वस्य नकारस्याभावाण्णत्वाभाव इति। तथैव अन्तरघानि चेति।

अन्तःशब्दादुत्तरस्य अयनशब्दस्य नकारस्य णत्वं भवति, अदेशवाच्ये तु।[3] यथा – 'अन्तरयणम्' इति। अयतेः, इणो वा ल्युटि रूपम् 'कृत्यचः' (8।4।29) इत्यनेनैव सिद्धेऽदेशप्रतिविधानार्थं वचनमस्ति। अर्थाद् देशप्रति षेधार्थं वचनं कृतमिति। 'उत्तरायणम्' इत्यत्र 'पूर्वपदात्' इत्यनेनैव णत्वं ज्ञेयम्।

ऋदवग्रहात् पूर्वपदात् परस्य नकारस्य णत्वं भवति, छन्दसि।[4] 'ऋदवग्रहात्' इति। अवगृह्यते विच्छिद्य पठ्यत इत्यवग्रहः, ऋच्चासौ अवग्रहश्च ऋदवग्रहः तस्मात्। 'ऋत्' इति ऋकारान्तात् संहिताकाले णत्वं भवति, पदकालेऽवग्रहः क्रियते। अतः पदपाठे णत्वं न भवति। यथाहि –

---

1 वमोर्वा (8।4।23)। 2 अन्तरदेशे (8।4।24)

3 अयनं च (8।4।25)। 4 छन्दस्यृदवग्रहात् (8।4।26)।

पदपाठे 'नृमना' इति अवगृह्यते, अतो णत्वाभावः। संहितापाठे तु 'नृमणा' इति नरिस्थं मनोऽस्येति विग्रहः बहुव्रीहिः। 'अत्वसन्तस्य चाधातोः' (6 ।4 ।14) इति दीर्घः। 'पितृयाणम्' इति। यात्यनेनेति यानम्, करणे ल्युट् पितुर्यानमिति षष्ठीसमासः।

धातुस्थान्निमित्तात् परस्य उरुशब्दात् षुशब्दाच्च नस्शब्दस्य नकारस्य णत्वं भवति, छन्दसि[1] धातौ तिष्ठतीति धातुस्थं निमित्तं रेफः षकारश्चेति 'उरु' इति शब्दस्वरूपग्रहणं कर्तव्यम्। 'षु' इति कृतषत्वस्य सुञो ग्रहणं न सप्तमीबहुवचनस्य, 'सुञः' (8 ।3 ।107) इति सुञो निपातस्य सस्य ष इति धातुस्थाद् यथा – 'रक्षा णः' इति। रक्ष पालने, इत्यस्माद् धातोर्लोट्, मध्यमपुरुषवचनान्तात् परस्यास्मदो द्वितीयान्तस्य 'बहुवचनस्य वस्नसौ' (8 ।1 ।21) इति नसादेशः, 'द्व्यचोऽस्तस्तिङः' (6 ।3 ।135) इति दीर्घः। शिक्षाणो अस्मिन्। 'शिक्षाणः' इति। शिक्षा विद्योपादाने, इत्यस्मात् पूर्वविधावेवास्मदो नसादेशोऽस्ति। उरुशब्दात् – उरुणस्कृधिः, उरु अधि कम्। षुशब्दात्–अभीषुणः, ऊ षु णः, इति। अत्रैते शब्दा वेदे प्राप्ताः। यथा – अग्ने रक्षा णः (ऋ0 7 ।15 ।13), उरु णस्कृधिः (ऋ0 8 ।75 ।11)। अभी षु णः सखीनाम् ऋ0 (4 ।31 ।13)।

उपसर्गस्थान्निमित्तात् परस्य नसो नकारस्य णत्वं भवति बाहुलकात्।[2] यथा – प्रणः शूद्रः, प्रणसः, प्रणो राजा। किन्तु 'प्र नो मुञ्चतम् (ऋ0 6 ।74 ।4) इत्यत्र णत्वं न भवति। बाहुलकाद् लोकेऽपि णत्वं भवति प्रणसं मुखम्, प्रगता नासिका यस्य इति बहुव्रीहिः। 'उपसर्गाच्च' (5 ।4 ।119) इति नासिकायास्तु नसादेशो भवति। अत्र सूत्रकारेण 'उपसर्गादनोत्परः' इति सूत्रं पठितम्। किन्तु भाष्यकारेण 'उपसर्गाद् बहुलमिति वक्तव्यम्' इति

---

1 नश्च धातुस्थोरुषुभ्यः (8 ।4 ।127)।

2 उपसर्गाद् बहुलम् (8 ।4 ।128)।

स्वीकृतम् । तथैव काशिकाकारेणाऽपि स्वीकृतिम् । अत्र प्राद्युपलक्षणार्थ–मेतदुपसर्गग्रहणं विज्ञायते । यतो हि नसादेशं प्रत्युपसर्गत्वं न सम्भवति ।

उपसर्गस्थान्निमित्तात् कृत्स्थस्याचः परस्य नकारस्य णत्वं भवति ।[1] अत्र अन, मान, अनीय, अनि, निष्ठादेश एते णत्वं प्रयोजयन्ति, इति काशिकायामुक्तम् । 'अन' इति । योरनादेशः, 'युवोरनाकौ' (7 ।1 ।1) इति, यथा – प्रयाणम्, परियाणम्, प्रमाणम्, परिमाणम् । 'मान' इति । आगममुकः, शानच्कानच्चानश्प्रत्ययत्वेन । 'आने मुक् (7 ।2 ।82) इति । यथा – प्रयायमाणम्, परियायमाणम् । 'अनीय' इति । तव्यदादिसूत्रविहितोऽनीयः । 'तव्यत्तव्यानीयरः' (3 । 3 । 96) इति । यथा – प्रयाणीयम्, परियाणीयम् । अनि' इति । 'आक्रोशे नञ्यनिः' (3 । 3 । 112) अप्रयाणिः, अपरियाणिः । 'इनि' इति । 'सुप्यजातौ णिनिस्ताच्छील्ये' (3 ।2 ।78), इति, ' आवश्यकाधमर्णयोरिनिः' (3 ।3 । 170) इति । यथा – प्रयायिणौ, परियायिणौ । 'निष्ठादेश' इति । 'रदाभ्यां निष्ठातो नः' (8 ।2 ।42) इति प्रकरणे यो विहितः, यथा – प्रहीणः, परिहीणः । 'ओहाक्' त्यागे, ओदितश्च (8 ।2 ।45) इति तकारस्य नकारः, 'घुमास्थागापाजहातिसां हलि' (6 ।4 ।66) इतीत्वम् । 'परिभुग्नः' इत्यत्र णत्वाभावः, अचः परस्य नत्वाभावादिति । 'भुजो' कौटिल्ये, निष्ठाप्रत्ययः, 'ओदितश्च' (8 ।2 ।45) इति निष्ठानत्वम्, 'चोःकुः' (8 ।2 ।30) इति कुत्वम् । तथैव 'प्रमग्नः' इत्यत्रापि णत्वाभावः । 'टु मस्जो' शुद्धौ, 'मस्जिनशोर्झलि' (7 ।1 ।60) इति नुम् । 'अनिदिताम्' (6 ।4 ।24) नकारलोपः, 'स्कोः' (8 ।2 ।29) इति सकारलोपः, निष्ठानत्वमिति । 'कृत्स्थस्य णत्वे निर्विण्णस्योपसंख्यानं कर्तव्यम्' इति वार्तिकेन 'निर्विण्णः' इति । विदेर्निष्ठायां 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (8 । 2 । 42) इति निष्ठातस्य नः निष्ठापेक्षया पूर्वस्य धातोर्दकारस्यापि नः । निर्विन्न इति । ततो नकारस्य अचः परत्वाभावात् णत्त्वविधाने वार्तिकवचनम् । अत्रावधेयम् – पूर्वसूत्राद्

---

1. कृत्यचः (8 ।4 ।29)

बहुलवचनमनुवर्तते, तस्मादनचोऽपि परस्य नस्य णत्वं पूर्वस्य नस्य ष्टुत्वं च भविष्यतीति।

उपसर्गस्थान्निमित्तादुत्तरस्य ण्यन्ताद् विहितो यः कृत्प्रत्ययः तत्स्थस्य नस्य णत्वं विभाषया भवति।[1] यथा – प्रयापणम्, प्रयापनम्, इति। 'या' प्रापणे, णिचि, 'हेतुमति च' (3 ।1 ।26) इति णिच्, 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ – (7 ।3 ।36) इत्यादिना पुक्, 'रोरनिटि' (6 ।4 ।51) इति णिलोपः, अस्माच्च णत्वविकल्पः। तथैव परियापणम्, पारियापनम्। प्रयाप्यमाणम्, प्रयाप्यमानम्। प्रयापणीयम्, प्रयापनीयम्। अप्रयापणिः, अप्रयापनिः। प्रयापिणौ, प्रयापिनौ।अत्र 'कृत्यचः' इत्यनुवर्तते। प्राप्यमाणम्, प्रयाप्यमाणम्, इत्यादौ साधनव्यवायेऽपि विभाषया णत्वं भवति। तथा हि महाभाष्ये – णेर्विभाषायां साधनव्यवाये उपसंख्यानम्' इति वार्तिकम्। साधनमत्र विहितविशेषणणिग्रहणं 'ण्यन्ताद् यो विहितः' शानच्, इति। 'तिङ्शित्सार्वधातुकम्' (3 । 4 । 113) इति, 'सार्वधातुके यक्' (3 । 1 । 67) इति 'यक्' साधनम्। काशिकायां विहितविशेषणेन यका व्यवधानेन णत्वं वा स्वीकृतम्।

उपसर्गस्थान्निमित्तात् परस्य हलादेरिजुपधाद् धातोः कृत्स्थस्य अचः परस्य नकारस्य णत्वं वा भवति।[2] यथा – 'प्रकोपणम्, प्रकोपनम्' इति। 'कुप्' क्रोधने। तथैव–परिकोपणम्, परिकोपनम्। परिकोपणीयम् परिकोपनीयम्। प्रकोपणीयम्, प्रकोपनीयम्। 'प्रेहणम्' 'प्रोहणम्', इत्यत्र 'ईह' चेष्टायाम्, 'ऊह' वितर्के, णत्वं तु 'कृत्यचः' इति नित्यमेव, हलादिधात्वभावात्। सर्व एवेजुपधा धातवो हलन्ता भवन्ति, अत्र हलन्तत्वे लब्धे हल्ग्रहणं क्रियमाणमादेर्विशेषणं विज्ञायते।

उपसर्गस्थान्निमित्तात् परस्येजादेः सनुमो हलन्ताद् धातोर्विहितो यः कृत् तत्स्थस्यैव नस्य णो भवति।[3] अत्र पूर्वतो हल इत्यनुवर्तते। उदाह्रियते

---

1 णेर्विभाषा (8 ।4 ।30)।

2 हलश्चेदुपधात् (8 ।4 ।31)।

3 इजादेः सनुमः (8 ।4 ।32)।

– प्रेङ्खणम्। 'इगि' 'इखि' गत्यर्थौ, 'इदितो नुम् धातोः' (7।1।85) इति नुम्। 'प्रेङ्गणम्' 'परेङ्खणम् इति। 'प्रोम्भणम्' 'परोम्भणम्' इति। 'उखि' गत्यर्थः, इदित्वान्नुमिति। अत्रेजादेरेव सनुमः, नान्यस्मादिति वाच्यम्। तस्मात् प्रमङ्गनम्, परिमङ्गमनम्, इत्यत्र णत्वं न भवति। 'कृत्यचः' इत्यनेन न णत्वम् हल इत्यधिकारात्। सूत्रे नुम्ग्रहणमनुस्वारोपलक्षणार्थमिति।

उपसर्गस्थान्निमित्तात् परस्य निंस, निक्ष, निन्द, इत्येतेषां नकारस्य णत्वं भवति, विभाषयेति।[1] यथा – ''प्रणिंसनम्' 'प्रनिंसनम्' इति। 'णिसि' चुम्बने। 'प्रणिक्षणम्' 'प्रनिक्षणम्' इति। 'णिक्ष' रोषे। 'प्रणिनन्दनम्' प्रनिनन्दनम्' इति। 'णिदि' कुत्सायाम्। 'उपसर्गादसमासेऽपि णोपदेशस्य' इति नित्ये णत्वेऽत्र तु विकल्पे नियमः। अग्रे णत्वनिषेधो वक्ष्यते।

णत्वनिषेधः–

उपसर्गस्थान्निमित्तात् परस्य भा, भू, पू, कमि, गमि, प्यायी, वेप इत्येतेषां कृत्स्थनकारस्य णत्वं न भवति।[2] यथा – प्रभानम्, परिभानम्, इति 'भा' दीप्तौ। प्रभवनम्, परिभवनम्, इति भू सत्तायाम्। प्रपवनम्, परिपवनम् इति 'पुञ्' पवने। प्रकमनम्, परिकमनम्, इति 'कमु' कान्तौ। प्रगमनम्, परिगमनम् इति 'गम्लृ' गतौ। प्यायनम् परिप्यायनम्, इति 'प्यैङ् वृद्धौ'। प्रवेपनम्, परिवेपनम्, इति 'वेप' कम्पने। अत्र पूग्रहणेन 'पूञ्' इत्येतस्यैव ग्रहणं भवति। 'भादिषु पूञ्ग्रहणमि'ति वार्तिकम्। 'पूङ्' पवने इति भ्वादौ यः पठ्यते तस्य ग्रहणमत्र न भवति। अतः पूङो णत्वं भवत्येव। तथैव भाष्यकारेणोक्तम्– प्रपवणं सोमस्येति। प्रभापनम् परिभापनम्, इत्यत्र ण्यन्तादपि णत्वं न भवति। 'ण्यन्तानां भादीनामुपसख्यानं कर्तव्यम्' इति महाभाष्यम्।

षकारात् पदान्तात् परस्य नकारस्य णत्वं न भवति।[3] यथा –

---

1 वा निंसनिक्षनिन्दाम् (8 ।4 ।33)।

2 न भाभूपूकमिगमिप्यायीवेपाम् (8 ।4 ।34), 3 षात्पदान्तात् (8 ।4 ।35)।

दुष्पानम्, निष्पानम्, इति। 'पा' पाने, रक्षणेऽत्र नेष्टम् । 'इदुदुपधस्य च' (8 ।3 ।41) इति विर्सजनीयस्य षत्वम्। अत्र 'कृत्यचः' इति णत्वप्राप्तिः। सर्पिष्पानम्, यजुष्पानम्, इति। 'नित्यं समासेऽनुत्तरपदस्थस्य' (8 ।3 ।45) इति विर्सजनीयस्य षत्वमिति। कर्तकरणेकृता बहुलम्' (2 ।1 ।32) इति समासः ।' अत्र 'पानं देशे' 'वा भावकरणयोः इति णत्वं प्राप्यते, तस्य निषेधोऽत्र भवति। सूत्रे पदान्तशब्द इति। 'पदे अन्तः' इति। 'सप्तमी' (2 ।1 ।40) इति योगविभागात् समासः। 'सुसर्पिष्केण' इति। शोभनं सर्पिरस्येति बहुव्रीहिः। अत्र णत्वं भवति पदान्तषकाराभावादिति। 'शेषाद् विभाषा' (5 ।4 ।154) इति कप्। तथैव सुयजुष्केणेति, 'अट्कुप्वाङ् इति 'इणः ष' (8 ।3 ।39) इति षत्वम्।

पूर्वपदस्थान्निमित्तान्नशेः षकारान्तस्य नकारस्य णत्वं न भवति।[1] अत्र 'न भाभू⋯ इति 'न' अनुवर्तते। 'उपसर्गादसमासेऽपि णोपदेशस्य' इति प्राप्तस्य णत्वस्य प्रतिषेधो भवति। यथा – 'प्रनष्टः' इति। 'ण्य' अदर्शने, ततो निष्ठा, 'मस्जिनशोर्झलि' (7 ।1 ।60) इति नुम्, 'अनिदितां हल उपधायाः' (6 ।4 ।24) इति न लोपः, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' (8 ।2 ।36) इति षत्वम्। तथैव परिनष्टः। 'प्रणश्यति' 'परिणश्यति' इत्यत्र नशेः षान्तस्याभावः, दिवादित्वात् 'श्यन्' 'दिवादिभ्यः श्यन् (3 ।1 ।69) इति प्रनङ्क्ष्यति, परिनङ्क्ष्यति, इत्यत्र तु णत्वाभावः, नशेः षान्तस्य भावात्। पूर्ववत् षत्वे 'षढो कः सि' (8 ।2 ।41) इति कत्वम्। भूतपूर्वेऽपि षान्ते प्रतिषेधो भवेत्।

पदान्तस्य नकारस्य णत्वं न भवति।[2] यथा – वृक्षान्, गिरीन् अत्र 'अट्कुप्वाङ्' इत्यनेन प्राप्तस्य णत्वस्य प्रतिषेधो भवति। तथैव हे करिन्नित्याद्यप्युदाहरणम्। 'वृक्षान्' इत्यादौ 'प्रथमयोः पूर्वसवर्णः (6 ।1 ।102)

---

1 नशेः षान्तस्य (8 ।4 ।36)।

2 न पदान्तस्य (8 ।4 ।37)

इति दीर्घः, 'तस्माच्छसो नः पुंसि' (6 ।1 ।103) इति सकारस्य नकार इति 'करिन्' इत्यादौ 'न ङिसम्बुद्ध्योः' (8 ।2 ।8) इति नकारस्य लोपो न भवति।

निमित्तनिमित्तिनोः पदव्यवायेऽपि णत्वं न भवति।[1] पदेन व्यवायः, व्यवधानमिति। यथा – 'माषकुम्भवापेन' इति। माषाणां कुम्भः माषकुम्भः, तं वपतीति 'कर्मण्यण्' (3 ।2 ।1) इति, ततस्तृतीयैकवचनम्' अत्र 'प्रातिपदिकान्तनुम्विभक्तिषु च' इति प्राप्तस्य णत्वस्य प्रतिषेध उच्यते।'चतुरङ्गयोगेन' इति चत्वारि अङ्गानि अस्येति बहुव्रीहिः, तेन योगः चतुरङ्गयोगः तेनेति 'कर्तृकरणे कृता बहुलम्' (2 ।1 ।32) इति तृतीया समासः। पूर्वोदाहरणे कुम्भशब्देन व्यवायः उत्तरोदाहरणे अङ्गशब्देन व्यवायः, ततो णत्वाभाव इति। 'उपसर्गादसमासेऽपि' इति णत्वमत्र निषिध्यते। 'प्रावनद्धम्' इति। प्रकृष्टम् अवनद्धमिति गतिसमासः। अत्र अवशब्देन व्यवायोऽस्ति। तथैव, पर्यवनद्धमिति ।' पदव्यवायेऽतद्धित इति वक्तव्यम्' इति भाष्यवार्तिकम्। तस्मात्तु 'आर्द्रगोमयेण' इत्यत्र णत्वं भवति। गोरिदं गोमयम् 'गोश्च पुरीषे' (4 ।3 ।145) इति मयट्। आर्द्रं च तद् गोमयं चेति कर्मधारयः। अत्र गोपदेन व्यवधानं वर्तते। 'स्वादिष्वसर्वनामस्थाने'(1 ।4 ।47) इति गोशब्दस्य पदसंज्ञा। तदा गोपदव्यवाये तद्धिते आर्द्रगोमयेण शुष्कगोमयेणेत्यत्र णत्वं भवति, 'अट्कुप्वाङ्'... इति।

क्षुभ्नादिषु शब्देषु नस्य णत्वं न भवति।[2] 'क्षुभ्ना' इत्येवमादिषु, इति क्षुभ्नादिषु। 'रषाभ्यां नो णः इत्यादिशास्त्रेण प्राप्तस्य णत्वस्य निषेधोऽत्र विधीयते। 'क्षुभ्ना' इति स्वरूपग्रहणमेतत्, न धातुग्रहणम्, अन्यथा 'क्षोभणम्' इत्यत्रापि निषेधो भवति। 'क्षुभ्ना' इति क्षुभ्नाति, क्षुभ्नीतः, क्षुभ्नन्ति, इत्येतेषां स्वरूपाणामभिधानं करोति। 'क्षुभ्नीतः' इत्यत्र 'ई हल्यघोः' (6 ।4 ।113)

---

1 पदव्यवायेऽपि (8 ।4 ।38)।

2 क्षुभ्नादिषु च (8 ।4 ।39)।

इतीत्वे कृते, 'क्षुभ्नन्ति' इत्यत्र 'श्नाभ्यस्तयोरातः' (6 | 4 | 112) इत्यकारलोपे कृते च न स्वरूपग्रहणे दोषः, अत्र 'अजादेशस्य स्थानिवद्भावादेकदेशविकृतस्यानन्यत्वाद् वा' इति परिभाषाबलादिति। 'नृनमनः' इति। नृन् नमयतीति। अत्र 'पूर्वपदात्' इति णत्वप्राप्तिः, 'छन्दस्यृदवग्रहात्' इति चापि, किन्तु निषेधोऽत्रभवति। हरिनन्दी, हरिनन्दनः, गिरिनगरम्, इत्यत्रापि 'पूर्वपदात्' इति संज्ञायां णत्वं प्राप्नोति, परन्तु प्रतिषेधो विधीयते। 'नरीनृत्यते' इति। 'नृती' गात्रविक्षेपे, यङि। 'रीगृदुपधस्य च (7 |4 |90) इत्यभ्यासस्य रीगागमः, 'अट्कुप्वाङ...' इति णत्वम्, तन्निवृत्तिरिति। 'तृप्नोति' इति। तृप् प्रीणने, 'अट्कुप्वाङ्' इति णत्वम्, किन्तु तस्य निषेधः। परिनर्तनम्, परिगहनम्, इत्यत्र संज्ञायां 'पूर्वपदात्' इति णत्वम्, 'परिनन्दनम्' इत्यत्र 'उपसर्गादसमासे' इति णत्वम्, 'शरनिवेशः' शरनिवासः, 'शराग्निः', 'दर्भानूपः' इति संज्ञाः, 'पूर्वपदात्' इति णत्वं प्राप्यते किन्तु प्रतिषेधोऽत्र भवति। आचार्यभोगीनः, आचार्यानी, इत्यत्र 'अट्कुप्वाङ् इति णत्वम्, अत्रैवास्य प्रतिषेधः क्षुभ्नादिराकृतिगणः स्वीकृतः। सूत्रेऽविहितलक्षणो णत्वप्रतिषेधो निर्दिष्ट इति। अत्र प्रतिपादने कानिचिदुदाहरणानि प्रदत्तानि।

णत्वसारः

इत्थमाचार्यपाणिनिना नित्याऽनित्यसमानपदे णत्वविधानमुपदिष्टम्। आचार्येण ऋकाराद् णत्वं ज्ञापनादुक्तम्। यतो हि 'क्षुभ्नादिषु च' इत्यत्र 'नृनमनशब्दः' 'तृप्नोति' चेति शब्दद्वयं पठ्यते अथवा रश्रुतिसामान्येन ऋकारस्यापि ग्रहणं स्वतो भवति। वार्तिककारेण तु 'रषाभ्यां णत्वे ऋकारग्रहणम्' इत्युक्त्वा ज्ञापनं विहाय णत्वे साक्षाद् ऋकारग्रहणमावश्यकं प्रतिपादितम्। भाष्यकारेण वार्तिककारं प्रत्याख्याय सूत्रकारदिशा ज्ञापनादितः ऋकाराद् णत्वं स्वीकृतम्। काशिकाकारेण भाष्यकारं समादृत्य तथैव ऋकाराद् णत्वं विनिर्दिश्यते। 'न्यासः' पदमञ्जरी' इत्यादावपि भाष्यानुसारेण रेफाद् ऋकारं गृहीत्वा, ज्ञापकाद् वा ऋकारं गृहीत्वा ऋकाराद् णत्वं समाहितम्। कालान्तरे 'सिद्धान्तकौमुदी' इत्यत्र भट्टोजिदीक्षितेन ऋवर्णान्नस्य णत्वं वाच्यम्' इति वार्तिकमुल्लिख्य साक्षाद् ऋकाराद् णत्वं प्रतिपादितम्, ज्ञापनात् तेन ऋकाराद् णत्वं न स्वीकृतिमिति।

तस्यापि मते 'रषाभ्याम्' इत्यत्र विस्पष्टार्थम् ऋकारग्रहणमावश्यकमिति।

'रषाभ्याम्' –अट्कुप्वा' इत्याभ्यां नित्यसमानपदे णत्वं यथा विहितं भवत्येव, किन्तु तत्र 'नृनमनः' 'तृप्नोति' 'क्षुभ्नाति' इत्यादौ णत्वनिषेधोऽपि क्षुभ्नादित्वादिति, तथैव रामनाम, वृक्षान्, प्लक्षान्, अरीन्, गिरीन्, करिन् इत्यादौ नित्यसमानपदेऽपि पदान्तस्य नस्य णत्वं न भवति, 'पदान्तस्य' इति। एवं खारपायणः, मातृभोगीणः, पितृभोगीणः, इत्यादौ च तद्धितान्तस्थस्य नस्य णत्वं भवति, किन्तु आचार्यभोगीनः, आचार्यानी, इत्यादौ तथा सति णत्वं न भवति, 'आचार्यादणत्वम्' इति गणसूत्रेण। अनेन प्रकारेण नित्यसमानपदे क्वचित्तु णत्वं नापि भवतीति सन्दर्शितम्।

'पूर्वपदात्' इत्यनेन संज्ञायां 'शूर्पणखा' 'द्रुणसः' इत्यादौ णत्वं भवति, अनित्यसमानपदेऽपि। किन्तु तत्रैव रामनाथः, रघुनाथः, 'श्रीनाथः' इत्यादौ 'सर्वनाम' इतिवत् तु निपातनाद् णत्वं न भवति, संज्ञात्वेऽपीति। 'प्रातिपदिकान्त' इत्यनेन 'माषवापिणौ' ''माषवापेण' इत्यादौ विकल्पेन अनित्यसमानपदे णत्वं विधीयते। किन्तु तत्रैव 'आर्ययूना' 'क्षत्रिययूना' 'प्रपक्वानि' इत्यत्र 'युवादीनां प्रतिषेधो वक्तव्यः' इति वार्तिकानुसारेण णत्वं प्रतिषेधो भवति। 'उपसर्गादसमासेऽपि' इत्यनेन 'प्रणमति' इत्यादौ णत्वं प्राप्नोति। किन्तु तेन 'परिनन्दनम्' इत्यत्र प्राप्तं णत्वं क्षुभ्नादित्वान् निषिध्यते। तथैव 'प्रावनद्धम्' इत्यत्र तेनैव प्राप्तं णत्वं 'पदव्यवायेऽपि इति प्रतिषिध्यते। तथैव 'प्रनष्टः' इत्यत्र तेनैव प्राप्तस्य णत्वस्य 'नशेः' षान्तस्य' इत्यनेन निषेधः क्रियते। 'प्रभानम्' 'प्रभापनम्' 'निष्पानम्' 'सर्पिष्पानम्' इत्यादौ 'कृत्यचः' इत्यनेन प्राप्तस्य णत्वस्य 'न भाभू' इति 'षात् पदान्तात्' इति च क्रमशः प्रतिषेधः। किन्तु परियाणम्, प्रयाणम्, प्रमाणम्, इत्यादौ तु 'कृत्यचः' इति णत्वं भवत्येव। अनेन प्रकारेण पाणिनिनये 'रषाभ्याम्' इति 'अट्कुप्वाङ् इति च नित्यसमानपदे तथा च 'पूर्वपदात्' इत्यादिना अनित्यसमानपदे णत्वं यथा निर्दिष्टं प्रायिकमेवाभिलक्ष्यत इति संज्ञेयम्।

□

'छात्री' –शब्दस्य पाणिनीयत्वापाणिनीयत्वविमर्शः

केचित्तुच्छात्रशब्दस्य स्त्रीत्वविवक्षायां 'छात्री'तिपदस्य साधुत्वं स्वीकुर्वन्ति। प्रक्रियासर्वस्वकारेण नारायणभट्टेन स्पष्टं सर्वप्रथमं 'कार्मस्ताच्छील्ये' (अष्टा0 6/4/172) इत्यत्र 'छात्री'ति पदमुदाहृतम्। एतस्मात् पूर्वं 'छात्री'ति पदं कुत्रापि लिखितं न प्राप्यते। अनेन ज्ञायते यन्नारायणभट्टेन सर्वप्रथमं 'छात्री'तिपदस्य साधुत्वं विचार्य तस्योदाहरणमुखेन प्रस्तुतिर्लोकव्यवहारार्थं कृता। अस्य खण्डनं नागेशभट्टेन कृतम्। तदग्रे वक्ष्यते। किन्तु ततः परं व्याकरणाचार्येण रामशङ्करभट्टाचार्येण विद्यावन्तं नागेशभट्टं तिरस्कृत्य–'पाणिनीय व्याकरण का अनुशीलन' इतिनामके ग्रन्थे 'छात्रीशब्द का साधुत्व' इति शीर्षके 'छात्री' ति पदमेव साध्वस्तीति प्रतिपादितम्। तथा हि–'छत्रादिभ्योणः'(अष्टा04/4/62)इत्यत्रच्छत्रशब्दाण्णप्रत्ययेनच्छात्र इति पदं सिध्यति। ततस्ताच्छीलिके णेऽण् कृतानि भवन्तीति परिभाषाया नित्यत्वेनच्छात्रशब्दस्य स्त्रीत्वविवक्षायां ङीपि, ततश्छात्रीपदमेव भवति। कैयटोक्तदिशापिच्छात्रीति पदमेव साधु । तत्रच्छत्रादिगणे सर्वत्र 'अण्' इति कर्तव्यम्। 'छत्रादिभ्यो णः' इति सूत्रमपि पाणिनिना रचितं नास्ति। तत्तु पाणिनिना कस्माच्चित् प्राचीनव्याकरणादविकलरूपं गृहीतम्। अपि चशब्दकौस्तुभ–न्यास–पदमञ्जरी–काशिकाभाषावृत्ति–प्रक्रियाकौमुदी–प्रक्रिया सर्वस्वादिषु ग्रन्थेषु 'ताच्छीलिके णे' इति परिभाषाया अनित्यत्वं कुत्रापि न स्वीकृतम् । अर्वाचीनवैयाकरणानां (नागेशादीनाम्) शब्दसाधुत्वविचारे तु ज्ञानाऽल्पता विद्यते । यतो हि संस्कृतभाषायाः प्राचीनग्रन्थानां स्वल्पा–ऽध्ययनमेव तत्र प्रमाणम् ।अतश'छात्रा' इत्यस्य साधुत्वविषये तेषां निर्णयो महत्त्वहीनोऽस्ति । तथा च महाभाष्यकारस्य 'गुरोर्दोषावरणं छत्रं

तच्छीलमस्य छात्रः' इतिच्छात्रशब्दस्य व्युत्पत्तिरपि सांशयिकास्तीति भट्टाचार्यस्य प्रमुखोऽभिप्रायः। अत्राऽयमेवाभिप्रायो भट्टाचार्यस्यानुयायिनामपि।

भट्टाचार्येण तत्र यदभिहितं तन्नोचितम्।यदुचितं तद्विचार्यते 'छत्रादिभ्योणः' इति। छत्र, शिक्षा, प्ररोह,स्था, बुभुक्षा, चुरा, तितिक्षा (क्षमा), उपस्थान, कृषि, कर्मन्, विश्वधा, तपस्, सत्य, अनृत, विशिखा, विशका, भक्षा, उदस्थान, पुरोडा, विक्षा, (कासा), चुक्षा (हिंसा), मन्द्र (गभीर), इति प्रातिपदिकेभ्यो णप्रत्ययो भवति, तदस्य शीलमिति विषये।अत्र पूर्वसूत्रं 'शीलम्' (4।4।61) इत्यनुवर्तते। 'छात्र' इत्येवमादिभ्यश्छत्रादिभ्य इति। छत्रमिति। 'छद्' अपवारणे, ततः 'सर्वधातुभ्यः ष्ट्रन्' इत्यौणादिकेन ष्ट्रनि, 'इस्मन्त्रन्क्विषु च' (अष्टा0 6।4।97) इति ह्रस्वः।छादयतीतिच्छत्रमिति व्युत्पत्त्या लक्षणया वा छत्रं गुरुरिति, शिष्यस्याऽज्ञाननिवारणात्। गुरूपदेशादिविषयपालनेऽत्र गुरुशब्दस्य वृत्तिः। अतश्छत्रशब्दात् शीले णप्रत्ययेनच्छात्रः, छत्रं शीलमस्येति। कथं नाऽत्रच्छत्रशब्देन घर्मवृष्टिनिवारणादावरणविशेषो वै छत्रमिति गृह्यते। तथा त्वनर्थलाभो भविष्यति। यथा—छत्रधारणं शीलमस्येति स दासो राजपुरुषो वा। कथमत्रानर्थ इति। यतो हिच्छात्रशब्देन शिष्य इत्येवार्थोऽभिधानस्वभावाद् गृह्यते, न तु राजपुरुषो दासो वेति।तथा हि चात्र महाभाष्ये—किं यस्यच्छत्रधारणं शीलं सच्छात्रः*? किं चातः? राजपुरुषे प्राप्नोति। एवं तर्हि उत्तरपदलोपोऽत्र द्रष्टव्यः—छत्रमिवच्छत्रम्। गुरुश्छत्रम्—गुरुणा शिष्यश्छत्रवत् छाद्यः। शिष्येण गुरुश्छत्रमिव परिपाल्यः, इति।अत्र प्रदीपे—राजपुरुष इति। यः पुरुषो राज्ञश्छत्रं धारयति स छात्रशब्दाभिधेयः स्यादित्यर्थः। उत्तरपदलोप इति। उत्तरपदस्य इवशब्दस्य लोपो द्रष्टव्य इत्यर्थः। गौणवृत्तिश्छत्रशब्दस्याश्रयणीया। तत्रैव प्रत्ययस्य दर्शनादित्युक्तं भवति। गुरुश्छत्रमिव। अज्ञानं शिष्यस्य छादयतिनिवर्तयति, यतस्तत्र छत्रं

---

* 'सच्छात्र' इत्यत्र तुगागमो विचार्यः।

शीलमस्य गुरुविषयपालनं शीलमस्येत्यर्थः, इति कैयटेनोक्तम् । तथैव चात्र उद्द्योते –अज्ञानमिति। यथा छत्रमुष्णादि निवर्तयति, एवमज्ञानं गुरुर्निवर्तयति–इति तत्सदृशत्वाद् गुरु :–छत्रम् । वृत्तौ तद्विषयपालानादौ छत्रशब्दस्य वृत्तिः । तदुक्तं भाष्ये–शिष्येण गुरुश्छत्रमिव परिपाल्य इति। मुख्यार्थात्तु प्रत्ययो नानभिधानादिति बोध्यम्, इति नागेशेनोक्तम्। 'मुख्यार्थात्तु' इत्यस्याभिप्रायः–मुख्यार्थवाचकाच्छत्रशब्दात् णप्रत्ययो न भवति, तदा तु शीलविषये प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति, छात्रिको राजपुरुष इति, आपूपिकवत्। 'शीलम्' इत्यनेन।

कालान्तरे प्रसङ्गेऽस्मिन् किं नाम छत्रमिति किञ्चिन्नवेन व्याख्यानेन चिन्तितम्। गुरोर्दोषाणामावरणं छत्रम्, तच्छीलमस्यच्छात्रः, इति भट्टोजिदीक्षितेन सम्यक् पल्लवितम् । अस्य मूलं सर्वप्रथमं काशिकायां दृश्यते। तथा हि–'छत्रादिभ्यः' इति। छत्रं शीलमस्य छात्रः। छादनादावरणाच्छत्रम्। गुरुकार्येष्ववहितस्तच्छिद्रावरणप्रवृत्तश्छत्रशीलः शिष्यश्छात्र इति, तथैवात्र न्यासे–आच्छादयति हि यत् तच्छत्रमित्युच्यते, तेन शिष्योऽपि गुरुकार्य–तत्परो गुरोर्यानि छिद्राणि गोपयति तेषामावरणाय प्रवृत्तस्तत्र युक्तः सच्छत्रसहचारितां क्रियामाचरँश्छत्रशीलो भवति, इति। तथा च पदमञ्जर्यामपि 'छत्रशीलः' इति। छत्रसहचरिता छादनक्रियाशीलमस्येत्यर्थः। यदि त्वपूपभक्षणं शीलमस्यापूपिक इतिवत् छत्रावरणं शीलमस्य छात्रिक इति व्युत्पाद्यते, तदा दासेऽपि प्राप्नोति, अभि–धानस्वाभाव्यात्तु तथा नाश्रीयते इति। अनेन ज्ञायते यद्–भाष्यकारमते गुरुशब्दस्य गुरूपदिष्टशिष्यपरिपालने वृत्तिः। तथा हि चात्र–तत्र छत्रस्य शीलत्वानुपपत्तेः छत्रपदं गुरुदोषावरणे गौणमिति बालमनोरमायां वासुदेवदीक्षितेनोक्तम्। इत्थं भाष्यकाशिकादिषुच्छत्रमधिकृत्य भेदोऽव–बोध्यते।

उक्तविवेचनेन प्रतीयते यद् भाष्यकारसमये सर्वदोषाभावो गुराविति स्वीकृतिः प्रसिद्धासीत्। तदा तु गुरौ परब्रह्मणः प्रतिष्ठा संकल्पिता। 'गुरुः

साक्षात् पर ब्रह्म'ति। अतस्तत्र दोषकल्पना सवर्थाऽनर्थकारिणीति। तस्माद् भाष्यकारेण गुरुदोषावरणं छत्रमिति न स्वीकृतम्। अपितु गुरुश्छत्रमिति। किन्तु कालचक्रपविर्तनाद् गुरावपि कथञ्चिद् दोषोऽजायत। येन गुरुर्दोषावरणं छत्रमिति भट्टोजिदीक्षितप्रभृतिभिः स्वीक्रियते।

इत्थं छत्रं शीलमस्य स छात्र इति व्युत्पादितम्। ततश्छात्रशब्दस्य स्त्रियां किं स्यादिति विचार्यते। प्रचीनग्रन्थेषु कुत्रापिच्छात्रशब्दस्य स्त्रियां प्रयोगो न दृश्यते। सम्भवतोऽतिप्रचीनकालेऽरण्यस्थे गुरुकुले वेदाध्ययन परम्परान्विन्ता गुरुसमीपगाः पुरुषशिष्या एवासन्। अतः प्राचीनग्रन्थेषुच्छात्र इत्येव प्राप्यते। किन्तु शनैः शनैः सा वेदाध्ययनमूला पुरुषाध्ययनप्रधाना गुरुकुलपरिपाटी कालचक्रप्रवाहेण परिवर्तिता बभूव। पुरुषवत् स्त्र्यपि गुरुसमीपं गत्वाऽध्ययनं कृतवती। यतो हि वनस्थगुरुकुलं नगरस्थविद्यालये परिवर्तितम्। तत्र स्त्रीपुरुषयोः सहाध्ययनं गुरुसमीपे भवत्येव। यदि तत्र पुरुषोध्येता 'छात्रः' इति तदा स्त्री तु 'छात्रा' इत्येवाभिधेयम्। अत्र तु पाणिनितन्त्रं प्रमाणम्।

'छत्रादिभ्यो णः' (अष्टा0 4/4/62) इत्यनेन छत्रपदाच्छीले णप्रत्ययः, ततः स्त्रीत्वविवक्षायां 'टाप्' इति। अणोऽपवादार्थो णः। अण्णन्तत्वे तु 'ङीप्' स्यात्। 'टिड्ढाणञ्द्वयसज्दध्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' (अ0 4/1/15) इति। किन्तु चुरा शीलमस्याइति चौरी, तपः शीलमस्या इति तापसीत्यत्र कथं शीले 'ङीप्' स्यादिति चेत्। तत्र तु ज्ञापकादेव भवति। 'कार्मस्ताच्छील्ये' (6/4/172) इति सूत्रं ज्ञापकमत्र। सूत्रे 'कार्मः' इत्यत्र टिलोपनिपातनाज्ज्ञाप्यते–ताच्छीलिकेऽण्कृतानि भवन्तीति। तच्छीले भवः ताच्छीलिकः, ताच्छीलार्थक इति यावत्। अणि कृतानि कार्याणि–अण्कृतानीति, अथवा अणा कृतानि कार्याणि–अण्कृतानीति ज्ञेयम्। तत्र णप्रत्ययेऽपि अण्कार्यारोपणात् ङीब् भवतीति। तथा हि चात्र भाष्ये–यन्निपातनं करोति तज्ज्ञापयत्याचार्यः–ताच्छीलिकेऽण् कृतानि भवन्ति–इति। किमेतस्य ज्ञापने प्रयोजनम् ? चौरी, तापसी इति।

अण्णन्तादितीकारः सिद्धो भवतीति। तथैव काशिकायामपि–कार्मः इति ताच्छील्ये टिलोपो निपात्यते। कर्मशीलः कार्मः। 'शीलम्' 'छत्रादिभ्यो ण' (अष्टा0 4/4/61–62) इति णप्रत्ययः। यद्येवं किमर्थमिदम् , 'नस्तद्धिते' इत्येव टिलोपः सिद्धः ? सत्यमेतत्। ज्ञापनार्थं तु। एतज्ज्ञापयति ईकारः सिद्धो भवति। ताच्छील्ये इति किम् ? कर्मणः इदं कार्मणम् इति।

यदि ताच्छीलिकेऽण् कृतानि भवन्तीत्यनेन ज्ञापनेन चौरी तापसीति तदा कथं नानेन ज्ञापनेन 'छात्री'ति चेत्। तन्न, 'ज्ञापकसिद्धं न सर्वत्र' इति परिभाषया ज्ञापकसिद्धं कार्यमसार्वत्रिकम्। तस्मात् 'कार्मस्ताच्छील्ये' इत्यनेन यज्ज्ञापितं तत्तु शीले सर्वत्र अण्कृतं कार्यं न भवति। ज्ञापकसिद्धमत्राण्कृतं कार्यमनित्यं वर्तते। अतः चौरी तापसीत्यनयोरेवा–भिधानादण्कार्यत्वात् ङीब् भवति, नान्यत्रेति। यदि शीले सर्वत्र अण्कार्यमपेक्षितम् तदा तु किमनेन ज्ञापनेन। 'छत्रादिभ्योऽण्' इत्येव सर्वत्र शीले स्त्रियां ङीप् स्यात्। किन्तु पाणिनेरनभीष्टमिदम्। तस्मात् पाणिनिना शीले क्वाचित्कमण्कार्यमिति ज्ञापनार्थं 'कार्मस्ताच्छील्ये' इत्यस्याभिधानं कृतम्। तथैव भाष्यकारेण छत्रादिगणे केवलं 'चुरा' 'तपस्' इत्यत्रैवाण्कार्यं ज्ञापितम्। अयमेवाभिप्रायः न्यासेऽपि दृश्यते–यदि तर्हि ताच्छीलकेष्वण्कृतमिष्यते, अण्णेव छत्रादिभ्यः कस्मान्नोच्येत, तत्रापि अयमर्थः–ज्ञापनार्थं निपातनं कर्तव्यं न भवति। युक्तमेतदुक्तवानसि, वैचित्र्यार्थं त्वण्कृतम् इति । अत्रतु वैचित्र्यार्थमित्यस्याशयः–अत्राण्कृतं कार्यं विचित्रमस्ति। तत् क्वचिद् भवति, क्वचिन्न भवतीति। इत्थं नागेशभट्टेनाप्यत्रोद्द्योते ज्ञापकसिद्धस्याऽनित्यता प्रतिपादिता। तथा हि–ज्ञापके हि ज्ञापकसिद्धस्यासार्वत्रिकत्वात्–'छात्रा' इति सिध्यति।

किन्तु हरदत्तेन पदमञ्जर्यां 'कार्मस्ताच्छील्ये' इत्यस्य सूत्रस्य ज्ञापने निरर्थकता स्वीकृता। अपिच 'छत्रादिभ्योऽण्' इत्येवोचितमिति प्रतिपादितम्। तथा हि–'ज्ञापनार्थमि'ति। एवं च 'छत्रादिभ्योऽण्' इति लाघवाय कर्तव्यम्, णवचने प्रयोजनाभावात्। तथैवात्र कैयटेनापि प्रदीपे ताच्छीलिक इति। एवं

च 'छत्रादिभ्योऽण्' इति लाघवाय कर्तव्यम्, णवचने प्रयोजनाभावदिति। इत्थं हरदत्तकैयटयोर्वचने न केवलं प्रतिपाद्यविषयस्यैकरूपता, अपितु शब्देष्वपि चैकरूपता प्राप्यते। अत्र तु हरदत्तकैयटोक्तवचनं पाणिनिपतञ्जलिप्रतिपाद्यविरुद्धम् । यतो हिच्छत्रादिप्रातिपदिकात् 'अण्' इति पाणिनिनाऽप्रशस्तम्'। तथैव च पतञ्जलिनापि। तस्मादेव 'कार्मस्ताच्छील्ये' इत्यत्र ताच्छीलिकेऽण् कृतानि भवन्तीति असार्वत्रिकज्ञापकता प्रतिपादिता। नागेशभट्टेन वृहच्छब्देन्दुशेखरे 'टिड्ढाणञ्' इत्यत्र हरदत्तकैयटोक्तं पाणिनिविरुद्धं तद् वचनं दृढतया खण्डितम्। अपि च ज्ञापकसिद्धस्य क्वाचित्कताबलेन 'छात्रा' इति कल्पितम् । तथा हि–ताच्छीलिके इति। 'शीलं' 'छत्रादिम्यो णः' इति णे इत्यर्थः । 'अनि'त्यणि विहितप्रकृतिभावबाधनार्थेन 'कार्मस्ताच्छील्ये' इति टिलोपनिपातनेन ताच्छीलिके णेऽण्कार्यस्य ज्ञापनादिति भावः । न च 'कार्मस्ताच्छील्ये' इति सूत्रं न कार्यम्, ताच्छीलिके णेऽण्कार्यं भवतीति च न ज्ञाप्यम्, लाघवेन ङीबर्थं वचनारम्भस्यैव युक्तत्वादिति वाच्यम्। 'अणो द्वयच' इति फिञः फलान्तरस्यापि सत्त्वात्। अत एव भाष्ये 'अण्कृतानि भवन्तीत्युक्तम्। ज्ञापकसिद्धस्यासार्वत्रिकत्वाच्छात्रेत्येव। एतेन छत्रादिभ्योऽण्णेव कार्यः, किमनया कुसृष्ट्येति परास्तमिति ।

इत्थं प्रतीयते यद् हरदत्तेन कैयटेन चात्र पाणिनिप्रतिपाद्यविरुद्धोऽर्थो निरूपितः। ततस्तन्मतानुसारिणा नारायणभट्टेन 'छात्री' ति कुसृष्टिः कृता। ततोऽपाणिनीयप्रसङ्गादुद्विग्नो नागेशभट्टः 'छत्रादिभ्यो णः' 'कार्मस्ताच्छील्ये'चेति द्वयोः सूत्रयोः सार्थकतां प्रकटयन् ज्ञापकसिद्धस्यासार्वत्रिकत्वात् पाणिनिपतञ्जलिदिशा 'छात्रा' इति पदं सुसृष्टवानिति। ततश्च प्रमुखवैयाकरणाः 'छात्रा' इत्येव समर्थयन्ते । यथा हि भैरवमिश्रेण–''ङीबित्यर्थ इति । इदमुपलक्षणम् 'अणो द्व्यचः' इति फिञ्सिद्धिरपि प्रयोजनम्। एतेन यदि ङीप्सिद्धिरेव प्रयोजनं तदा स्वातन्त्र्येण ङीब्विधानेन सिद्धे ज्ञापनस्य नोपयोग इति परास्तम्। न च

छत्रादिभ्यो लाघवादण्णेव कार्यः किमनया कुसृष्ट्येति वाच्यम्, ज्ञापकद्धिस्यासार्वत्रिकत्वेन छात्रेत्यस्य सिद्ध्यर्थमेवाभिधानात्" इति शब्दरत्नस्य 'अण्कार्यमिति। ङीबित्यर्थः ।' इत्यस्य व्याख्याने भैरवी टीकायामुक्तम् ।तथैव भावप्रकाशटीकायामत्र वैद्यनाथेनोक्तम्–'ङीबितीति। इदमुपलक्षणम्, " अणो द्व्यचः" इति फिञोऽपि । अत एवोपक्रमभाष्येऽण्–कृतानीति बहुवचनप्रयोगः संगच्छते। एतेन "कार्मः" इति सूत्रं न कार्यं तथा न ज्ञाप्यं च । लाघवेन ङीबर्थवचनमेव कार्यमिति भ्रान्तोक्तमपास्तमिति ।'अनेन प्रकारेण चात्र नेनेमहोदयेन सरलाटीकायामपि प्रतिपादितम्–'ङीबित्यर्थ इति। 'शीलं' 'छत्रादिभ्यो णः' इति विहितो यो णस्तस्मिन्नण् कार्यं भवतीत्येतदर्थक–"कार्मस्तीच्छील्ये" इति परिभाषया णप्रत्ययान्ते चौर इत्यत्र अण्णन्तत्वारोपेण ङीबिति भावः। अत्र च " कार्मस्ताच्छील्ये" इति ज्ञापकम्। तत्र हि "अन्" इति सूत्रेणाणि परे विहितं प्रकृतिभावं बाधितुं टिलोपो निपात्यते । यदि तु ण प्रत्यये अण्कार्यं न स्यात्तर्हि किं तेन। ताच्छीलिकस्यैव णप्रत्ययस्याण्कार्यज्ञापनात् " तदस्यां प्रहरणमिति क्रीडायां णः' इति विहिते णे दाण्डा इत्येव । न चैवं लाघवात् छत्रादिभ्योऽण्णेव विधीयतां किं णप्रत्ययविधानेन, तस्याण्कार्यज्ञापनेन चेति वाच्यम्; ज्ञापकसिद्धस्यासार्वत्रिकतया 'छात्रा' इत्येतत् सिद्ध्यर्थत्वात्। किमधिकेन परिभाषेन्दुशेखरे 'ताच्छीलिकेणेऽणकृतानि भवन्ति' इति परिभाषाया व्याख्याने तात्याशास्त्र्यपरनामधेयेन रामकृष्णशास्त्रिणोक्तम्...... 'छत्रादिभ्योऽणि'ति वक्तव्ये णग्रहणादेषाऽनित्या, तेनच्छात्रेत्यत्र न ङीबिति बोध्यम्।

इत्थं नारायणभट्टेन कुसृष्टं 'छात्री'ति पदं नागेशेन भृशमपास्तम्। अपि च नागेशेन सुसृष्टं 'छात्रे'ति पदं प्रायः सर्वैरपि प्रमुखैर्विद्वद्भिः समर्थितम्। ततश्छात्राशब्दो व्यवहारे प्रबलतया प्रसिद्धोऽभवत्। अत्राव–धेयमिदं यद् भट्टोजिदीक्षितेन 'ताच्छीलिके णेऽपि। चौरी ? इति सिद्धान्तकौमुद्यां, तथा च –ताच्छीलिके इति। अयं भावः–"शीलम्"

''छत्रादिभ्यो णः'' इति ज्ञापकात्। अनेन हि ''अन्'' इति अणि विहितं प्रकृतिभावं बाधितुं टिलोपो निपात्यते। चौरीति। चुराशीलमस्याः' इति यदुक्तं प्रौढमनोरमायां तस्यैव स्पष्टं व्याख्यानं कृत्वा नागेशभट्टेन वृहच्छब्देन्दुशेखरे छात्रेति पदं सुसृष्टमिति। अतश्छात्रापदं भट्टोजिदीक्षितसम्मतमपि विद्यते इति।

हन्त, पुनरपि रामशंकरभट्टाचार्यवदन्ये केचिद् विद्वांसो भ्रमाच्छात्रीति पदं साधु मन्यन्ते। तत्र तु तेषां दुराग्रह एव प्रमाणमिति। रामशंकरभट्टाचार्येण छात्रीत्यस्य समर्थने या कापि चपलचर्चा 'पाणिनीय व्याकरण का अनुशीलन' इति नामके ग्रन्थे कृता, तथा चान्यैस्तन्मतानुसारिभिरसमीक्षितवादिभिरन्यत्र तादृशी चर्चा छात्रीत्यस्यसमर्थने क्रियते, सा सर्वा पाणिनिविरुद्धाऽस्ति। छात्रेतिपदविधातरि नागेशभट्टे यदल्पज्ञतारोपणं रामशंकरभट्टाचार्येण कृतम्, तत्तु तस्यैव भट्टाचार्यस्यैवाल्पज्ञतोद्भूतमस्ति। अतो रामशंकरभट्टाचार्येण छात्रीति सिद्धौ कृतं सर्वमवतरणमपाणिनीयत्वादग्राह्यम्। 'छात्रा' इत्येव सुसृष्टिर्नागेशभट्टवत् परिपाल्या सुधीभिरिति।

❒

[9]

'अभिज्ञानशकुन्तलम्' इति पदौचित्यविमर्शः

सम्प्रति संस्कृतवाङ्मये कालिदासकृता एकपञ्चाशद् ग्रन्थाः प्राप्यन्ते । भाषाशैलीविमर्शनात् तेषां सर्वेषां ग्रन्थानां कर्ता कश्चिदेक एव विद्वान् नास्तीति विदुषां मतम् । अपि तु बहुभिर्विद्वद्भिस्ते ग्रन्थाः कालिदासस्य नाम्ना विरचिता : । अनेन ज्ञायते यत् कश्चित् प्रख्यातयशाः कालिदासः पुरा बभूव । यस्य वैदुष्यं विदुषां मध्ये व्याप्तमासीत् । कालान्तरे तेन कालिदासेन प्रभाविता अन्येऽपि केचिद् विद्वांसः स्वरचितानां ग्रन्थानां विद्वत्सु प्रतिष्ठासंवर्धनाय तेषां कर्ता कालिदास इत्युल्लिखितवन्तः । किन्तु प्रेक्षावद्भिरनेकप्रमाणबलेन निर्णीतं यत्तेषु एकपञ्चाशद्ग्रन्थेषु ऋतुसंहारम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, कुमारसम्भवम्, मेघदूतम्, रघुवंशम्, अभिज्ञानशाकुन्तलम् चेत्येव सप्त ग्रन्थाः केनचिदेकेन प्रख्यातनाम्ना कविकुलगुरुणा कालिदासेन कृताः सन्ति । एतेषु ग्रन्थेषु ऋतुसंहारं मेघदूतं चेति गीतिकाव्यद्वयं खण्डकाव्यद्वयं वा, कुमारसम्भवं रघुवंशं चेति महाकाव्यद्वयम्, मालविकाग्निमित्रं विक्रमोर्वशीयम् अभिज्ञानशाकुन्तलं चेति नाटकत्रयमित्यस्ति । अत्र 'अभिज्ञानशाकुन्तलम्' इति नाटकाभिधायि पदं विद्वत्सु विवादितमस्ति । यतो हि पाण्डुलिपिषु 'अभिज्ञानशाकुन्तलम्' इति पदस्य स्थाने कुत्रचिद् 'अभिज्ञानशकुन्तला', कुत्रचिच्च 'अभिज्ञानशकुन्तलम्' इति प्राप्यते । केचिद् 'अभिज्ञानशाकुन्तलम् इत्येव, अन्ये 'अभिज्ञानशकुन्तला' इत्येव तथा चापरे 'अभिज्ञानशकुन्तलम्' इत्येव पदं साधुत्वान्नाटककथानुकूलं स्वीकुर्वन्ति । किन्तु तेषां कतमं पदं नाटककथानुकूलं कालिदासाभिमतं भवेदिति विचारणीयम् । अतएव कैश्चिद् वादैः तन्निरूप्यते ।

अधुना प्रायो विद्वांसः 'अभिज्ञानशाकुन्तलम्' इत्येव पदं साधु इति

प्रमाणयन्ति। अस्मिन् प्रसङ्गे गजेन्द्रगडकरमतं प्रामुख्येणोल्लेखनीयम्। अभिज्ञानशाकुन्तल–शीर्षकव्याखाने,* 'अभिज्ञानशाकुन्तलम्' 'अभिज्ञानशकुन्तलम्,' अभिज्ञानशकुन्तला' चेति नाम्ना पृथक् पृथक् शीर्षकत्रयं प्राप्यते, इति तेन स्वीकृतम्। किन्तु तत्र 'अभिज्ञानशाकुन्तलम्' इत्येव शीर्षकं सर्वप्रकारेण सुसङ्गतमस्ति। यतोहि तस्य व्याख्यानं सुकरमिति । तथा हि – "अभिज्ञायते अनेन इति अभिज्ञानम्, शकुन्तलामधिकृत्य कृतं नाटकं शाकुन्तलम्। 'अधिकृत्य कृते ग्रन्थे ' (पा0 4–3–87) इत्यण्, तद्धितेष्वचामादेः (पा0 7–2–171) इति वृद्धिः । अभिज्ञानप्रधानं शाकुन्तलम्–अभिज्ञानशाकुन्तलम् इति मध्यमपदलोपी समासः।**

अस्मिन् व्याख्याने त्रयः पक्षाः सन्ति। केवलं शकुन्तलामधिकृत्य कृतं नाटकमस्ति, न तु अभिज्ञानमधिकृत्य कृतं नाटकमिति प्रथमः पक्षः । नाटके अभिज्ञानस्य प्रधानता शकुन्तलायाश्चाऽप्रधानता अस्ति, इति द्वितीयः पक्षः। अभिज्ञानशाकुन्तलपदे मध्यमपदलोपी समासः, इति तृतीयः पक्षः।

अत्र गजेन्द्रगडकर–महोदयस्य व्याख्याने प्रथमः पक्षः नोचितः । यतो हि नाटकस्य कथावस्तु अभिज्ञानपदार्थस्य शकुन्तलापदार्थस्य च प्राधान्येनैव परिपूर्णतां याति। अतः 'अभिज्ञानं' 'शकुन्तलां' चेति द्वेऽधिकृत्यैव नाटकं कृतं भवेत् न तु केवलं शकुन्तलामधिकृत्य। द्वितीयपक्षोऽपि नोचितः । यतो हि यां शकुन्तलामधिकृत्यैव यन्नाटकं कृतमस्ति तस्मिन्नाटके शकुन्तला पदार्थस्यैवाप्रधानता तथा च कस्माच्चित् प्रसङ्गात् प्राप्ताभिज्ञानपदार्थस्य प्रधनता इति विसङ्गतिः । तृतीयपक्षोऽपि नोचितः। यतोहि तत्र मध्यमपदलोपी समासोऽसमर्थः' द्वन्द्वसमासस्य प्रसक्तत्वाादिति। अभिज्ञानं च शाकुन्तलं च इत्यनेन 'अभिज्ञानशाकुन्तलम्' न तु अभिज्ञानप्रधानं शाकुन्तलम्–'अभिज्ञानशाकुन्तलम्' इति, यत्रान्येषां समासनां गतिर्नास्ति तत्रैव मध्यमपदलोपी समासो भविष्यति, न हि सर्वत्र

---

* अभिज्ञानशाकुन्तल–गजेन्द्र गडकर–नोट्स–पृष्ठ–119–120।

** तत्रैव पृष्ठ–119

यथाभिलषितम्। अत्र तु द्वन्द्वसमासस्य गतिरस्त्येव । अत एवात्र मध्यमपदलोपी समासो न करणीयः। मध्यमपदलोपी समासस्तु सर्वथा अगतिकगतिरेव । इत्थं गजेन्द्रगडकरमहोदयेन कृतम् 'अभिज्ञानशाकुन्तलम्' इति पदस्य व्याख्यानं नाटककथ्यविरुद्ध व्याकरणविरुद्धं चेति प्रतीयते। अनेन व्याख्यानेन केवलम् 'अभिज्ञानशाकुन्तलम्' इति पदमेव केनापि प्रकारेण साधनीयं तत्र कापि साधुता भवेन्न वेति गजेन्द्रगडकरमहोदयस्य पक्षो निश्चीयते।

गुरुप्रसादशास्त्रिमहोदयेनापि 'अभिज्ञानशाकुन्तलम्' इत्येव पदं साधु सुसङ्गतं चेति स्वीकृत्य तस्य व्याख्यानं कृतम्–'अभिज्ञायतेऽस्मिन् तदभिज्ञानम्, शकुन्तलामधिकृत्य कृतं शाकुन्तलम् अभिज्ञानं च तत् शाकुन्तलं च अभिज्ञानशाकुन्तलम्, उपचारान्नाटकमपि।*

अस्मिन् व्याख्याने चत्वारः पक्षाः सन्ति । अभिज्ञायतेऽस्मिन् तदभिज्ञानमिति, अभिज्ञानपदेऽधिकरणे ल्युडिति प्रथमः पक्षः। शकुन्तलामधिकृत्य कृतं शाकुन्तलमिति द्वितीयः पक्षः । अभिज्ञानं च तत् शाकुन्तलं च अभिज्ञानशाकुन्तलम् इत्यनेन कर्मधारयसमासः इति तृतीयपक्षः । उपचारान्नाटकमपि । इति चतुर्थः पक्षः ।

अत्र यदि प्रथमः पक्षः स्वीक्रियेत तदा 'अधिकरणे ल्युट्' इत्यनेन अभिज्ञायतेऽस्मिन्निति व्युत्पत्तौ केवलम् 'अभिज्ञानम्' इत्येव स्वतन्त्रं पदं नाटकार्थं युक्तं भवति । किं पुनः 'अभिज्ञानशाकुन्तलम्' इति पदेन। यदि 'अभिज्ञानशाकुन्तलम्' इत्येवेष्टम्, तर्हि अभिज्ञानपदेऽधिकरणार्थे ल्युट् कथं सुसङ्गतं भवेदिति । अतएव प्रथमपक्षे अधिकरणार्थे ल्युट् इति व्यर्थमेव। यदि द्वितीयः पक्षः 'शकुन्तलामधिकृत्य कृतं शाकुन्तलम्' इति स्वीक्रियेत तदा केवलं 'शाकुन्तलम्' इत्येव नाटकाभिधायि पदं युक्तं स्यात् । शकुन्तलायाः कथानके अभिज्ञानस्यापि ग्रहणं भविष्यत्येव। यदि

*अभिज्ञानशाकुन्तलम्–गुरूप्रसाद शास्त्री, प्रथमोऽङ्कः–'अद्य खलु कालिदासग्रथितवस्तुना...' इति व्याख्यानम्।

अभिज्ञानपदमपि अभीष्टं तर्हि अभिज्ञानं च शकुन्तलां च अधिकृत्य कृतमिति ग्रहणे का हानिः ? अत एव केवलं शकुन्तलामधिकृत्य कृतमिति कथनं नोचितं भवति। यदि अभिज्ञानं च तत् शाकुन्तलं च अभिज्ञानशाकुन्तलम् इत्यनेन कर्मधारय–समासः, इति तृतीयपक्षोऽङ्गीक्रियेत तदा कर्मधारयसमासाश्रयेण न कापि युक्तिर्दृश्यते, समानाधिकरणसामर्थ्याभावात्। विशेषण–विशेष्यभावोऽत्र 'अभिज्ञानशाकुन्तल' पदेनाऽभिप्रेतः तदभावे कर्मधारयसमासोऽपि नोचितः। न केवलं शकुन्तलामधिकृत्य नाटकं किन्तु 'अभिज्ञान'– मधिकृत्यापि, तस्माद् द्वन्द्वे सति अभिज्ञानशकुन्तलयोर्द्वयोः पदयोः प्रधानता स्वयमेव प्राप्यते। नाटकेऽस्मिन् सर्वत्र अभिज्ञानस्य च शकुन्तलायाश्च प्रधानता दृश्यते। न तत्र कुत्रापि एकस्य प्रधानता, अपरस्याऽप्रधानतेति। अत एव व्याख्याने कर्मधारयग्रहणं कथमपि न वरम्, तस्माद् व्याख्यानगततृतीयपक्षोऽसंगत एव। व्याख्याने 'उपचारान्नाटकमपि' इति चतुर्थपक्षोऽपि नोचितः, उपचाराभावात्। यदा तु शकुन्तलामधिकृत्य यत् कृतं तत्तु प्रसङ्गात् नाटकमेव न तु किञ्चिदन्यदस्ति। अत उपचारग्रहणं व्याख्याने निरर्थकमेव। इत्थं गुरुप्रसादशास्त्रिमहोदयेन 'अभिज्ञानशाकुन्तलम्' इत्येव साधु, इति समर्थनाय यत् प्रपञ्चितं तदपि निर्दुष्टं नास्ति।

श्रीसुबोधचन्द्रपन्तमहोदयेन 'अभिज्ञानशाकुन्तलम्' इति पदस्य त्रिधा व्याख्यानं प्रस्तुतम्।* यथा हि–

'अभिज्ञानं (भावे ल्युट्) (अभिज्ञानभूतम् इत्यर्थः) च तत् शाकुन्तलं (शकुन्तलायाः इदं शाकुन्तलम् इति अण्) च 'अभिज्ञानशाकुन्तलम्' इति प्रथमं व्याख्यानम्।'अस्मिन् व्याख्याने 'अधिकृत्य कृते ग्रन्थे' (पा0 4–3–87) इत्यनेन प्राप्तं सप्रसङ्गाधिकारं परित्यज्य 'तस्येदम्' (पा0 4–3–120) इत्यनेन प्राप्तमप्रसङ्गाधिकारादण्विधानं कथमपि न साधु। पुनश्च

---

* अभिज्ञानशाकुन्तलम्–1/1 – सुबोधचन्द्रपन्तकृतटीकायाम्।

अभिज्ञानं च तत् शाकुन्तलञ्च अभिज्ञानशाकुन्तलम् इति कर्मधारयसमसनं पूर्ववद् द्वन्द्वाधिकारान्नाटककथ्यविरोधाच्चाऽग्राह्यम्। द्वितीयं व्याख्यानं यथा–अभिज्ञानं च शकुन्तला च अभिज्ञानशकुन्तले ते अधिकृत्य कृतं दृश्यकाव्यम्–अभिज्ञानशाकुन्तलमिति। अस्मिन् व्याख्याने 'अभिज्ञानं च शकुन्तला च अभिज्ञानशकुन्तले ते अधिकृत्य कृतं दृश्य काव्यम् अभिज्ञानशाकुन्तलम्' इति यदुक्तं तस्माद् अभिज्ञानशकुन्तलीयम्' इत्येव भवितुमर्हति, 'शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननेभ्यश्छः'(पा0 4–3–88) इति। अथवा 'लुबाख्यायिकाभ्यो बहुलम्' इति वार्तिकेन प्रत्ययलोपाद् अभिज्ञानशकुन्तले इत्येव न तु 'अभिज्ञानशाकुन्तलम्' इति च भवितुमर्हति। अत एव द्वतीयं व्याख्यानमपि दूषितम्। तृतीयं व्याख्यानं यथा–अभिज्ञानेन स्मृता शकुन्तला अभिज्ञानशकुन्तला तामधिकृत्य कृतं दृश्यकाव्यम्–'अभिज्ञानशाकुन्तलम्' इति यदुक्तं तस्माद 'आभिज्ञानशकुन्तलम्,' पूर्वपदवृद्धिः 'तद्धितेष्वचामादेः' (पा0 7–2–171) इति, न तूत्तरपदवृद्धिपूर्वकम् 'अभिज्ञानशाकुन्तलम्'। यतो हि प्रसङ्गेऽस्मिन्नुत्तरपदवृद्धिकारकं किमपि प्रमाणं नास्ति। अत एव तदसिद्धमेव। इत्थं श्री सुबोधचन्द्रपन्तकृतं त्रिधा व्याख्यानं दूषणत्वाद्'अभिज्ञानशाकुन्तलम्' इति पदं कथमपि न साध्नोति।

श्रीमद्रेवाप्रसादद्विवेदिमहोदयेनापि 'अभिज्ञानशाकुन्तलम्' इति पदस्य साधुतायाः समर्थनं नूतनेन व्याख्यानेन कृतम्। यथा हि– ''शाकुन्तलः शाकुन्तलेयोऽपि, शकुन्तलायां जातत्वात्, मिथिलायां जातत्वान्मैथिलवत् (अ0 सू0 4–3–25, 53) एवं च शाक–पार्थिवादित्वात् करणल्युण्णिष्पत्तिका'भिज्ञान'–पदग्राह्याङ्गुलीयकरक्षाकरण्डकविशिष्टं यत्, शकुन्तलां, तस्यां जातं शाकुन्तलं चाधिकृत्य कृतं च यत्, तन्नाटकम् 'अभिज्ञानशाकुन्तलमिति साधीयान् पन्थाः।*''

अस्मिन् व्याख्याने 'शाकुन्तलः शाकुन्तलेयोऽपि, शकुन्तलायां

*कालिदासग्रन्थावली–रेवाप्रसादद्विवेदी, अभिज्ञानशाकुन्तलम्–पादटिप्पणी।

जातत्वात्, मिथिलायां जातत्वान्मैथिलवत् (अ0 सू0 4–3–25, 53)इति निरूपणं तु कथमपि न वरम्। यतो हि शकुन्तलायां जातत्वात् शाकुन्तलः शाकुन्तलेयः, इति तु 'तत्र जातः' (अ0 स0 4–3–25) तथा च 'तत्र भवः' (अ0 सू0 4–3–53) इत्यन्यतरसूत्रेण अपत्यार्थे विरुद्धमेव। अपत्यं विहाय अन्यत् सर्वं यत्किञ्चिन्मिथिलायां जातं भवं वा मैथिलवज्जातादिशैषिकाद्यार्थेषु भवितुं शक्नोति । मिथिला तु देशविशेषः। अतो देशादिवाचिनो मिथिलादिशब्दाज्जतार्थेषु अण्प्रत्ययेन मैथिलादयः, न तु स्त्रीविशेषवाचकशकुन्तलापदादपत्यार्थे 'तत्र जातः' 'तत्रभवः' इत्यन्यतरसूत्रेण शाकुन्तलः शाकुन्तलेय इति।

एवं च व्याख्याने शाकपार्थिवादित्वाद् अभिज्ञानविशिष्टं च यत् शाकुन्तलम् अभिज्ञानशाकुन्तलम् इति निरूपणमपि न समीचीनम्। यतो हि अभिज्ञानं च शाकुन्तलं च अभिज्ञानशाकुन्तलम्, इति तु सुकरेण द्वन्द्वस्य प्राप्तिः। अत्र किमर्थं शाकपार्थिवादित्वान्मध्मपदलोपी समासः। तस्मात्तु अकारणं गौरवमेव। मध्यमपदलोपी समासोऽन्यसमासाभावेऽर्थप्रतिपत्तौ ग्राह्यः, न तु सर्वत्रैव। अत्र तु सहजतया द्वन्द्वप्राप्तौ शाकपार्थिवादित्वान्मध्यमपदलोपी समासो न संगच्छते।

पुनश्च व्याख्याने शकुन्तलां तस्यां जातं शाकुन्तलं चाधिकृत्य कृतं नाटकं शाकुन्तलम्, इति निर्वचनमपि न साधु। यतो हि शकुन्तलां च शाकुन्तलं चाधिकृत्य कृतं 'नाटकम् शकुन्तलाशाकुन्तलीयम्', इत्येव साधु, विक्रमोर्वशीयवत् 'शिशुक्रन्दयमसभद्वन्द्रेजननेभ्यश्छः (पा0 4–3–88) इति, अथवा शाकुन्तलाशाकुन्तलम्, दैवासुरादिवत्, 'द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः' इत्यनेन वार्तिकेन छ–प्रतिषेधे 'अण्' पूर्वपदवृद्धिश्चेति, अथवा 'लुबाख्यायिकाभ्यो बहुलम्' इत्यनेन वार्तिकेन अण्लोपात् शकुन्तलाशाकुन्तलम्, इत्येव भवितुमर्हति, न तु शाकुन्तलमिति द्वन्द्वकैशेषाभावात्। अत्र तु द्वन्द्वैकशेषत्वं 'शाकुन्तलम्' इति केनापि प्रमाणेन भवितुं न शक्नोति। अत एव श्रीमद्रेवा प्रसादद्विवेदिकृतव्याख्यानेन

'अभिज्ञानशाकुन्तलम्' इति स्थाने अभिज्ञानपूर्वकम्' अभिज्ञानशकुन्तलाशाकुन्तलीयम् 'अभिज्ञानशकुन्तलाशाकुन्तलम्' यद्वा ' अभिज्ञानशकुन्तलाशाकुन्तलम्' इत्येव सिध्यति । तेन व्याख्यानेन तु 'अभिज्ञानशाकुन्तलम्' इति पदं कथमपि न सिध्यति । अतः तद् व्याख्यानं न साधीयान् पन्था इति ।

इत्थं श्रीगजेन्द्रगडकर – श्रीगुरुप्रसादशास्त्रि – श्रीसुबोध चन्द्रपन्त–श्रीरेवाप्रसादद्विवेदिमहोदयैः 'अभिज्ञानशाकुन्तलम्' इति पदमधि –कृत्य यद् यद् भिन्नं भिन्नं व्याख्यानं कृतं तत् तन्नाटककथ्यविरुद्धम्, क्लिष्टकल्पनापोढं, गौरवास्पदम् अपाणिनीयं चेति प्रतिभाति। तस्मान्नाटकाभिधायि ' अभिज्ञानशाकुन्तलम्' इति पदमसङ्गतं प्रतीयते। अत एव तन्नोचितम् ।

अस्य नाटकस्य अन्यन्नाम 'अभिज्ञानशकुन्तला' इत्यपि प्राप्यते। किन्तु विद्वत्सु तस्य समादरो नास्ति। गजेन्द्रगडकरकृतेऽपि तत्तु नाभिमतम्। पुनरपि तेन तस्य व्याख्यानं कृतम्। यथा हि– अभिज्ञानेन स्मृता शकुन्तला अभिज्ञानशकुन्तला, लक्षणया नाटकमपि।*

अस्मिन् व्याख्याने 'अभिज्ञानेन स्मृता शकुन्तला' इत्यनेन मध्यम–पदलोपी समासः । सोऽप्यप्रासङ्गिकः' द्वन्द्वस्य प्राप्ताविति। पुनश्च व्याख्याने 'अभिज्ञानशकुन्तला लक्षणया नाटकमपि' इति यदभिधानं कृतं तत्तु विसङ्गतमेव । यतो हि यदि लक्षणया तत्पदेन नाटकस्याभिधानं भविष्यति तर्हि 'अभिज्ञानशकुन्तला' इति स्थाने 'अभिज्ञानशकुन्तलम्' इत्येव साधु। यथा यवैः क्रीतः' यवक्रीतः 'यवक्रीतमधिकृत्य कृतमाख्यानमुपचाराद् यवक्रीतम्** इत्यादिवत्। अत एव अभिज्ञानशकुन्तला, इत्यपि नाटकाभि–धायि पदमसङ्गतमेव । अनेन प्रकारेण ज्ञायते यद् 'अभिज्ञानशाकुन्तलम्'

---

*अभिज्ञानशाकुन्तल–गजेन्द्र गडकर–नोट्स–पृष्ठ–200।

**सिद्धान्तकौमुदी–भट्टोजिदीक्षितः–क्रतूक्थादिसूत्रान्ताट्ठक्

(पा0 4–2–60)–वृत्तिः ।

'अभिज्ञानशकुन्तला' चेति पदद्वयस्य प्रयोगे विदुषां भ्रम एव कारणम्। स्ववैदुष्यप्रदर्शनाय केनचिद 'अभिज्ञान–शाकुन्तलम्' इति, केनचिद् 'अभिज्ञानशकुन्तला' चेति पदं कालान्तरे नियोजितम्। किन्तु तत् पदं नोचितमिति प्राक्प्रतिपादितमेव। अग्रे नाटकस्य समुचितं शीर्षकपदं निरूप्यते।

नाटकस्य समुचितं शीर्षकपदम् 'अभिज्ञानशकुन्तलम्' इत्येव प्रतीयते। यतो हि पदस्यास्य व्याख्यानं सुसङ्गतं, लाघवमूलकं, नाटककथ्यानुकूलं व्याणरणसम्मतं चेति भवितुं शक्नोति तर्हि किं तद् व्याख्यानमस्ति ?

अभिज्ञानेन (अभिज्ञानेन स्मृता इत्यर्थः)शकुन्तला यस्मिन् तन्नाटकम्–'अभिज्ञानशकुन्तलम्'* किमिति तद् व्याख्यानमस्ति ? तत् तु नास्ति। यतो हि व्याख्याने व्यधिकरणबहुव्रीहिसमासोऽस्ति। स तु नोचितः। 'समानाधिकरणनां बहुव्रीहिः कर्तव्यः। किं प्रयोजनम् ? व्यधिकरणानां मा भूदिति। पञ्चभिर्भुक्तमस्येति' भाष्यवचनात्।** अतो व्यधि–करणबहुव्रीहिसमासोऽत्राऽश्रद्धेयः। क्वचित् तु कण्ठेकाल इत्यादौ यो बहुव्रीहिः स सप्तमीपूर्वपदस्योत्तरपदलोपपूर्वकात् समानाधिकरणात् कण्ठेस्थः कालो यस्य इति विग्रहेण समानाधिकरण एव।क्वचित् तूपमानपूर्वपदस्योत्तरपदलोपपूर्वकाद् उष्ट्रमुखादौ यो बहुव्रीहिः सोऽपि समानाधिकरणः उष्ट्रमुखमिव मुखं यस्येति विग्रहेण।'सप्तमीविशेषणे बहुव्रीहौ, (पा0 2 – 2 – 35) इतिज्ञापकत्वेन ये व्यधिकरणबहुव्रीहिं स्वीकुर्वन्ति, तेऽसमीक्षितवादिनः।सूत्रे सप्तमीग्रहणस्याभिप्रायः सप्तमीपूर्वपदस्योत्तरपदलोप एव। तस्मात् तत्रापि समानाधिकरणानां बहुव्रीहिः, न तु व्यधिकरणनामिति।अन्यथा 'शेषो बहुव्रीहिः, (पा02–2–23),

---

*अभिज्ञानशाकुन्तल–गजेन्द्रगडकर–नोट्स–पृष्ठ–119।

**अनेकमन्यपदार्थे (पा0 2–2–24) इति सूत्रे–'बहुव्रीहिः समानाधिकरणानाम्' इति वार्तिकस्य भाष्यम्।

'अनेकमन्यपदार्थे' (पा0 2–2–24) इति द्वयोः सूत्रयोः 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' इति वार्तिकस्य, 'व्यधिकरणानां माभूदिति, पञ्चभिर्भुक्तमस्येति, भाष्यवचनस्य च व्यर्थता भविष्यति। अतएव व्याख्यानेऽस्मिन् व्यधिकरणबहुव्रीहिसमासोऽसमर्थत्वादनुपादेय एव। तस्मात् तृतीयान्तेन व्यधिकरणपदेन प्रथमान्तपदं बहुव्रीहौ न समस्यते। अतःअभिज्ञानेन शकुन्तला यस्मिन् तन्नाटकम् अभिज्ञानशकुन्तलम्' इति पूर्वोक्तं व्याख्यानं त्रिमुनिव्याकरणाद् विरुद्धमिति ।

किं तर्हि 'अभिज्ञानेन स्मृता शकुन्तला – अभिज्ञानशकुन्तला, मध्यमपदलोपिसमासः, पुनः प्रतिपाद्यप्रतिपादकभावेन नाटकस्य विशेषाणत्वाद् अभिज्ञानशकुन्तलम् * इति व्याख्यानं भवितुं शक्नोति ? तन्न, समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च' इति वार्तिकेन व्यधिकरणत्वादत्र मध्यमपदलोपिसमासस्याभावः । पुनश्चात्र द्वन्द्वसमासस्य सामर्थ्येनापि मध्यमपदलोपिसमासस्यावसर एव नास्ति । तर्हि कथमनेन व्याख्यानेन 'अभिज्ञानशकुन्तलम्' इति।

किं तर्हि 'अभिज्ञानेन स्मृता शकुन्तला अभिज्ञानशकुन्तला (मध्यम पदलोपी समासः) अभिज्ञानशकुन्तला अस्ति अस्य तत् नाटकम् अभिज्ञानशकुन्तलम्। अर्शआदित्वाद् अच् मत्वर्थीयः। 'अर्शआदिभ्योऽच्' (पा0 5–2–127),** इति व्याख्यानं भवितुं शक्नोति ? तदपि नोचितम्। यतो हि अस्मिन् व्याख्यानेऽपि मध्यमपदलोपिसमास एतत्पूर्वव्याख्यानगतमध्यमपदलोपिसमासवन्नोचितः। पुनश्च अर्शआदिगणमध्ये 'अभिज्ञानशकुन्तला'–सदृशः कोऽपि शब्दो न पठितः । तस्मादाकृत्यभावे 'अभिज्ञानशकुन्तला' पदात् मत्वर्थे अच् न योज्यः, अप्रासङ्गिकत्वादिति। अत एव तदपि व्याख्यानं भवितुं नार्हति।

किं तर्हि 'अभिज्ञानं च शकुन्तला च अभिज्ञानशकुन्तलम्, तदधि–

---

*अभिज्ञानशाकुन्तलम्–गजेन्द्रगडकर–नोट्स्–पृष्ठ–200।

**तदेव

कृत्यकृतं नाटकम्–'आभिज्ञानशाकुन्तलम्' द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः, इति वार्तिकेन 'अण्' 'अनुशतिकादीनां च (पा0 7–3–20) इत्युभयपदवृद्धिः। पुनश्च 'लुबाख्यायिकाभ्यो बहुलम्' इति वार्तिकेन प्रत्ययलोपाद् 'अभिज्ञानशकुन्तलम्' इति व्याख्यानं भवितुं शक्नोति ? कथं तद् भवितुं शक्नोति ? यतो हि व्याख्याने पदत्रयम् अभि+ज्ञान+शकुन्तला, इति । न हि तत्रोभयपदता। अनुशतिकादीनां गणे तूभयपदता, न तु त्रिपदता। तत्र 'अभिज्ञानशकुन्तला' –सदृशः कोऽपि शब्दो नास्ति। अत एव उभयपदवृद्धिरत्र न कर्तव्या। तस्माद् व्याख्यानेऽस्मिन् अग्रिमं सर्वं प्रपञ्चनं व्यर्थमेव।

यदि सर्वमीदृशं प्रपञ्चनं व्यर्थमेव तदा 'अभिज्ञानशकुन्तलम्' इति पदस्य कीदृशं निर्दुष्टं प्रपञ्चनं भवेदिति ? श्रूयतां तत् । अभिज्ञानं च शकुन्तला च अभिज्ञानशकुन्तलम्, द्वन्द्वैकवद्भावः, सर्वो द्वन्दो विभाषैकवद् भवतीति।*पुनश्च तदधिकृत्य कृतं नाटकम् अभिज्ञानशकुन्तलीयम्, शिशुक्रन्दयमसभद्वेन्द्रजननेभ्यश्छः (पा0 4–3–88)इति छः, ततश्च 'लुबाख्यायिकाभ्यो बहुलम्' इति वार्तिकेन प्रत्ययलोपाद् 'अभिज्ञानशकुन्तलम्' इति निर्दुष्टं प्रपञ्चनम् तत् तु लाघवमूलकं व्याकरणसम्मतं नाटककथ्यानुकूलं चेति निःसन्देहम् 'अभिज्ञानशकुन्तलम्' इति नाटकशीर्षकपदम्। अस्यार्थः–दुष्यन्ताभिज्ञानं च शकुन्तलां चाधिकृत्य कृतं नाटकम्–'अभिज्ञानशकुन्तलम्' इति । कथमत्र 'दुष्यन्ताभिज्ञानम्, इति स्थाने 'अभिज्ञानम्, इति ग्रहणं कालिदासेन कृतम्, इति चेत् । तत्तूचितमेव। पूर्वपदलोपोऽत्र द्रष्टव्यः । तद्यथा–देवदत्तो दत्तः, सत्यभाभा भामेति। अथवा व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्।**कालिदासेन न हि केवलमत्रैव पूर्वपदस्य लोपः कृतः, अपि तु 'विक्रमोर्वशीयम्' इत्यत्रापि

---

*'विभाषामृगतृणधान्य' (पा0 2–4–12) महाभाष्यवचनम्।

**व्याकरणमहाभाष्यम्–प्रथमाह्निकम्– 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकव्याख्यानम् ।

पूर्वपदसय लोपः तेन कृत एव । अत्र किं पूर्वपदं वर्तते, इति चेत् ।पुरूरवसः, इति। समासे तु पुरूरवोविक्रमः इति। पुरूरवोविक्रमश्च च उर्वशी च पूर्वपदलोपवूर्वकं 'विक्रमोर्वशि' तदधिकृत्य कृतं नाटकं 'विक्रमोर्वशीयम्'। इत्थं कालिदासस्य पूर्वपदलोपोऽभीष्ट एव तथैव द्वन्द्वैकवद्भावोऽपि। कालिदासस्य नाटकत्रयशीर्षकेषु द्वन्द्वैकवद्भाव एवास्ति । तथा हि– 'मालविकाग्निमित्रम्' 'विक्रमोर्वशीयम्' 'अभिज्ञानशकुन्तलम्' इति। न केवलं नाटकत्रयशीर्षकेषु कालिदासस्य द्वन्द्वैकवद्भावे रुचिः प्रतीयते, अपि तु नाटकान्तर्गतेषु वर्णनेष्वपि। तथा हि अभिज्ञानशकुन्तले–

त्वमर्हतां प्राग्रसरः स्मृतोऽसि य–
च्छकुन्तला मूर्तिमती च सत्क्रिया।
समानयन् तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः ।*

अत्र 'वधूवरम्' इति प्रयोगे कालिदासेन द्वन्द्वैकवद्भावाद् वधूः (शकुन्तला) च वरः (दुष्यन्तः) चेति द्वयोः प्रधानता तुल्यता च प्रदर्शिता । इत्थम् (अभिज्ञानशकुन्तलम्) इति शीर्षकपदेऽपि अभिज्ञानं च शकुन्तला च इति द्वयोः प्रधानता वर्तते तथा च तत्पदद्वयेन प्रतीतपदार्थद्वयस्य प्राधा–न्यान्नाटकं पूर्णतां याति। अतः कालिदासेन द्वन्द्वैकवद्भावम् 'अभिज्ञानशकुन्तलम्' इति पदं नाटकस्य शीर्षककृते पुरा स्वीकृतमासीदिति प्रतीयते। कालान्तरे भ्रमात् केनचिद् 'अभिज्ञानशाकुन्तलम्' केनचिच्च 'अभिज्ञानशकुन्तला' इति नियोजितम्। 'अभिज्ञानशाकुन्तलम्' इत्यनेन, 'अभिज्ञानशकुन्तला' इत्यनेन च यद् यदभिधानमभिलषितं तत् सर्वम् 'अभिज्ञानशकुन्तलम्' इत्यनेनैव सहजतयोपलभ्यते, किं पुनः 'अभिज्ञानशाकुन्तलम्' 'अभिज्ञानशकुन्तला' चेत्यसङ्गतपदकल्पनया, तया तु किमपि लाघवमपि न दृश्यते समीक्षक–विचक्षणेन विदुषा केनापि

---

*अभिज्ञानशकुन्तलम्–5/15। M R Kale, 1913 संस्करणम्।

यदुक्तं–कालिदासस्य सर्वस्वमभिज्ञानशकुन्तलमिति तस्मादुक्तादपि 'अभिज्ञानशकुन्तलम्' इत्येव पदं समर्थितम्। प्रख्याततीकाकारेण राघवभट्टेनाऽपि अभिज्ञानशकुन्तलम्' इत्येव पक्षः समाश्रितः।* अत एव शिष्टसमुदाचारोऽपि पक्षेऽस्मिन् प्रमाणम्। अतः कालिदासाभिमतं नाटककथानुकूलं च 'अभिज्ञानशकुन्तलम्' इत्येव पदं समीचीनमस्ति।

❑

**अर्थद्योतनिका–पृष्ठ–5, MR Kale, 1913 संस्करणम्।

ज्यौतिषपदसमीक्षा

अतिप्राचीनकालाज्ज्यौतिषं ज्योतिषमिति पदद्वयं ज्योतिःशास्त्रकृते प्रयुक्तं दृश्यते । किन्तु प्रबलतया ज्योतिर्विदेषु ज्योतिषमिति पदमुच्चारणसुकरतया प्रयुक्तमभवत् । उच्चारणस्याल्पक्लेशेन कालान्तरे ज्यौतिषपदं ज्योतिःशास्त्रकृतेऽप्रयुक्तं भूत्वा प्रायोऽप्रमाणिकं जातम् । अत्र ज्यौतिषपदं ज्योतिःशास्त्रकृते प्रामाणिकमप्रामाणिकं वेति विचार्यते ।

ऋग्वेदो भारतीयज्ञानविज्ञानस्य प्राचीनतम आकरो ग्रन्थ इति स्वीक्रियते । तत्र ज्योतिःशास्त्रविषयक–विविध–बीजानि सुप्रतिष्ठितानि दृश्यन्ते । तत्र ज्योतिषं ज्यौतिषं वेति पदं प्रयुक्तं नावलोक्यते । किन्तु कालान्तरे वेदतो यदा स्वतन्त्ररूपेण विविधशास्त्राणां पृथग् निर्माणं मुनिभिराचार्यैर्वा भाषायां कृतमासीत् तदा तैर्ज्योतिः शास्त्रकृते ज्यौतिषं ज्योतिषं वेतिपदं प्रयुक्तमित्यत्र नास्ति संदेहः । वेदाङ्गत्वेन ज्योतिःशास्त्रं स्वीकृतम् । ततः सर्वप्रथमं लगधमुनिना ज्योतिःशास्त्रप्रतिपादनार्थं 'वेदाङ्गज्यौतिषम्' इति नाम्ना ग्रन्थः प्रणीतः । तत्र तेन 'ज्यौतिषम्' इति प्रयुक्तम् । यथा हि–

यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद् वेदाङ्गशास्त्राणां ज्यौतिषं मूर्धनि स्थितम् ।।*

अपि च भास्कराचार्येणाऽपि ज्यौतिषम् इति पदं बहुवारं प्रयुक्तम् ।
यथा हि–

वेदास्तावद् यज्ञ कर्मप्रवृत्ताः
यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।

*वेदाङ्ग ज्यौतिषम्–4

शास्त्रादस्मात् कालबोधो यतः स्याद्
वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात् ।।
शब्दशास्त्रं मुखं ज्यौतिषं चक्षुषी
श्रोत्रमुक्तं निरुक्तं च कल्पः करौ ।
या तु शिक्षास्य वेदस्य सा नासिका
पादपद्मद्वयं छन्द आद्यैर्बुधैः ।।
वेदचक्षुः किलेदं स्मृतं ज्यौतिषं
मुख्यता चाङ्गमध्येऽस्य तेनोच्यते ।
संयुतोऽपीतरैः कर्णनासादिभिश्
चक्षुषाङ्गेन हीनो न किञ्चित्करः ।।
तस्माद्द्विजैरध्ययनीयमेतन्
मुख्यं रहस्यं परमं च तत्त्वम् ।
यो ज्यौतिषं वेत्ति नरः स सम्यग्
धर्मार्थकामान् लभते यशश्च ।।*

अनेन ज्ञायते यत् लगधमुनिप्रणीतः''वेदाङ्गज्यौतिषम्' ग्रन्थः सर्वप्राचीनो ज्योतिःशास्त्रग्रन्थ उपलभ्यते येन 'ज्यौतिषम्' इति पदं विन्यस्तम् । वेदाङ्गज्यौतिषस्य संस्कृतभाषा वेदसमकालिकतया आधुनिकसंस्कृतनियमेषु अनिबद्धा दृश्यते । अतः संस्कृतज्ञानां कृते वेदाङ्ग ज्यौतिषस्यार्थावबोधनं दुष्करं संजातम् । तस्मात् केचन संस्कृत–विद्वांसोऽर्थकरणे विलपन्ति प्रलपन्ति चेदं यत् वेदाङ्गज्यौतिषस्य पाठोऽशुद्धो वर्तते । किन्तु वैदिकेषु वेदाङ्गज्यौतिषस्य पाठोऽद्यापि वेदाङ्गज्यौतिषग्रन्थवदेव प्रचलति । तत्र पाठे परम्पराया एव प्रामाण्यमवबोध्यम् । यथा वेदः पारम्परिकपाठेन गृह्यते तथैव वेदाङ्गत्वाद् 'वेदाङ्गज्यौतिषम्' अपि पारम्परिकपाठे सुरक्षितम् । आधुनिकसंस्कृतविदुषां

* सिद्धान्तशिरोमणि :– गणिताध्यायः– 9–12, रामनाथ मजूमदार स्ट्रीट, हरिसनरोड, कलकत्ता (1915 ई0) ।

कृते वेदाङ्गज्यौतिषस्य प्राचीनता तस्य भाषा च निश्चितं दुर्गम्या वर्तते । एतादृशे प्राचीनतमे ज्योतिःशास्त्रग्रन्थे 'ज्यौतिषम्' इति प्रयुक्तं पदं त्वस्य प्राचीनतामेवावबोधयति । ततः प्रथमभास्कराचार्येणापि स्वकीये 'सिद्धान्तशिरोमणि' ग्रन्थे 1072 तमे शकाब्दे* ज्यौतिषपदं ज्योतिःशास्त्रकृते बहुकृत्वः प्रयुज्य तस्य सार्थकता प्रतिपादिता। केचन आधुनिक–ज्योतिःशास्त्रमर्मज्ञा अपि ज्यौतिषपदं समादरेण ज्योतिःशास्त्रकृते विनियोजितवन्तः । यथा हि रूपनारायणशर्मणा 'बृहज्ज्यौतिषसारः' इति ग्रन्थः संपादितः । तत्र तेन 'ज्यौतिष' पदं न्यस्तम् । अपिच तेन ग्रन्थारम्भे स्वीयं ग्रन्थं प्रतिलिखितम् – 'ज्यौतिषाचार्यश्रीरूपनारायणशर्मणा सम्पादितः' इत्यत्रापि ज्यौतिषपदं प्रयुक्तम् । 'बृहज्ज्यौतिषसारः' ग्रन्थोऽयं 'ठाकुर प्रसाद एण्ड सन्स बुक्सेलर, राजादरबाजा, वाराणसी' इति प्रकाशकेन प्रकाशितः । भास्करानन्दलोहिनीमहोदयेन 'ज्यौतिषसंहिता' इति ग्रन्थो लिखितः । ग्रन्थोऽयं हिन्दीभाषायां रचितः । तत्र आचार्येण ज्यौतिषपदं प्रयुक्तमेव । ग्रन्थोऽयं लेखकेन 'आग्रहायण प्रकाशन, 15 चाँदगंजगार्डन, लखनऊ' इति प्रकाशनद्वारा प्रकाशितः ।

वराहमिहिरेण 407–509 शकाब्देषु मध्ये** निजजीवनलीला दध्रे । तस्मिन् समये तेन ज्योतिःशास्त्रस्य स्कन्धत्रयेऽनेके ग्रन्था लिखिताः । तेन ज्यौतिषं ज्योतिषं वेति पदं विहाय तत्कृते ज्योतिःशास्त्रमिति निर्विवादितं पदं नियोजितम् । यथा हि–

ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं
तत्कात्स्न्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता ।
स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ
होरान्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ।।***

---

*श्री शंकर बालकृष्ण दीक्षित– भारतीय ज्योतिष, पृष्ठ 340, तृतीय संस्करण, हिन्दीभवन, लखनऊ 1975 ई0 ।

**तदेव पृष्ठ 290

*** बृहत्संहिता–उपनयनाध्यायः–9

वराहमिहिरकृतबृहज्जातकस्य टीकाकारेण भट्टोत्पलमहोदयेन वराहदृशा ज्यौतिषं ज्योतिषं वेति पदं विहाय तत्कृतेऽसमस्तं पदं 'ज्योतिषां शास्त्रम्' इतिकृत्वा योजितम् । यथा हि–

यच्छास्त्रं सविता चकार विपुलैः स्कन्धैस्त्रिभिर्ज्योतिषां
तस्योच्छित्तिभयात्पुनः कलियुगे संसृत्य यो भूतलम् ।
भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधा–
दित्थं यं प्रवदन्ति मोक्षकुशलास्तस्मै नमो भास्वते ।।*

इत्थमन्येऽपि बहव आधुनिकज्योतिर्विदाः सन्ति ये ज्यौतिषं ज्योतिषं वेति किमपि पदं स्वेषु ग्रन्थेषु न नियोजितवन्तः । ते च ज्योतिष्पदपूर्व कमेवनिजग्रन्थाभिधानमपि कर्तुं समुचितंमन्यन्ते । तथैव ते कुर्वन्त्यपि । यथाहि–

1–शिवदासविरचितः ज्योतिर्निबन्धः ।

2–रघुनाथनिर्मिता ज्योतिर्माला ।

3–कालिदासकृतम् ज्योतिर्विदाभरणम् ।

4–केतकरकृतं ज्योतिर्गणितम् ।

5–शङ्करबालकृष्णदीक्षितकृतो ज्योतिर्विलासः । उक्तग्रन्थाः शङ्करबालकृष्ण दीक्षितकृते 'भारतीय ज्योतिषं' इति ग्रन्थे तथा च गोरखप्रसादकृते 'भारतीय ज्योतिषका इतिहास' इति च ग्रन्थे समुल्लिखिताः सन्ति ।

ज्योतिःशास्त्रविषयका बहवो ग्रन्था ज्योतिषपदव्यवहृताः समुपलभ्यन्ते । अधुना तु प्रायो ज़नैः ज्योतिःशास्त्रार्थं ज्योतिषमित्येव पदं संस्कृते हिन्दीभाषायां वा व्यवह्रियते । ज्योतिषपूर्वपदाः शताधिकग्रन्था ज्योतिःशास्त्रविषयकाः प्रकाशिता अप्रकाशिता वा पुस्तकालयेषु संरक्षिताः सन्ति । यथा हि–

1– ज्योतिषरत्नम्– अस्य लेखकस्य नाम गोविन्द पण्डितोऽस्ति । जी

*बृहज्जातकम्–विवृत्तिमङ्गलाचरणम्–2

बूल्हरमहोदयस्य सूचिकायामस्य संख्या 'IV 140' इत्युल्लिखितम् ।

2– ज्योतिषरत्नकोशः– अस्य लेखकस्य नाम लल्ल इति । भण्डारकर शोध संस्थानेऽस्य पाण्डुलिपिर्वर्तते। ग्रन्थसंख्या 27 (1880–81) अस्ति। आर जी भण्डारकरमहोदयस्य सूचिकायां संख्या 'पी 166' इति विद्यते

3– ज्योतिषरत्नमाला– अस्य लेखकस्य नाम अज्ञातं वर्तते। जी बूल्हरमहोदयस्य हस्तलिखितग्रन्थसूचिकायां ग्रन्थागारे ग्रन्थोऽयं 1482 इति संख्ययोपलब्धः । श्रृङ्गेरीभरतपुर–अखिलभारतीयसंस्कृतपरिषदां ग्रन्थागारेष्वपि अस्य पाण्डुलिपिर्वर्तते।

4– ज्योतिषरत्नसारः – अस्यलेखकस्य नाम श्रीपतिः । मिथिलाया हस्तलिखितग्रन्थसूचिकायामस्य ग्रन्थस्योल्लेखः IV 123 इतिसंख्यया वर्तते।

5– ज्योतिषाभरणम् – अस्य लेखकस्य नाम त्रिविक्रमः । मैसूरनगरस्य हस्तलिखितग्रन्थागारे ग्रन्थोऽयमुपलब्धः । ग्रन्थसंख्या 1 पी 645 इति।

6– सचित्र ज्योतिषशिक्षा – हिन्दीभाषायां प्रकाशितो ग्रन्थः । अस्य ग्रन्थस्य लेखकः पी0 एल0 ठक्कुरः । 'मोतीलालबनारसीदास' इत्यनेन प्रकाशकेन प्रकाशितः ।

7–भारतीय ज्योतिष का इतिहास– हिन्दी भाषायां प्रकाशितो ज्योतिःशास्त्रीयेतिहासग्रन्थः । अस्य लेखकः गोरखप्रसादः । 'हिन्दीसमिति उत्तर प्रदेश शासन' इति संस्थया प्रकाशितः ।

8– भरतीयज्योतिष– मूलग्रन्थः मराठीभाषायां विद्यते। अस्य लेखकः शंकरबालकृष्ण दीक्षितः । शिवनाथ झारखण्डी महोदयेन हिन्दीभाषायामनूदितः । हिन्दी समिति, उत्तर प्रदेश शासन' इति संस्थया प्रकाशितः ।

इत्थमन्येऽपि बहवो ग्रन्था वर्तन्ते यत्र ज्योतिषपदमुल्लिखितम् । यस्मात् केचिद् विद्वांसो ज्योतिषपदप्रयोगाधिक्यं वीक्ष्य विचारयन्ति यज्जोतिःशास्त्रार्थं केवलं 'ज्योतिषम्' इत्येव पदं समीचीनं भवेन्नतु

'ज्यौतिषम्' इति तेषु व्याकरणाचार्यो रामशंकर भट्टाचार्यमहोदयः सर्वाग्रणीरस्ति येन बहुयत्नेन ज्यौतिषपदस्थाने ज्योतिषपदमेव' व्यवहर्तव्यमिति समालोचितम् । अग्रे तस्यैव व्याकरणाचार्यमहादेयस्य ज्योतिषपदविषयकोऽभिनिवेशः सारेण प्रस्तूयते–

" अस्माकं मते शास्त्रस्य नाम ' ज्योतिषम्' इत्येव विद्यते न तु 'ज्यौतिषम्' इति। शास्त्रविशेषस्य 'ज्यौतिषम्' इति नाम तु निश्चितमाधुनिक विदुषां कल्पनाभूतम्। तस्यां कल्पनायामाधारः पाणिनेः सूत्रस्य भ्रान्तव्याख्यावगन्तव्या । 'ज्यौतिषम्' इति न शिष्टैर्व्यवहृतं न च वैयाकरणसम्मतम्। केषुचिद् वर्षेषु 'ज्यौतिषम्' इत्यस्य लेखने प्रवृत्तिर्दृश्यते। यैर्विद्वद्भिः 'अधिकृत्य कृते ग्रन्थे (4/3/87) 'इति सूत्रमनुसृत्य 'ज्यौतिषम्' इति साधितं तैस्तु सूत्रस्य तात्पर्यो न ज्ञायते। अतः 'ज्योतिषम्' इत्येव प्रयोक्तव्यं न तु ज्यौतिषम्" इति श्रीभट्टाचार्यः। *

अत्र श्रीभट्टाचार्यमहोदयेन 'ज्यौतिषम्' इति शास्त्रविशेषे वैयाकरणाऽसम्मतमिति यदुक्तं तत्सर्वं–प्रथमं चिन्त्यम् । मुनित्रये पाणिनिप्रतिष्ठा प्रथमं स्वीक्रियते । पाणिनिना स्वकीये 'अष्टाध्यायी' ग्रन्थे कुत्रापि 'ज्योतिषम्' ज्यौतिषम्' वेति पदं नोल्लिखितम्। पाणिनिकाले सम्भवतः ज्योतिषम्, ज्यौतिषम्, वेति पदं 'ज्योतिःशास्त्र कृते विवादितमासीत्। तदा तु नूनमेव व्यवहारे द्वयोः शब्दयोः प्रयोग आसीत् । यतो हि एकतो लगधमुनिना पाणिनेः प्राग् 'ज्यौतिषम्' इति पदमधिकृत्य 'वेदाङ्गज्यौतिषम्' इति नामकं ज्योतिःशास्त्रं विरचितमेव । अपरतो मुण्डकोपनिषिदि 'शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषम्' (1 ।1 ।5) इत्यत्र'ज्योतिषम्' पदं प्रयुक्तमेवासीत् । अतः पाणिनिना 'अष्टाध्यायी ग्रन्थे ' विवादभयात् ज्यौतिषं ज्योतिषं वेति पदप्रयोगो न कृतः, इति मन्ये। किन्तु

*पाणिनीय व्याकरणका अनुशीलन – 'अधिकृत्य कृते ग्रन्थे' सूत्र एवं ज्योतिषशब्द। पृ0 203–207

पाणिनिना 'अष्टध्यायी' ग्रन्थे द्वयोः शब्दयोः साधनविधिरुल्लिखितः।*

इत्थं पाणिनिना ज्यौतिषं ज्योतिषं वेति द्वयोर्लोकप्रचलितविवादितपदयोः प्रयोगं विहाय 'अष्टाध्यायी' ग्रन्थे तद्द्वयोः पदयोः साधनविधिर्लोकव्यवहारार्थं व्यवस्थापितः । पाणिनेरिदं कृत्यं समुचितमेवासीत् । पाणिनिना तदेव कृतं यदेकेन निष्पक्षेण विधिव्यवस्थापकेन लोकहिताय कर्तव्यमिति । तयोः पदयोः पाणिनिसम्मतनिष्पत्तिरग्रे यथास्थानं वक्ष्यते ।

अग्रे भगवता पतञ्जलिना 'ग्रन्थान्ताधिके च' (6।3।79) इति भाष्ये 'ज्यौतिषम्' 'ज्योतिषम्' वेति लोकव्यवहृतं ज्योतिःशास्त्रप्रतिपादकं पदमुदाहृतम् । प्राचीनप्रकाशिते महाभाष्ये तत्र 'सकाष्ठं ज्यौतिषमधीते । सकलं सुमूर्हतम्,** नवीनप्रकाशिते महाभाष्ये तु 'सकाष्ठं ज्योतिषमधीते । सकलं सुमूर्हतम्' *** इति पाठः । पाठभेदात् 'ज्यौतिषम्' 'ज्योतिषम्' वेति किं पदं भगवत्पतञ्जलिमतमिति तु न निश्चीयते । पुनरपि प्राचीन–प्रकाशितभाष्ये 'ज्यौतिषम्' इत्येव पदं महाभाष्यकारसम्मतं प्रतीयते । तथैव 'ग्रन्थान्ताधिके च' इत्यत्र काशिकाकारेणापि 'ज्यौतिषम् 'ज्योतिषम्' वेति पदं प्रयुज्यते । तथा हि– 'ग्रन्थान्तेऽधिके च वर्तमानस्य सह शब्दस्य स इत्ययमादेशो भवति। सकलं ज्यौतिषमधीते । समूहर्तम्। इत्येकस्यां प्रकाशितायां काशिकायाम्।**** 'सकलं ज्योतिषमधीते । इत्यपरस्यां प्रकाशितायां काशिकायाम्।*****'ग्रन्थान्ताधिके च' इत्यत्र सिद्धान्त–कौमद्यामपि क्वचित् 'ज्यौतिषम्' इति पाठः प्राप्यते इति स्वयं श्री भट्टाचार्येण

*अधिकृत्यकृते ग्रन्थे (4।3।87), तस्येदम् (4।3।120), अर्श आदिभ्योऽच् (5।2।127) ।

** महाभाष्यम्–निर्णयसागराख्यमुद्रणालये मुम्बय्यां प्रकाशितम्, सन्1921।

***महाभाष्यम्–मोतीलाल बनारसीदासेति प्रकाशकेन प्रकाशितम्–सन 1967।

****काशिका–हैदराबादनगरे उस्मानिया विश्वविद्यालयस्थ संस्कृत परिषदा प्रकाशिता–सन् 1970।

*****काशिका–वाराणसीनगरे चौखम्भासंस्कृत संस्थानेन प्रकाशिता, सन् 1992।

स्वीकृतम् । *तत्र च नागेशभट्टमहोदयेनापि 'बृहच्छब्देन्दुशेखरे'– 'ज्यौतिषमिति पाठे ज्योतिष इदम् इत्यर्थः' इत्युक्त्वा 'ज्यौतिषम्' इति पाठः स्वीकृतः । तथा च तेन तथा व्युत्पत्तिरपि ज्योतिष इदं ज्यौतिषमिति, 'तस्येदम्' (4 |3 |120) इति पाणिनिमता व्यवहृता ।

इदमाश्चर्यं यद् अमरकोशे वेदाङ्गभूतं व्याकरणं तथाच ज्यौतिषं ज्योतिषं वेति पदं न संकलितं विद्यते । सम्भवतःव्याकरणं प्राचीनं पदं नविद्यते । पुरा व्याकरण कृते प्रमुखतया 'शब्दानुशासनम् 'इति पदं प्रयुक्तं जातम् । यथाहि–'अथ शब्दानुशासनम्' इति ।अत एव अमरकोशकारेण नवघटितं व्याकरणपदं कोशे न संगृहीतमिति मन्ये ।तथैव तेन ज्योतिःशास्त्रकृते ज्यौतिषं ज्योतिषं वेति विवादितं पदं कोशे न संकलितम् । किन्तु तेन कोशे 'ज्यौतिषिक'पदं संगृहीतम् । ज्यौतिषं ज्योतिषं वा अधीते वेद वा ज्यौतिषिक इति । 'तदधीते तद्वेद' (4 |2 |159) इति । अत्र ध्यातव्यं यद् 'अमरकोशः' एकोऽतिप्राचीनकोशो विद्यते । किन्तु विवादात् कोशे ज्योतिषं ज्यौतिषं वेति पदं न गृहीतम् । यद्यपि कोशकारो द्वयोः सुविज्ञातास्ति, पुनरपि तेन उभौ शब्दौ विहाय पाणिनिदिशा तयोः प्रयोगं लोके निक्षिप्य द्वयोः शब्दयोः प्रकारान्तरेण साधुता प्रकटिता । यतो हि ज्यौतिषिकशब्दो ज्यौतिषं ज्योतिषं वेति द्वाभ्यामेव शब्दाभ्यां सह सिद्धो भवितुं शक्नोति । अत एव अमरकोशकारेण ज्यौतिषिक इति शब्दप्रयोगेण लोके ज्यौतिषं ज्योतिषं वेति सत्ता स्वीकृता । यद्यपि भानुजीदीक्षितेन ज्यौतिषिकपदस्य व्युत्पत्तिः केवलं ज्योतिषपदेनैव प्रकटिता । तथा हि– ' ज्योतिर्नक्षत्राद्यधिकृत्य कृतो ग्रन्थः । 'अधिकृत्य कृते ग्रन्थे (4 । 3 । 87) इत्यण् । संज्ञापूर्वकत्वान्न वृद्धिः । ज्योतिषमधीते वेद वा 'क्रतूक्थादि– (4 । 2 । 60) इति ठक्' इति । अत्र भानुजीदीक्षितस्य 'ज्योतिषमधीते वेद वा ' इति ज्यौतिषिकपदव्युत्पत्तिः कोशकारदृशा निश्चितमेकाङ्गिका प्रतीयते ।

---

*पाणिनीय व्याकरण का अनुशीलन– पृष्ठ 205, पादटिप्पणी । प्रकाशक– इन्डोलोजिकल बुक हाउस, वाराणसी, सन् 1966 ।

श्री भानुजीदीक्षितस्य अभिप्रायः केवलं 'ज्योतिषम्' इत्येव पदे वर्तते। किन्तु कोशकारस्याभिप्रायो ज्यौतिषपदेऽपि भवितुं शक्नोति। दीक्षितेन यथा 'ज्योतिषम् इति पदं संज्ञापूर्वकत्वान्न वृद्धिरिति साधितं तथैव ज्योतिषिक इति कथं न साध्यते, तत्रापि संज्ञात्वाद् वृद्धेरभावो भवितुं शक्नोति । यथा हलायुधकोशे 'ज्योतिषिक इति पाठः प्रस्तुत एव । तत्र 'ज्यौतिषकः इत्यपि पाठभेदो वर्तते । किन्तु तत्रापि ज्योतिषं ज्यौतिषं वेति व्यवहारो अमरकोशवद् न विद्यते। नवीनकोशेषु 'ज्योतिषम्' इत्येव केवलं स्वीकृतम् 'ज्यौतिषम्' पदं सर्वथा वर्जितम्। यथाहि वाचस्पत्ये 'ज्योतिषम्' इति। एवमन्यत्रापि कोशे।

ज्यौतिषं ज्योतिषं ज्यौतिषिकः ज्योतिषिकः वेति पदं 'ज्योतिः' इति पदमूलकं विद्यते । अत्रादिपदद्वयं ज्योतिःशास्त्राभिधायि, ततः परं पदद्वयं ज्योतिःशास्त्रविज्ञाभिधायीति बोध्यम्। ज्योतिःशब्दो वैदिकवाङ्मये बहु–प्रयुक्तः। तत्र प्रायः सूर्यार्थे ज्योतिः शब्दो विद्यते, किन्तु क्वचित् प्रकाशार्थे क्वचिच्च प्रकाशमानार्थे भवति। यथा हि प्रकाशार्थे ज्योतिः शब्दः–

अधि पेशांसि वपते नृतूरिव पोर्णुते वक्ष उसेव वर्जहम्।
ज्योतिर्विश्वस्मै भुवनस्य कृण्वती गावो न व्रजं व्युषा आवर्तमः।।
विश्वमस्या ननाम चक्षसे जगज्ज्योतिष्कृणोति सूनरी।
अपद्वेषो मघोनी दुहिता दिव उषा उच्छदप स्रिधः।।*

यथा हि प्रकाशमानार्थे ज्योतिः शब्दः –

अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान्।
किं नूनमस्मान्कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य।।**
अत्र ज्योतिः द्योतमानमिति सायणाचार्यः।

कोशेषु ज्योतिःशब्दस्यानेकार्थाः संजाताः । यथा हि– 'ज्योतिर्भद्योतदृष्टिषु' इत्यमरः । ज्योतिरग्नौ दिवाकरे । 'पुमान्, नपुंसकं दृष्टौ स्यान्नक्षत्रप्रकाशयोः।।' इति मेदिनी। नक्षत्रम्, प्रकाशः, दृष्टिः अग्निः,

* ऋग्वेदः (1।48।8), (1।42।4)
** ऋग्वेदः (8।48।3)

मेथिका, विष्णुरिति हलायुधः । विज्ञानमिति शब्दार्थचिन्तामणिः । परब्रह्मेत्यपि वाचस्पत्यम् । 'ज्योतिर्ब्रह्मणि विश्वेशे नक्षत्रे ग्रहमण्डले' इति बृहज्जातकस्य सारार्थदीपिकाहिन्दी व्याख्यायां श्री सीतारामझा महोदयः । इत्थं ज्योतिः शब्दोऽनेकार्थः सन् ब्रह्मवाचकोऽपि भवत्येव । तस्मात्तु ज्योतिःशब्दः प्रत्यक्षाप्रत्यक्षरूपेण समस्तं विश्वं निखिलब्रह्माण्डं वा ब्रह्मवत् स्वस्मिन्नात्मसात् कर्तुं शक्नोति ।

ज्योतिरिति । 'द्युत दीप्तौ' (भ्वा० आ० से०) इति धातोरिसुन । दकारस्य जः । 'द्युतेरिसुन्नादेशश्च जः' इत्युणादि । अत्र इसन्प्रत्ययः कर्तरि, भावे, करणे च स्वीकृतः । तस्मात् द्योतते इति ज्योतिः, द्योतनं वेति ज्योतिः, अनेन द्योतते वेति ज्योतिरिति ज्ञेयम् । अनया व्युत्पत्या ज्योतिःशब्दः साक्षात् परम्परया वा पूर्वोक्तार्थानां द्योतको भवत्येव ।

ज्योतिषमिति । ज्योतिःशब्दाद् मत्वर्थीयोऽच् (ज्योतिस्+अच्) । 'अर्श आदिभ्योऽच्' (5 ।2 ।127)इत्यच् । सूर्यादयः प्रतिपाद्यविषयाः सन्त्यस्य शास्त्रस्येति । इत्थं 'ज्योतिषम्' इति पदं सुकरतया ज्योतिःशास्त्रवाचकं भवति । ये तु 'ज्योतिर्नक्षत्राद्यधिकृत्यकृतो ग्रन्थः' । 'अधिकृत्य कृते ग्रन्थे' (4 ।3 ।87) इत्यण् । संज्ञापूर्वकत्वान्न वृद्धिरिति 'ज्योतिषम्' इति साध्नुवन्ति तत्तु गौरवान्नोचितम् । ज्यौतिषमिति च । ज्योतिषः सूर्यादेरिदं प्रतिपादकं शास्त्रमिति 'तस्येदम्' (4 ।3 ।120) इत्यण् ।

इत्थं ज्योतिषं ज्यौतिषं वेति निष्पन्नं पदद्वयं ज्योतिःशास्त्रस्यैव प्रतिनिधित्वं करोति । अतएव श्रीरामशंकरभट्टाचार्यस्य "अस्माकं मते शास्त्रस्य नाम ज्योतिषम् इत्येव विद्यते नतु ज्यौतिषम्"इत्यादि पूर्वनिर्दिष्टं कथनं कथमपि नोचितं प्रतीयते । अतिप्राचीनकालादेव ज्योतिःशास्त्रकृते ज्यौतिषं ज्योतिषं वेति शब्दद्वयं प्रयुक्तमासीत् । पाणिनीयविधिना च तद्द्वयोः शब्दयोर्निष्पत्तिरपि भवत्येव । कैश्चिदुच्चारणसुकरतया शास्त्रविशेषे ज्योतिषमित्येव पदं बहुलतया प्रयुक्तमित्यन्यो विषयः । अनेन त्वित्थं कथमपि न कथनीयं भवेद् यद् 'ज्यौतिषम्' इति पदं सर्वथा प्राचीनैरप्रयुक्तं

तथा चापाणिनीयमिति । किमधिकं भगवता शङ्कराचार्येणापि 'नक्षत्रविद्याज्यौतिषम्' इति प्रतिपादितम् ।*नारदीयपुराणे चैकस्मिन्नेव स्थले ज्योतिषं ज्यौतिषं चेति शब्दद्वयं प्रयुक्तं वर्तते । यथा हि –

ज्योतिषाङ्गं प्रवक्ष्यामि यदुक्तं ब्रह्मणा पुरा ।
यस्य विज्ञानमात्रेण धर्मसिद्धिर्भवेन्नृणाम् ।।
त्रिस्कन्धं ज्यौतिषं शास्त्रं चतुर्लक्षमुदाहृतम् ।
गणितं जातकं विप्र संहिता स्कन्धसंज्ञिताः ।।**

इत्थमवधेयं यद् ज्यौतिषं ज्योतिषं वेति ज्योतिःशास्त्रे शिष्टैर्व्यवहृतं वैयाकरणसम्मतं सुविज्ञेयम् । यदि द्वयोः प्रयोगः पुंसि क्रियते तदा द्वयोरर्थो ज्योतिःशास्त्रविज्ञ इत्यपि भविष्यति । अतो यथा सुविज्ञैर्ज्योतिषं ज्यौतिषं वेति द्वयोः प्रयोगः पुरा शास्त्रविशेषे ज्योतिःशास्त्रे कृत आसीत्, तथैव चाद्यापि तयोः प्रयोगे कापि विसंगतिर्नास्तीति ।

❐

*छान्दग्योपनिषद् (7 ।1 ।2) शाङ्करभाष्यम्, 'गीताप्रेस'–संस्करणम् ।
**बृहन्नारदीयपुराणम्–पूर्वभागः–द्वितीयपादः–54 । 1, 2

परिशिष्टम्

सन्दर्भग्रन्थाः

1. अभिज्ञानशकुन्तला — कालिदास/ए.बी. गजेन्द्रगडकर, एजूकेशनल पब्लिशर्स एण्ड बुक सेलर्स, टावर रोड, सूरत/रिचर्ड पिशेल हार्डवर्ड युनिवर्सिटी प्रेस।
2. अभिज्ञानशकुन्तलम् (अर्थद्योतनिका) — राघवभट्ट/ एम. आर. काले, सुधाकरमुद्रायन्त्रालय, मुम्बई।
3. अभिज्ञानशाकुन्तलम् (अभिनवराज लक्ष्मी) — गुरुप्रसाद शास्त्री, श्री लक्ष्मी–नारायण प्रेस, बनारस सिटी।
4. अमरकोष : (रामाश्रमी) — अमरसिंह/ भानुजीदीक्षित, निर्णयसागर प्रेस बम्बई।
5. अष्टाध्यायी सूत्रपाठः — महर्षि पाणिनि, निर्णयसागर प्रेस बम्बई।
6. ईशादि नौ उपनिषद् — गीताप्रेस गोरखपुर।
7. ऋग्वेद संहिता — श्रीपाद सातवलेकर स्वाध्याय मण्डल, सतारा।
8. काशिका — जयादित्यवामन, चौखम्भा संस्कृत संस्थान, वाराणसी।
9. काशिका — जयादित्यवामन, संस्कृत अकादमी, उस्मानिया विश्वविद्यालय, हैदराबाद।
१०. काशिकाविवरणपत्रिजका (न्यासः) — जिनेन्द्रबुद्धि, संस्कृत अकादमी, उस्मानिया विश्वविद्यालय हैदराबाद।